मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥

दक्षो दक्षोपमेयः समजनि जनितारम्भसम्भावनीयो
रक्षोवक्षोभभीतप्रथितजनपदो रक्षितो येन गौडः ।
यस्याशीर्वाददूर्वादलकलितशिखो भूपतेर्यज्ञयूपः
संयातोऽनेकशाखः स्फुटमिव निगमो व्यासतो व्यासमाप्तः ॥

क्रियादक्षस्य दक्षस्य राढापुरनिवासिनः ।

End:

द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतो
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत् कविः ।
विद्वन्मोदतरङ्गिणी ननु चिरञ्जीवेन तज्जन्मना
शास्त्रे या रचितेह पूर्तिमगमत् तस्यास्तरङ्गोऽष्टमः ॥

Colophon:

इति महामहोपाध्यायश्रीचिरञ्जीवभट्टाचार्यविरचितायां विद्वन्मोदतरङ्गिण्याम् अष्टमस्तरङ्गः समाप्तः ।

समाप्तेयं विद्वन्मोदतरङ्गिणी । श्रीपद्मनाभोऽवतु ।

Author—Cirañjīva Bhaṭṭācārya.

Remarks—The author belonged to Kāśyapagotra in Gauḍa Deśa as evinced by the introductory verses. This work is printed in Calcutta.

॥ विमला (धातुषट्कसमीक्षाव्याख्या) ॥

626. VIMALĀ.

Commentary on Dhātuṣaṭkasamīkṣā.

Substance—Palm leaf. Size—21¼″ × 2″. Leaves—3. 11 lines per page and 102 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Subject—Śaiva philosophy.

Beginning:

सिद्धिम् । अन्नूनामपि विभक्तत्वादिहेतुना कार्यत्वाद्..... कारणपूर्वकत्वं सिद्धम् । यद्यप्यण्वादिघटपर्यन्तस्योत्तरकार्यं प्रति कारणत्वव्यपदेशः । तथाप्यण्वादिघटपर्यन्तस्य कार्यत्वादेव नोत्तरोत्तरकार्यं प्रति कारणता । अनन्वयादनवस्था...तर्हि कथमण्वादीनामुत्तरोत्तरकार्यं प्रति कारणव्यवहार इत्युच्यते ।

End:

तथाचं स्मृत्यन्तरम्—

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणास्तथा ॥
ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः ।

कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ॥
ब्रह्मविद्भ्यः प(रं) भूतं न किञ्चिदिह विद्यते ॥ इति ॥

Colophon :

धातुपङ्कसमीक्षाया व्याख्या दुस्तर्कनाशिनी ।
अमलानुभवेनेयं रचिता विमला मया ॥

इति श्रीमदानन्दप्रकाशभगवत्पूज्यपादशिष्येण... ब्रह्मविद्भ्यो नमः ।

आनन्दाम्बुनि सत्सिन्धौ बोधवीचीतरङ्गिते ।
नौमि विश्रान्तमात्मानमनन्तं शार्ङ्गिणं विभुम् ॥

भूतानि पञ्च तव मोहसमुत्थितानि
संघातरूपपरिणाममुपागतानि ।
कुर्वन्ति कर्मफलमश्नुवते च तेषां
साक्षित्वमन्तरविलुप्तचिदेकरूपः ॥

Author—Amalānubhava.

Remarks—The script is small but legible. The Ms. is old.

॥ विरूपाक्षपञ्चाशिका (विवृतियुता) ॥

627. VIRŪPĀKṢAPAÑCĀŚIKĀ
with Vivṛti.

Substance—Palm leaf. Size—14½″ × 1¾″. Leaves —21. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—540, Complete.

Subject—A panegyric embodying the doctrines of Vedāntic philosophy.

Author—Text: Virūpākṣanātha.
Com: Māheśvara Śrī Vidyācakravartin.

Remarks—The Ms. seems to be a recent production. It is published as No. 9 in TSS.

॥ विरूपाक्षपञ्चाशिका (विवृतियुता) ॥

628. VIRŪPĀKṢAPAÑCĀŚIKĀ with Vivṛti.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—30. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—540. Complete.

Subject etc. Same as No. 627.

॥ विवेकमार्तण्डः ॥

629 A. VIVEKAMĀRTĀṆḌA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—52. 6 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—700. Complete.

Subject—Means of attaining salvation.

Author—Viśvarūpadeva.

Remarks—This work is published as No. 119 in TSS.

॥ समाधिप्राक्रिया ॥[पञ्चीकरणवार्तिकम्]

629 B. SAMĀDHIPRAKRIYĀ.

Substance –Palm leaf. Size—9½"×1¼". Leaves—6. 6 lines per page and 36 letters per line. Script —Malayāḷam. No. of Granthas—80.

Subject—The effects of concentrated devotion to God.

Beginning :

कृतपञ्च.....तत्कार्यं च संविराडित्युच्यते । एतत् स्थूलशरीरमात्मन इन्द्रियार्थोपलब्धिर्जायते.....दुभयाभिमान्यात्मा विश्वः..... तत्र...कारः अपञ्चीकृतपञ्चमहाभूतानि तत्... दशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते ।

End :

अविद्यातिमिरातीतसर्वाभासविवर्जितम् ।
आनन्दमचलं शुभ्रं मनोवाचामगोचरम् ॥
वाच्यवाचकनिर्मुक्तहेयोपादेयवर्जितम् ।
.....द्वैतं वैष्णवं पदमश्नुते ॥
इदं प्रकरणं यत्नाज्ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिनिलयैर्गुरुभक्तिप्रसादतः ॥

Colophon :

श्रीकृष्णरामपादानां शिष्येण रचितं मया ।

अन्तरारामयतिर्ब्रह्मवित्प्रवरेण तु ॥
वेदशास्त्रेषु निर्णीता व्यासादिगुरुसत्तमैः ।
निःश्रेयसे मुमुक्षूणां समाधिप्रक्रियादरात् ॥
शिवमस्तु ॥

Author—Antarārāmayati.

Remarks—The colophon clearly states that the author was the disciple of Śrī Kṛṣṇa Rāmapāda. Most of the leaves are broken. The following ślokas also occur towards the end :

सच्चिदानन्दसन्दोहदानदेवमहीरुहान् ।
प्रत्यक्षैश्वर्यसद्भावान् नौमि देशिकसंगमान् ॥
जगदङ्कुरकन्दाय विशदानन्दमूर्तये ।
गलिताखिलभेदाय नमः शान्ताय विष्णवे ॥

॥ विवेकमार्तण्डः ॥

630. VIVEKAMĀRTĀṆḌA.

Substance—Palm leaf. Size—13″×2″. Leaves—8. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject etc. Same as No. 629 A.

Remarks—The Ms. extends upto the 2nd Prabodha.

॥ विवेकमार्त्तण्डः ॥

631. VIVEKAMĀRTĀṆḌA.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—12. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject etc. Same as No. 629 A.

Remarks—The Ms. commences only from the 4th Prabodha styled Kālavijñāna. The closing portion is also missing.

॥ वेदान्तकल्पतरुः (भामतीव्याख्या) ॥

632. VEDĀNTAKALPATARU.

Commentary on Bhāmatī.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—274. 11 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—10500. Complete.

Subject—Same as No. 598.

Beginning:

यदज्ञातं जीवैर्बहुविधजेगद्भ्रमधरं
वियद्व्यद्धालैस्तलमलिनतायोगिकलितम् ।
तदुन्मुद्रज्ञानप्रततसुखसद्ब्रह्म परमं
नमस्यामः प्रत्यक् श्रुतिशताशिरोभिः प्रकटितम् ॥

बोधाभीशुशतैरबोधतिमिरं हृद्योमगं दारयन्
प्रज्ञावारिधिमुन्नतिं च गमयन् सोमः सदोदेति यः ।
तं संसारसहस्ररश्मिजनितक्लेशापहं दक्षिणा-
मूर्तिं निर्मलयोगिचिन्त्यचरणाम्भोजं भजे शङ्करम् ॥

माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिक-
द्योतालंकृतसत्सुखाढ्यवपुः श्रीमान्नृकण्ठीरवः ।
प्रह्लादोक्तगिरः प्रमाणनिधौ दिव्याकृतिः स्तम्भतो
निर्यातः प्रकटीभवेत् स हृदयाम्भोजे ममाखण्डितम् ।

ललितैः पदविन्यासैर्या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वती तां नमस्यामः ॥
भजमानविघ्नभित्तिप्रभित्तिकुद्दालमिव करेण रदम् ।
दधतं महागणेशं प्रणौमि सकलेष्टसम्पदं ददतम् ॥
यन्न्यायसूत्रग्रथितात्मबोधसौरभ्यगर्भश्रुतिपद्ममाला ।
प्रसादयत्यद्वयमात्मतत्त्वं तं व्यासमाद्यं गुरुमानतोऽस्मि ॥
वेदान्तार्थतदाभासक्षीरनीरविवेकिनम् ।
नमामि भगवत्पादं परहंसधुरन्धरम् ॥
स्वयंप्रभसुखं ब्रह्म मायारचितविग्रहम् ।
यथार्थानुभवानन्दपदगतिं गुरुं नुमः ॥

विघ्नप्रश्रयसंयमाः शुभफला यत्सन्निधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतश्चिरं तमनिशं वन्दे 'गुरूणां गुरुं
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥

ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यत्कोदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।

प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते
गोभिर्यस्य सुखप्रकाशशशिनं तं नौमि विद्यागुरुम् ॥

वैदिकमार्गवाचस्पतिरपि सम्यक्सुरक्षितं चक्रे ।
नयविजितवादिदैत्यः स जयति विबुधेश्वराचार्यः ॥

रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः
सद्वर्णानन्तपर्णः समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्मुक्तावचेयं दददमृतफलं जीवविश्वेशवन्द्यः
संसाराक्रान्तितापप्रशमननिपुणस्तन्यते कल्पवृक्षः ॥

कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे
कृष्णक्ष्मामभुनक्ति भूतलं सह महादेवेन संविभ्रति ।
भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं
वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥

श्रीमच्छारीरकव्याख्यायाः प्रारिप्सितायाः अविघ्नसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयविषयादि दर्शयति— अनिर्वाच्येति ।

End :

अथ समर्पणसमनन्तरमनेनोपहारेण परमेश्वरः प्रीयतामित्यर्थः । कार्तस्वरं स्वर्णं तस्यासारोऽनवरतवर्षणं तेन सुपूरितोऽर्थः काङ्क्षितो यस्य सार्थस्य जनसमूहस्य स तथेत्येको बहुव्रीहिः । तथाविधः सार्थो यस्य स्वीयत्वेन वर्तते स नृगस्तथेत्यपरः । नृग इति राज्ञ आख्या ।

स्वज्योतिः सुखसदभेदमात्मभूतं
यन्मायाविरचितविश्वदृश्यनद्धम् ।

तद् ब्रह्म प्रणतभक्तान्धकारभानुं
वन्देऽहं हरिहरविग्रहं दधानम् ॥

अमृतममरैरप्यायासादतीव सुदुर्लभं
प्रणवगुणवच्छिष्यैर्यत्र स्थितं सुखमाप्यते ।
अजनि कमला यस्माद्विद्या पुनर्निखिलार्तिहा
गुरुमनुभवानन्दं तं नौम्यपारकृपाम्बुधिम् ॥

आकल्पं कल्पवृक्षादमुत उदितसन्न्यायपुष्पैः प्रफुल्लैः
मत्पक्षारूढविद्वद्भ्रमरमुखरितैर्बोधसद्धारिगन्धैः ।
श्रोतृश्रेणीविदोषश्रवणपुटगतैर्हृत्सरोजाधिवासः
श्रीकान्तोऽभ्यर्च्यतां स प्रकटयतु तनुं सच्चिदानन्दरूपाम् ॥

क्व मामकं केशवशानुगामि चेतः क्व वाचस्पतिसूक्तयोऽमूः ।
क्व शङ्कराचार्यवचः क्व चेदं वैयासिकं सूत्रमगाधभावम् ॥
गुरुक्षमाभृत्त्रयनिर्गतानां सरस्वतीनां श्रुतिसिन्धुसङ्गे ।
विगाह्य मज्ञेतुमनन्तपुण्यं परं मयाकारि निबन्ध एषः ॥

शास्त्राम्बुधेः पारगता द्विजेन्द्रा
यद्दत्तचामीकरवारिराशेः ।
ज्ञातुं न पारं प्रभवन्ति तस्मिन्
कृष्णक्षितीशे भुवनैकवीरे ॥

भ्रात्रा महादेवनृपेण साकं त्रातिं क्षितिं प्रागिव धर्मसूनौ ।
कृतो मयायं प्रवरः प्रबन्धः प्रगल्भवाचस्पतिभावबोधी ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदनुभवानन्दपूज्य-

पादशिष्यभगवदमलानन्दस्य व्यासाश्रमापरनामधेयस्य
कृतौ वेदान्तकल्पतरौ चतुर्थोऽध्यायः समाप्तः ।
हरिः ॐ ।

Author—Amalānandasarasvatī, *alias* Vyāsāśrama.

Remarks—This work is a commentary on Bhāmatī which is itself a gloss on Śaṅkarabhāṣya.

॥ वेदान्तसारः ॥

633. VEDĀNTASĀRA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—9. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—A compendium of Vedāntic philosophy.

Beginning:

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥

वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैः तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः ।

End:

किं बहुना । इति देहयात्रामात्रार्थम् इच्छानिच्छापरेच्छाप्रा-

ष्टानि सुखलक्षणाद्यारब्धफलानि अनुभवतामन्तःकरणाभासादीनामवभासकः सन् देहावसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्याणामपि विनाशात् परमकैवल्यमानन्दरसम् अखिलभेदप्रतिभासरहितम् अखण्डं ब्रह्मावतिष्ठते । "न तस्य प्राणा उत्क्रामन्ति । अत्रैव समवलीयन्ते । विमुक्तश्च विमुच्यते" इत्येवमादिश्रुतेः ।

Colophon:

इति वेदान्तसारं समाप्तम् । शुभमस्तु ।

Author—Sadānandayogīndra.

Remarks—The work is printed with commentary in Calcutta. After the colophon are added the following verses:

" अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचमद्वेषाद्यनुवर्तते " ॥

॥ वेदान्तार्थसारसंग्रहः ॥

634. VEDĀNTĀRTHASĀRASAṄGRAHA.

Substance—Palm leaf. Size—$9\frac{5}{8}'' \times 1\frac{5}{8}''$. Leaves—25. 9—10 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—405. Complete.

Subject—Same as No. 633.

Beginning:

हरिः । ओम् । शुभमस्तु ।

श्रीदक्षिणामूर्तिचरणारविन्दाभ्यां नमः ।

प्रणताज्ञानतिमिरभास्वन्तं करुणार्णवम् ।
परमानन्दचिद्रूपं प्रणौम्यादिमदेशिकम् ॥
स्वभक्तबोधजलधिसुधाकरमधोक्षजम् ।
वन्दे स्वानन्दसम्पूर्णं कृष्णं कारुण्यविग्रहम् ॥

इह खलु सकलश्रुतिमौलिलालितं सच्चिदानन्दघनम् अपास्तस्वगत(स)जातीयविजातीयभेदं नित्यशुद्धबुद्धमुक्तनिष्कलनिर्मलनिर्विकाररूपं भूमशब्दवाच्यं परं ब्रह्मैवाद्वितीयमास्त इति निर्मला वस्तुदृष्टिः । अस्यामेव सनकसनन्दनसनातनसनत्कुमारशुकवामदेवादयः समस्तसज्जनचूडामणयः सन्ततं सुखेन निर्भयमासते ।

End:

इदं च प्रकरणं पाण्डित्यमात्रपराय शान्त्यादिसाधनरहिताय डम्भाहङ्कारादिदूषिताय च न देयम् । किंतु साधनचतुष्टयसम्पन्नाय सर्वदा मुमुक्षवे अन्तर्मुखायानुगताय सच्छिष्याय देयम् । तदुक्तमुपदेशसाहस्र्यां श्रीमदाचार्यैः—

"प्रशान्तचित्ताय शमान्विताय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे ॥

इति सर्वमवदातम् ।

वेदान्तसारसर्वस्वं संगृहीतं मयाधुना ।
अनेन भगवान् साक्षात्परमात्मा प्रसीदतु ॥

Colophon :

इति श्रीदाक्षिणामूर्तिचरणकमलभृङ्गेण सीतारामाख्यविदुषा विरचितं वेदान्तार्थसारसंग्रहप्रकरणं सम्पूर्णम् । हरिः ओम्। शुभमस्तु । कृष्णाय नमः ।

Author—Sītārāma.

Remarks—One side of Fol. 20 is left blank.

[अधिकरणरत्नमाला ग्रं]। वैयासिकन्यायमाला ॥

635. VAIYĀSIKANYĀYAMĀLĀ.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—21. 11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—700. Complete.

Subject—An abbreviated exposition of Adhikaraṇas in Śārīrakabhāṣya.

Beginning :

श्रीगणपतये नमः ।

एको विषयसन्देहः पूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी सङ्गतयः स्फुटाः ॥
शास्त्रेऽध्याये तथा पादे न्यायसं...यस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरुह्यताम् ॥
शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः ।
समन्वयाविरोधौ द्वौ साधनं च फलं तथा ॥

समन्वये स्पष्टलिङ्गमस्पष्टत्वे परपाक्ष्यगम् । (?)
ज्ञेयगं पदमात्रं च चिन्त्यं पादेष्वनुक्रमात् ॥

End :

अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् ।
जगत्स्रष्टृत्वमस्त्येषां योगिनामथ नास्ति वा ।
अस्ति स्वाराज्यमाप्नोतीत्युक्तैश्वर्या(नु?नव)ग्रहात् ॥
सृष्टावप्रकृतत्वेन स्रष्टृता नास्ति योगिनाम् ।
स्वाराज्यमीशो भागान् स ददौ मुक्तिं च विद्यया ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिविरचितायाम् अधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

समाप्तश्चाध्यायः ॥

Author—Śrī Bhāratītīrthamuni.

Remarks—This poem is also known as Adhikaraṇa-ratnamālā dealing as it does with Adhikaraṇas or topical sub-divisions of the Vedāntaśūtras. viz: the subject, the doubt, the first side or *prima facie* argument, the answer or conclusion, and the application. The work is also entitled Vaiyāsikanyāyamālā and Adhikaraṇamālikā. The readings in the end and colophon quoted above agree with those of the Ms. noted on p. 3547, Vol. IX, D C S M, Madras. But the beginning there found is as follows :

"प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।

वैयासिकी न्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥
अथातो ब्रह्मजिज्ञासा ॥

॥ वैयासिकन्यायमाला (वृत्तिसहिता) ॥

636. VAIYĀSIKANYĀYAMĀLĀ
with Vṛtti.

Substance—Palm leaf. Size—11″ × 2″. Leaves—88. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2650. Incomplete.

Subject—Same as No. 635.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतातत्त्वं गुरुमूर्त्युपाधियुक्तं नमस्कृत्य ग्रन्थं प्रतिजानीते--

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकन्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥

व्यासेन प्रोक्ताः वैयासिकाः । वेदान्तवाक्यार्थनिर्णायकान्यधिकरणानि न्यायाः तेषामनुक्रमेण ग्रथनं माला ।

End :

चतुर्थाधिकरणमारचयति—

मार्गचिह्नं भोगपूर्वं नेतारो वार्चिरादयः ।
आद्यौ स्यातां मार्गचिह्नसारूप्याल्लोकशब्दतः ॥
अन्ते गमयतीत्युक्तेर्नेतारस्तेषु चेदृशः ।
निर्देशोऽस्त्यत्र लोकाख्या तन्निवासिजनान् प्रति ॥

य एते अर्चिरादयः श्रुताः, ते मार्गचिह्नानि भवितुमर्हन्ति; लौकिकमार्गचिह्नरूपेण निर्दिश्यमानत्वात् । लोका हि मार्गज्ञानायैवं निर्दिशन्ति—ग्रामान्निर्गत्य नदीं व्रजतः.....

....

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारततीर्थमुनिप्रणीतायामधिकरणमालायां चतुर्थस्य द्वितीयः पादः ।

Author—Same as No. 635.

Remarks — The commentary is written by the author himself.

॥ वैराग्यशतकम् ॥

637. VAIRĀGYAŚATAKAM.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—13. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—156.

Subject—The means of attaining salvation.

Beginning:

हरिः । श्रीगणपतये नमः ।

आस्ते कश्चन भिक्षुः संगृह्णन्नव्ययानि दश ।
न ममेत्यव्ययुगलं याचामस्तं किमप्यन्यत् ॥

End :

न गृहीतं श्रुतिहृदयं न च निगृहीतं परिप्लवं हृदयम् ।
इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरम् ॥
माध्वं कीकटदेशे कविषु न रामानुजायध्वम् ।
आश्रयत राजधानीं काशीमाशीविषाङ्कस्य ॥

Colophon :

इति श्रीनीलकण्ठदीक्षितस्य कृतिषु वैराग्यशतकं सम्पूर्णम् ।

Author—Nīlakaṇṭhadīkṣita.

Remarks—This Ms. consists of 100 verses in Āryā metre. It is available in print. The whole subject is dealt with in a characteristic way.

॥ शिखरिणीमाला (तत्त्वविवेकयुता) ॥

638. ŚIKHARIṆĪMĀLĀ
with Tattvaviveka.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—22. 9 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—445. Incomplete.

Subject—Śivādvaita philosophy.

The text begins:

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्दुनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद् गता गौरवम् ।
तं सर्वादिगुरुं मनोजवपुषं मन्दस्मितालङ्कृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥

प्रभावं ते नालं परशिव परिच्छेत्तुमसरा
नरः स्तोतुं वाञ्छन् न कथमपहास्यत्वमयताम् ।
तथापि त्वन्नामस्मृतिगुणनिकापुण्यभजनं
कुतोऽप्यस्तु द्वारादिति मतिरिह प्रेरयति माम् ॥

The commentary begins:

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टमिदं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीमहचराय नमः शिवाय ॥

आकर्णकृष्टधनुराहितमोहनास्त्र-
मारान्निरीक्ष्य मदनं कुपितस्य किञ्चित् ।
शम्भोः समाधिसमये विकसत्कृशानु-
ज्वालाकलापजटिलं निटिलं स्मरामि ॥

सर्वविद्यालतोपन्नपारिजातमहीरुहान् ।
महागुरून् नमस्यामि सादरं सर्वेश्वरान् ॥

निगमशिरसि निष्ठा नित्यवस्तून्यभीप्सा
भवचरणसरोजे भक्तिरव्याजसिद्धा ।

त्रयमपि हृदि येषां नात्र संसारशोकात्
सहजमुपगतं ते सन्तु सन्तः समृद्धाः ॥

पद्यैः षष्ट्या पशुपतिमहं देवमस्ताविषं यै-
रन्तःसारैरखिलजगतामन्तरात्मानमेकम् ।
भावं तेषां प्रविशदयितुं भग्नवाचाटवाचां
वृत्तिं कुर्वे विषमविवृतिं वृद्धवर्त्मानुगानाम् ॥

इह यद्यपि "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् प्रत्यस्तमितभेदम् *

* * * * * *

The text ends:

गुणातीतोऽपि त्वं सगुण इव मायाशबलितः
परिष्कुर्वन् साम्बं वपुरमितकण्ठत्रिणयनम् ।
अभिख्याभिः ख्यातः शिवभवमुखाभिर्विजयसे
नियन्ता लोकानां सहरिहरपङ्केरुहभुवाम् ॥

The commentary ends:

इन्द्रमेके परे प्राणान् ब्रह्माणमपरे विदुः ।
ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः ॥
एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिताः ।
इति शिवपुराणे ।
सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः ।
संहारस्य तथा रुद्रस्तयोर्नित्यनियामकः ॥
तस्मात् त्रय... ... ...

Colophon :

Author—Com: Appayyadīkṣita.

Remarks—13 verses out of 60 constitute this Ms. The commentary is elaborate and lucid. All stanzas excepting the first are written in Śikhariṇī metre. The work is printed at Kumbhakoṇam. The colophon as seen in the Ms. catalogued on p. 3895, Vol. X, DCSM. Madras is noted below:

इति श्रीशिखरिणीमालाव्याख्याने...

सदाशिवपदाम्भोजसक्तधीरप्पदीक्षितः ।
समग्रहीत् समस्तानां सारमेकं (तं) त्रयीगिराम् ॥

॥ शिवपञ्चरत्नम् (सव्याख्यम्) ॥

639. ŚIVAPAÑCARATNAM with commentary.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—63.

Subject—Same as No. 539.

Beginning :

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।
यज्ज्ञानाच्छ्रेय आप्नोति तस्मै ज्ञानात्मने नमः ॥
अत्र भगवान् श्रीमच्छङ्कराचार्यो मन्दमतीनामात्मबोधाख्यं

प्रकरणं प्रदर्श्य तत्रापि मन्दमतीनाम् अनुग्रहार्थं सद्योपनिषत्सिद्धमर्थं गुरोः प्रसादात् सिद्धमात्मानात्मविवेकपूर्वकं स्वानुभवं प्रकटयति पञ्चभिः श्लोकैः—नाहमिति ।

नाहं देहो नेन्द्रियाण्यन्तरङ्गं
नाहङ्कारः प्राणवर्गो न बुद्धिः ।
दारापत्यक्षेत्रवित्तादिदूरः
साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥

End:

मत्तो नान्यत् किञ्चिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपकल्पितम् ।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥

यस्मादिदमसत्यमद्वैते मयि सत्यं भाति । तस्मात् शिवोऽहमस्मीत्यर्थः ।

Colophon :

शिवपञ्चरत्नप्रकरणं समाप्तम् ।

Author—Text: Śaṅkarācārya.

Remarks—This work is one among the five literary gems produced by Śaṅkarācārya. It has been published in SGS. at Śrīraṅgam. The concluding portion of Manīṣapañcaka is also appended to the Ms.

॥ शिवार्कमणिदीपिका (ब्रह्मसूत्रश्रीकण्ठभाष्यव्याख्या) ॥

640. ŚIVĀRKAMAṆIDĪPIKĀ.

Commentary on Śrīkaṇṭhabhāṣya.

Substance—Palm leaf. Size—21½″ × 2″. Leaves—290. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—14500. Incomplete.

Subject—The absolutism of the Supreme Spirit in the light of Śaivite view.

Beginning :

हरिः ॐ ।

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालदळभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ॥ १ ॥

आकर्णकृष्टधनुराहितमोहनास्त्र-
मारान्निरीक्ष्य मदनं कुपितस्य किञ्चित् ।
शम्भोः समाधिसमये विकसत्कृशानु-
ज्वालाकलापजटिलं निटिलं स्मरामि ॥ २ ॥

महापाशुपतज्ञानसम्प्रदायप्रवर्त्तकान् ।
अंशावतारानीशस्य योगाचार्यानुपास्महे ॥ ३ ॥

आसेतुबन्धतटमा च तुषारशैला-
दाचार्यदीक्षित इति प्रथिताभिधानम् ।
अद्वैतचित्सुखमहाम्बुधिमग्नभाव-
मस्मत्पितामहमहं शरणं प्रपद्ये । ४ ॥

यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षात्
तद्दर्शनादखिलदर्शनपारभाजः ।
तं सर्ववेदसमशेषबुधाधिराजं
श्रीरङ्गराजमम्बिनं पितरं नतोऽस्मि ॥ ५ "

यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा
सर्वैः साकं पुराणैः स्मृतिनिकरमहाभारतादिप्रबन्धैः
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्करायैस्तदेव ॥ ६ "

तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामावर्जयति नान्यथा ॥ ७ "
अनुग्रहश्च देवस्य श्रुत्या चिद्रूपया सह ।
यथावत्तं परिज्ञाय ध्यायद्भिः समवाप्यते ॥ ८ "
इति भगवता वेदव्यासेन सूत्रयता परं
सगुणमपि तत् साम्बं ब्रह्म न्यरूपि शिवाभिधम्
यदनुकरणादर्थादन्येऽपि सञ्जगृहुर्बहून्
पणिनजमुखाः सूत्रैर्विष्वङ्मुखत्वविभूषणैः ॥ ९ "
तदिदं ब्रह्मसूत्राणां तात्पर्यं सगुणे शिवे ।
प्रकटीकर्तुमाचार्यः प्राणिन्ये भाष्यमुत्तमम् ॥ १० "
भाष्यमेतदनवं विवृण्वति स्वप्नजागरणयोः समं प्रभुः ।
चिन्नवोम्मनृपरूपभृत् स्वयं मां नियुज्य महिळार्द्धविग्रहः ॥ ११ "

वोम्मक्षिनीशितुरपारगुणाम्बुराशे-
रष्टासु दिक्षु विततोर्जितशासनस्य ।
अन्तः सदैव रमता विभुना नियुक्तो
भाष्यं यथामतिबलं विशदीकरोमि ॥ १२ "

यावन्तो निविशन्ते विदुषां व्याख्यानभारतीगुम्फाः ।
सर्वेषामपि तेषां ददाति पुष्पकमिवैतदवकाशम् ॥ १३ ॥
तस्मादत्र यथामति क्रियदाशयवर्णना मया क्रियते ।
तुष्यन्ति ततो विबुधाः सुधया रत्नाकरादिवाम्बुनिधेः । १४ ॥

ॐ भगवद्बादरायणप्रणीतब्रह्मसूत्रनिकुरुम्बस्य वेदान्तमीमांसाशास्त्रस्य लोकानुजिघृक्षया भाष्यं निर्मित्सुराचार्यो निरन्तरशिवध्याननिर्धूतनिखिलान्तरायोऽपि शिष्टाचारपरिपालनार्थं व्याचिख्यासितशास्त्रप्रतिपाद्यां परां देवतां नमस्करोति—ॐ नम इति ॥

End :

नचार्थवादे यावदुपास्यगतं तस्य सर्वस्यापि ग्रहणनियमः । द्रव्यदेवताविशिष्टयागविध्यर्थवादानां केवलद्रव्यविषयाणाम् "आत्मनो वपामुदखिदत् । तामग्नौ प्रगृह्णात् । ततोऽजस्तूपरः समभवत् ।" इत्यादीनां केवलदेवताविषयाणाम् "अग्निं वा एतस्य शरीरं गच्छति सोमं रसः" इत्यादीनां बहुलमुपलम्भेन.....
प्यर्थवादस्यान्यतरोपास्यविषयत्वोपपत्तेः । तस्माद् दहराकाशतदन्तर्वर्तिनो.....जीवसाधारणः पूर्वपक्षो निराकृतः । ततः परं जीवपक्षोपपादकहेत्वन्तरोद्भावनपूर्वकं तन्निराकरणार्थानि सूत्राणि ।

Colophon :

Author—Appayyadīkṣita.

Remarks—The commentary is very simple and exhaustive and is repleto with questions and answers. No. 641 is only a continuation of this Ms. and the colophon found therein

gives the names of the work and its author. The Ms. extends from the beginning to the end of Sūtra 17, Pāda III, Chapter I.

॥ शिवार्कमणिदीपिका (ब्रह्मसूत्रश्रीकण्ठभाष्यव्याख्या) ॥

641. ŚIVĀRKAMAṆIDĪPIKĀ.

A Commentary on Śrīkaṇṭhabhāṣya.

Substance—Palm leaf. Size—21½"×2". Leaves—82. 10 lines per page and 68 letters per line. Script—Malayāḷam. No of Granthas—3485. Incomplete.

Subject—Same as No. 640.

Beginning :

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् । शब्दे विरोध इति । अनेन सूत्रे शब्द इति सप्तम्यन्तं पदं विरोध इत्यस्य पूर्वसूत्रादपकृष्टम्... ... ... । वैदिकानामिन्द्रादिशब्दानां विग्रहविशिष्टवाचित्वेऽभ्युपगम्यमाने विग्रहनाशे तेषामर्थशून्यत्वलक्षणो विरोधः प्रसज्येतेत्यर्थः । ननु नायं दोषः । इन्द्रादिविग्रहाणां शिवविग्रहवन्नित्यत्वोपपत्तेः । अनित्यत्वेऽपि कदाचिदर्थसत्तयैव पाण्डवादिशब्दानामिवार्थवत्त्वोपपत्तेः" सार्वकालिकार्थापेक्षायामपि गवादिशब्दवज्जातिशब्दत्वोपपत्तेरित्याभिप्रायेण पृच्छति—कथमिति ॥

End :

नहि लौकिकवाक्यवद् वैदिकवाक्येषु शक्तिभ्रमात् पदप्रयोगः

पदार्थप्रतिपत्तिर्वा वक्तुं शक्यते इत्याशङ्क्य शिवस्य ब्रह्मणः शरीरमिति चिदचिद्वस्तुविशेषिते लोके चिदचिद्वस्तुषु प्रयुज्यमानाः शब्दाः केवलस्यान्तर्यामिणो वाचका नेष्यन्ते । किन्तु तत्तद्वस्तुरूपशरीरविशिष्टस्य तथा विशिष्टवादिनां शब्दानामेकदेशैकदेशिसम्बन्धेन विशेषणेषु लक्षकत्वं युक्तमिति भावः ।

Colophon:

इति श्रीशिवाग्निवाद्यिक्ष्वर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्धरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

शिवार्पणमस्तु ॥

Author—Same as No. 640. Appayya Dikṣita

Remarks—The Ms. extends upto the end of the 1st chapter.

॥ शिवार्कमणिदीपिका (ब्रह्मसूत्रश्रीकण्ठभाष्यव्याख्या) ॥

612. SIVARKAMANIDIPIKA.

Commentary on Srikanthabhāṣya.

Substance—Palm leaf. Size—21¼" × 2". Leaves—160. 11 lines per page and 76 letters per line.

Script—Malayāḷam. No. of Granthas—8360. Incomplete.

Subject—Same as No. 640.

Beginning:

हरिः । ॐ ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्न अन्यस्मृत्यनवकाशदोषप्रसङ्गात् ।

वृत्तवर्त्तिष्यमाणयोरध्याययोः प्रतिपाद्यं सङ्गतिसूचनार्थमुपन्यस्य उत्तराध्यायमवतारयति—अतीतेऽध्याये इति । भगवता सूत्रकारेण अथातो ब्रह्मजिज्ञासेति ब्रह्मविचारं प्रतिज्ञाय जगज्जन्मादिकं सच्चिदानन्दरूपत्वविग्रहविशेषविशिष्टत्वादिकं च ब्रह्मणो लक्षणं प्रदर्श्य प्रदर्शितलक्षणविशिष्टे तस्मिन् वेदान्ततदूपब्रह्मणः स्मृत्यादीनां प्रामाण्यं प्रतिज्ञाय प्रतिज्ञातार्थोपपादनाय तेषां ब्रह्मण्येव तात्पर्येण समन्वयः प्रथमाध्यायेनाभिहितः ।

End:

तथाच तस्य सर्वमुक्तिसाधारण्यात् परब्रह्मणो यावान् प्राजापत्यानन्दापेक्षया शतगुणत्वेन श्रुत आनन्दभोगः, तावान् सर्वेषामिति सिद्धौ परमसाम्यश्रुतिरपि तदेकार्था स्यादिति श्रुतिबाधितबहुफलत्वेपम्या(त्) न्यायसहस्रेणापि कल्पयितुं न शक्यम् । (युक्तम्?) । अत एव दूरात् समीपाच्चागत्य तटाके तृषया पानीयं पिबतामविशिष्टा तृप्तिः धीशक्तिपाटवात् तन्मान्द्याच्च चिरेण ।

Colophon—Same as No. 641.

Author—Same as No. 640. Appayyadīkṣita.

Remarks—This Ms. covers the commentary on the 2nd chapter and a few sūtras of the 3rd.

॥ श्रुतिसारसमुद्धरणम् (तत्त्वदीपिकोपेतम्) ॥

643. ŚRUTISĀRASAMUDDHARAṆAM
with Tattvadīpikā.

Substance—Palm leaf. Size—14¼″ × 2″. Leaves—37. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject—Same as No. 536.

Beginning :

हरिः । श्रीगणपतये नमः ।

विलसच्चितिवलतः स्फुरदखिलः स्वकृतमसा
परिनिर्मितविपुलद्वयविहितस्वकमहिमा ।
व्यवहारकवपुषा विधिवचनादिकविषयो
मम मानसनिलयो हरिरवताज्जगदखिलम् ॥

श्रीकृष्णं प्रत्यगात्मानं भक्त्या नत्वा गुरूनपि ।
टीकामहं करिष्यामि तोटकश्लोकगामिनीम् ॥

तत्र "त्रैलोक्यनाथहरि"मित्याद्यश्लोकेनेष्टदेवतागुरुनमस्कारव्याजेन प्रारिप्सितस्य प्रकरणस्य विषयसम्बन्धप्रयोजनानि सूचयति । ननु प्रकरणं नाम शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे वावस्थितमिति तल्लक्षणज्ञैरुच्यते ।

End:

गुरुभक्तिवन्नारायणभक्तिरप्यत्यन्तं ज्ञानस्यान्तरङ्गसाधनमिति दर्शयितुं विराड्रूपं नारायणं नमस्करोति—

"भूः पादौ यस्य खं चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः।
अन्तस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥

त्रिभुवनवपुषं त्रिभुवनमेव वपुः यस्य तं विष्णुं नमामीति योजना। विष्णुं व्यापनशीलम्। यस्य विष्णोः पादौ भूः, यस्योदरं खमाकाशः, यस्यासुरनिलः वायुः। यस्य नेत्रे चन्द्रसूर्यौ। यस्य कर्णौ दिशः। यस्य शिरो द्यौः, यस्य मुखमपि दहनः, यस्य वास्तेयमब्धिः। वसतिस्थानं समुद्र इत्यर्थः। यस्यान्तस्थं सुरनरखगगोभोगिगन्धर्वदैत्यैः भेदैः चित्रं नानाविधं विश्वं रंरम्यते अतिशयेन रमते। तं त्रिभुवनवपुषम् ईशं नियन्तारं सहस्रशीर्षेत्यादिश्रुतिसिद्धं विष्णुं मुहुर्मुहुर्नमामि।

Colophon:

मू— इति श्रीमच्छङ्करभगवत्पादशिष्यश्रीतोटकाचार्यविरचितं तोटकश्लोकरूपं श्रुतिसारसमुद्धरणाख्यं प्रकरणं समाप्तम्।

व्या— अतिमन्दमुमुक्षूणां तत्त्वबोधप्रसिद्धये।
तोटकश्लोकटीकेयं रचिता तत्त्वदीपिका॥

इति पूर्णान्मयोगीन्द्रशिष्येण चिदानन्दयोगिना रचिता तत्त्वदीपिका सम्पूर्णा।

ब्रह्मणे नमः । श्रीमद्गुरुचरणारविन्दाभ्यां नमः ।

Author—Text : Toṭakācārya.

Com : Cidānandayogin, disciple of Pūrṇātmayogīndra.

Remarks—This is an introductory essay on Advaita Vedānta, by Toṭakācārya so named after this composition in Toṭaka metre. Sambandokti is another commentary on this text.

॥ सर्वदर्शनसंग्रहः ॥

644. SARVADARŚANASAṄGRAHA.

Substance—Palm leaf. Size—$28\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves —91. 6—10 lines per page and 84 letters per line. Script—Grantha. No. of Granthas—3800. Complete.

Subject—A summary of all the systems of philosophy.

Beginning :

अविघ्नमस्तु । शुभमस्तु ।

निःश्रेयसनिधिं वन्दे नित्यज्ञानाश्रयं शिवम् ।
येनैव जातं मय्यादि कार्यजातं सतन्त्रकम् ॥

पारं गतं सकलदर्शनसागराणां
मन्त्रोपदेशचरितार्थितसर्वलोकम् ।

श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं
सर्वज्ञविष्णुगुरुमन्वहमाश्रयेऽहम् ॥

श्रीमत्सायणदुर्गाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः ॥

पूर्वेषामतिविस्तराणि सुतरामालोड्य शास्त्राण्यसौ
श्रीमान् सायणमाधवः प्रभुरुपन्यस्यन् सतां प्रीतये ।
दूरोत्सारितमत्सरेण मनसा शृण्वन्तु तत् सज्जना
माल्यं कस्य विचित्रपुष्परचितं प्रीत्यै न सञ्जायते ॥

अथ कथं परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा चार्वाकेण तस्य दूरोत्सारितत्वात् ।

End:

द्वितीयेन वर्णकेन वेदान्तानां प्रतिपत्तिविधिशेषतया ब्रह्मप्रतिपादकत्वं प्रत्यक्षेपि । दिङ्मात्रमत्र प्रादर्शि । शिष्टं शास्त्र एव स्पष्टमिति सकलं समञ्जसम् ।

Colophon :

इति सायणमाधवविरचिते सर्वदर्शनसंग्रहे सकलदर्शनशिरोऽलङ्कारत्नं श्रीमच्छाङ्करदर्शनम् ।

इति सर्वदर्शनसंग्रहः सम्पूर्णः ।

आलोच्य पूर्वतरशास्त्रकरप्रबन्धान्
श्रीमाधवेन रचितेऽखिलशास्त्रसारे ।
आलोक्य कौतुकविशेषमपास्तगर्वा
दृष्ट्वा प्रहर्षभरिताः सुधियो भवन्तु ॥

श्रीनृसिंहाय नमः । श्रीहयमुखाय नमः । श्रीसरस्वत्यै नमः । शुभमस्तु ॥

Author—Sāyaṇamādhava.

Remarks—The work is printed along with a commentary in B O R I. The author was the brother of Sāyaṇa, the famous commentator on vedas. Prof. Macdonnel attributes the date of the author to the 14th century.

॥ सर्वसिद्धान्तसंग्रहः ॥

645. SARVASIDDĀNTASAṄGRAHA.

Substance—Palm leaf. Size—15″×1¾″. Leaves—12. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—320. Incomplete.

Subject—Same as No. 644.

Beginning :

.... दृष्टं ब्रुवते कथम् ।
नित्यादृष्टं कथं सत् स्याच्छशशृङ्गादिसन्निभम् ॥
न कल्प्यौ सुखदुःखाभ्यां धर्माधर्मौ परैरिह ।
स्वभावेन सुखी दुःखी जनोऽन्यस्मैव कारणम् ॥
शिखिनश्चित्रयेत् को वा कोकिलान् कः प्रकूजयेत् ।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम् ॥

स्थूलोऽहं तरुणो वृद्धो युवेत्यादिविशेषणैः ।
विशिष्टो देह एवात्मा न ततोऽन्यो विलक्षणः ॥

End :

निर्हारी सङ्गतः स्निग्धो रूक्षो विशद एव च ।
एवं नवविधो ज्ञेयः पार्थिवो गन्धविस्तरः ॥

मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ।
एवं षड्विधविस्तारो रसो वारिमयो मतः ॥

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतो निषधश्चैव सप्तैते शब्दजा गुणाः ॥

उष्णः शीतः सुखो दुःखः स्निग्धो ....

....

Colophon:

इति सर्वसिद्धान्तसंग्रहे पतञ्जलिपक्षो नवमः ॥

Author—Śaṅkarācārya.

Remarks—Five leaves are wanting in the beginning. The Ms. commences from the 3rd verse in the section dealing with the materialistic theory and ends with the 43rd verse bearing upon Vedavyāsa's view on it. The work is printed at Śrīraṅgam.

॥ सर्वसिद्धान्तसंग्रहः ॥

646. SARVASIDDHĀNTASAṄGRAHA.

Substance—Palm leaf. Size—14½″ × 1¼″. Leaves—11. 6—7 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas —300. Incomplete.

Subject—Same as No. 644.

Beginning —End — Author— Colophon— Same as No. 645. Saṅkarāchārya.

Remarks—A gap is seen at the beginning of this Ms. It is much damaged. For further information see No. 645.

—∞—

॥ सर्वसिद्धान्तसंग्रहः ॥

647. SARVASIDDHĀNTASAṄGRAHA.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—20. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas —550. Complete.

Subject—Same as No. 644.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

वादिभिर्दर्शनैः सर्वैर्दृश्यते यस्त्वनेकवत्।

वेदान्तवेद्यं तं रुद्रमेकरूपमुपास्महे ॥

अङ्गोपाङ्गोपवेदाः स्युर्वेदस्यैवोपकारकाः ।
धर्मार्थकाममोक्षाणामाश्र(याः स्युश्च)तुर्दश ॥
वेदाङ्गानि षडेतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्योतिषं कल्पं छन्दोविचितिरित्यपि ॥

End :

निद्रा क्षुधा तृषा ज्ञेया मैथुनालस्यमग्निजाः ।
प्रचालः स्तरणारोहौ वा(यू?यो)रुत्थानरोधने ॥
कामक्रोधौ लोभभये मोहो व्योमगुणाः स्मृताः ।
उक्तोऽवधृतमार्गश्च कृष्णेनैवोद्धवं प्रति ।
श्रीभागवतसंज्ञे तु पुराणे दृश्यते हि सः ।
सर्वदर्शनसिद्धान्तान् वेदान्तोक्तानिमान् क्रमात् ।
श्रुत्वार्थवित् सुसंक्षिप्तांस्तत्वतः पण्डितो भुवि ।

Colophon :

शङ्कराचार्यरचिते सर्वसिद्धान्तसंग्रहे ।
वेदान्तपक्ष एवायं यस्मिन् पक्षाः प्रकीर्तिताः ॥
शुभमस्तु ।

Author—Same as No. 645. Śaṅkarācārya.

॥ संक्षेपशारीरकम् ॥

648. SAMKṢEPAŚĀRĪRAKAM.

Substance—Palm leaf. Size—15″ × 2″. Leaves—51. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Subject—A compendium of the Śārīrakasūtras.

Beginning:

अनृतजडविरोधिरूपमन्त-
त्रयमलवन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरोरः
परमपदं प्रणयादभिष्टवीमि ॥

स्वाज्ञानकल्पितजगत्परमेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥

End :

सोपाधीश्वरतन्निषेधनपरा सा नेति नेति श्रुतिः
साक्षाद् भागवतं निरस्तनिखिलोपाधिस्वभावं पुनः ।
विश्वैश्वर्यमिहोच्यमानमधुना मोक्षे ततस्तत्परै-
र्वाक्यैरस्य विरु... ... ... ॥

Colophon :

इति श्रीवेदेश्वरपूज्यपादशिष्यस्य श्रीसर्वज्ञात्मनः कृतौ शारीरकप्रकरणवार्तिके संक्षेपशारीरके प्रथमोऽध्यायः ।

Author—Śrī Sarvajñātmamuni, disciple of Vedeśvara.

Remarks—The Ms. comes to a close with verse 163 in the 3rd chapter. It is printed as No. 4 in BSS. The work in full comprises four chapters explaining briefly the

principles of Advaita Vedānta as expounded in the Śārīrakabhāṣya of Śaṅkarācārya.

॥ सांख्यतत्त्वकौमुदी ॥

649. SĀṄKHYATATTVAKAUMUDI.

Substance—Palm leaf. Size—9″ × 1¼″. Leaves—45. 6 lines per page and 36 letters per line. Script—Malayāḷam No. of Granthas—600.

Subject—A disquisition upon the doctrines of the Sāṅkhya system.

Beginning:

नमो निखिलकल्याणनिदानाङ्कुरहेतवे ।
देवीशबलदेहाय देवाय परमात्मने ॥

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां नमामः ।
अजा ह्येते जुषमाणा भजन्ते
जहात्येनां भुक्तभोगां नुमस्तान् ॥ १

कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैतान् नमस्यामः ॥

इह खलु प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयितावधेयवचनो भवति प्रेक्षावताम् ।

End :

तस्मादाचार्येण त्रिगुणादिविपर्ययाद् इति वदता संहतः परो विवक्षितः । स चात्मेति सिद्धम् । इतश्च पुरुषोऽस्ति "अधिष्ठानात् " त्रिगुणात्मकानामधिष्ठीयमानत्वात् । यद्यत् सुखदुःखमोहात्मकं तत् सर्वं परेणाधिष्ठीयमानं दृष्टम् । यथा रथादिर्यन्त्रादिभिः । सुखदुःखमोहात्मकं चेदं बुद्ध्यादि । तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आ... ... .

Colophon :

Author—Vācaspatimiśra.

Remarks—The beginning and end of the Ms. do not keep in with its central theme. The leaves are much rotten. It is printed in Benares.

(उपदेश-) साहस्री (विवरणोपेता) ॥

650. SĀHASRĪ
with Vivaraṇa.

Substance—Palm leaf. Size—$19\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves—141. 8—11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4400.

Subject—The essence of all the Upaniṣads.

Beginning :

... ... न्तत्वेन सुखहेतुते .... भावः । सौगतास्तु

सर्वज्ञमीश्वरं स्वरस ...णमपि .... तो ... स्वप्रणयिता.... द्व्यवहारनिर्वाहकमाहुस्तान् प्रत्याहाव्ययभजयमिति । नहि परस्य स्वतो जनिविनाशौ हेतूपादानस्य आदिवो? व्यर्थापातात् सत्ताकाले तदभावात् तत्काले च स्वयमभावात् । स्वतस्सिध्यतोश्च तयोः स्वप्रकाशवस्तुमात्रत्वापत्तेः । न च तौ परतः सिध्यतः । परेणासम्बन्धात् । आद्यन्तविकारव्यामेधेन तदन्तर्वर्तिसर्वविकारव्यामेधः ।

End :

समं तु तस्मान् सततं विभातवद्यस्माद्विमुक्तं सदसद्विकल्पितात् ।
निरीक्ष्य युक्त्या श्रुतितश्च .....॥
.....।
... . मेवेति तस्मात् यस्मान्न निरुक्तगोचरं सततं सर्वदा विभातवद् भारूपमित्यर्थः । कथं समत्वं कथं सर्व ... ...
... ... विविधं विकल्पितायां(दि?मि)त्यर्थः । तस्मात् समं सर्वदा भारूपं च यस्मादेवं सर्वदोषरहितमात्मतत्त्वं, तस्मादेतत्
प ... ... वणमननाभ्यां बुद्धिमान् विविक्तपदार्थोऽशेषनिर्वाणमज्ञानतत्कार्यनिवृत्ति .....
... ...
द्रव्यमाप्नोति तथा ज्ञानतत्कार्यश्च ... ...

Colophon :

इति पार्थिवप्रकरणम् ।
इति चैतन्यप्रकरणं समाप्तम् ।

Author—Text—Śaṅkarācārya.
Com : Ānandagiri.

Remarks—This Ms. contains a fragment of *praka-*

rana granthas. It is interrupted by several gaps in its course. The names of the author and the commentary are furnished by the colophon in No. 651.

(उपपेक्षे॥ साहस्री (विवरणोपेता) ॥

651. SĀHASRĪ
with Vivaraṇa.

Substance—Palm leaf. Size—19″ × 2″. Leaves—118. 11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—5050. Complete.

Subject—Same as No. 650.

Beginning:

श्रीगणपतये नमः ।

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥

ॐ ।

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत् सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

चेतनमेव चैतन्यं ज्ञप्तिस्वरूपम् । सर्वगं स्वाविद्याकल्पित-तदिकालाकाशादि सर्वं व्याप्नोतीति सर्वगम् । सर्वगमित्युक्ते परमार्थतः सर्वं तद्व्यमस्तीति आशङ्का मा भूदित्याह—सर्वमिति । अविद्याकल्पितस्य स्वतोऽन्यत्वानुपपत्तेः । सर्व-

भूतगुहाशयं सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां गुहासु बुद्धिषु साक्षितया स्वाभासद्वारेण शेत इति यदेवंलक्षणं सर्वविषयातीतं परमार्थतोऽविद्यातत्कार्यरहितं सर्वं वेत्तीति सर्ववित् । स्वाभासाविद्याद्वारेण तस्मै सर्वविदे नमः ।

End:

किञ्च यदि कश्चिदनात्मा नाम पदार्थः स्यात्तदा तत्कृतं प्रियमप्रियं वा सम्भाव्येत । न त्वनात्मास्ति सर्वात्मत्वान्ममेत्यनुसन्दध्यादित्याह— अनात्मेति । परमत्वमबाधितत्वं हेतुस्तत्कृताप्रियाप्रिययोरप्राप्ताविति शेषः । विशेषतयात्मनोऽद्वयत्वविषयाणि द्वयस्यासत्वार्थानि च सर्वाण्युपनिषद्वाक्यानि पौनःपुन्येनालोचयितव्यानीत्याह — आनन्देति । अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्त्यर्थः ।

Colophon :

परिसंख्यानप्रकरणं तृतीयम् ।

उपदेशसहस्रीयं पद्यगद्यमयी मया ।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये ॥
व्याक्रियासत्क्रिया सेयं कुर्वन्ती शर्म निर्मलम् ।
कृतिनां कृतविद्यानामाश्रिता पुरुषोत्तमम् ॥

शुभमस्तु ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानकृता सहस्रटीका समाप्ता ।

Author—Same as No. 650.

Remarks—The Ms. is in good condition. The

first two leaves are left blank. The following verses from a different work are seen at the beginning :

"प्रयुज्य तृष्णाज्वरनाशकारणं
चिकित्सितं ज्ञानविरागभेषजम् ।
न याति कामज्वरसन्निपातजां
शरीरमालाशतयोगदुःखिताम् ॥

अहं ममेति त्वमनर्थभीहसे परार्थमिच्छन्ति तवान्य ईहितः ।
न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततश्च युक्तः शम एव ते नमः ॥

यतो न चान्यः परमात् सनातनात्
सदैव तृप्तोऽहमतो न मेऽर्थितः ।
सदैव मुक्तश्च न कामये हितं
यतस्व चेतः प्रशमाय तेऽधिकम् ॥

षड्भिर्मिलास्वतिवृत्त एव स
स एव चात्मा जगतश्च न श्रुतेः ।
प्रमाणतश्चापि मया प्रवेद्यते
मुधैव तस्माच्च मनस्तवेहितम् ॥

त्वयि प्रशान्ते नहि सास्ति भेदधी-
र्यतो जगन्मोहमुपैति मायया ।
ग्रहो हि मायाप्रभवस्य कारणं
ग्रहाद्विमोके न हि सास्ति कस्यचित् ॥

न मेऽस्ति मोहस्तव चेष्टितेन हि
प्रबुद्धतत्त्वस्त्वसितो ह्यनिक्रियः ।

न पूर्वतत्त्वोत्तरभेदता हि नो
वृथैव तस्माच्च मनःस्ववेहि तम् ॥

यतश्च नित्योऽहमतश्च नान्यथा
विकारयोगे हि भवेदनित्यता ।
सदा प्रभातोऽहमतो हि चाद्वयो
विकल्पितं चाप्यसदित्यवस्थितम् ॥

अभावरूपं त्वमसीह हे मनो
निरीक्ष्यमाणे नहि युक्तितोऽस्तिता ।
सतो ह्यनाशादसतो ह्यजन्मतो-
ऽद्वयं च ते तत्त्व नास्ति नेष्यते ॥

द्रष्टा च दृश्यं च तथा च दर्शनं
भ्रमः स सर्वस्तव कल्पितो ह्ययम् ।
दृशेश्च भिन्नं नहि दृश्यमीक्ष्यते
स्वप्नान्निबोधे च तथा न भिद्यते ॥

विकल्पना चापि तथाद्वया भवे-
दवस्तुयोगात्तदलातचक्रवत् ।
न शक्तिभेदोऽस्ति यतो न चात्मनां
ततोऽद्वयत्वं श्रुतितोऽवसीयते ॥

मिथश्च भिन्ना यदि ते हि चेतनाः
क्षयस्तु तेषां परिमाणयोगतः ।
ध्रुवो भवेद्भेदवता हि दृष्टतो
जगत्क्षयश्चापि समस्तमोक्षतः ॥

न मेऽस्ति कश्चिन्न च सोऽस्ति कस्यचि-
द्यतोऽद्वयोऽहं नहि चास्ति कल्पितम् ।
अकल्पितश्चास्मि पुरा प्रसिद्धतो
विकल्पनायाद्वयमेव कल्पितम् ॥"

(उपदेश)। साहस्री (विवरणयुता) ॥

652. SĀHASRĪ
with Vivaraṇa.

Substance—Palm leaf. Size—15″ × 1⅞″. Leaves—192. 9—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5500. Complete.

Subject—Same as No. 650.

Beginning—End—Colophon—Same as No. 651.

Author—Same as No. 650.

Remarks—The last two leaves are left unwritten.

(उपदेश)। साहस्री ॥

653. SĀHASRĪ.

Substance—Palm leaf. Size—22″ × 2″. Leaves—14. 12 lines per page and 100 letters per line. Script—Malayāḷam. No. of Granthas—1000,

Subject—Same as No. 650.

Beginning :

श्रीगणपतये नमः । ओम् ।

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्... ... ... सर्वविदे नमः ॥

समाप्य क्रियाः सर्वा दारान्याधानपूर्विकाः ।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ।
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ॥

धर्माधर्मौ ततोऽजस्य देहो ... ... पुनः ।
एवं नित्यप्रवृत्तोऽयं संसार.....वद् भृशम् ॥

End :

यापि शरीरेन्द्रियादिसंस्थानमात्रमुपलभ्य मद्भक्तानां विपरीतानां च प्रियादिप्रयुयुक्षा, तज्जा च धर्माधर्मादिप्राप्तिः, सा तेषामेव, न तु मय्यजेऽजरेऽमृतेऽभये । नैनं कृताकृते तपतो(?) न वर्धते कर्मणा नो कनीयान् बाह्याभ्यन्तरो ह्यजो न लिप्यते लोकदुःखेन बाह्य इत्यादिश्रुतिभ्योऽनात्मवस्तुनश्चासत्त्वादिति परमो हेतुरात्मनश्चाद्वयत्वेऽद्वयस्यासत्त्वार्थानि सर्वाण्युपनिषद्वाक्यानीनि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकगोविन्दभगवत्पूज्यपादशिष्यस्य शङ्करभगवत्पादाचार्यस्य कृतौ श्रीसाहस्री समाप्ता ।

व्यक्ताव्यक्तगुणेतरं च वरदं पञ्चविंशतत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परं
शान्तं पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥

(शं)करस्य तु ये भक्ताः शान्तास्तद्गतमानसाः ।
तेषां दासस्य दासोऽहं भवे जन्मनि जन्मनि ॥

यस्मान्नास्ति परं किञ्चिदपरं चेति सन्ततम् ।
गृणन्त्युपनिषत्सङ्घास्तं वन्दे देवकीसुतम् ॥

व्योमादीनां तु भूतानां पञ्चानां जन्मभूमये ।
तत्त्वानां परतत्त्वाय महसां महसे नमः ॥

Author—Śaṅkarācārya.

Remarks—The edges of the Ms. are much damaged.

॥ सिद्धान्तदीपः (संक्षेपशारीरकव्याख्या) ॥

654. SIDDHĀNTADĪPA.

Commentary on Samkṣepaśārīraka.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—149. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5600. Complete.

Subject—Same as No. 573.

Beginning :

श्रीगणपतये नमः ।

यस्मादर्थचतुष्टयं त्रिजगतामव्याहतं वर्तते
पित्रोराद्यकुटुम्बिनोः सदयितालोक्या च या सन्ततिः ।
युद्धे त्रैपुर एव यस्य विहितं स्वातन्त्र्यमव्याहतं
श्रीमद्वोडुविनायकः स दिशताद् दिव्यान्यभीष्टानि नः ॥

यद्वाग्वज्रनिपातरुग्णगतयो वादीन्द्रशैला मुहु-
र्यत्पादाम्बुजरेणवः प्रतिगता निर्वाणपाथेयताम् ।
यं चासाद्य समाश्रयं गुणगणैः सम्मान्यमासादितं
तान् नित्यं प्रणतोऽस्मि पूर्णकरुणानानन्दवेदान् गुरून् ॥

या जाया जगदीशितुर्जनिमतामम्बा समस्तस्य या
सत्तास्फूर्तिकरी चितिस्त्वविषयस्तत्त्वं च यद्गोचरे ।
आदिक्षान्तसुवर्णवर्णरचितप्रौढाङ्गयष्टिं मुदा
मज्जिह्वामणिमन्दिरे शुभपदैर्नर्नर्त्तु सा भारती ॥

End :

ग्रन्थस्य साम्प्रदायिकत्वं दर्शयितुं गुरोः कर्तुश्च नाम निर्दिशति कालविशेषं च—श्रीदेवेश्वरेति। अन्तेऽपि भगवन्नमस्कारलक्षणं(मङ्ग)-लमाचरति—भुजङ्गमाङ्गेति ।

सर्वज्ञात्सर्वशक्तेर्यत इदमखिलं नैकधातूदभूत ?
व्योम्नि शुभ्रे यथा खे पवनजलमुगाडम्बरः सुप्रशान्ते ।
वेद्यं यद्वेदसारप्रणिहितमनसां शान्तमायाविलासं
पूर्णं तं सच्चिदात्माद्वयसुखवपुषं माधवं संश्रयामः ॥

यदीयपादाब्जसमाश्रयान्नो
विलीयते मोह उदेति बोधः ।

सच्चित्सुखं मुक्तिपदं प्रयाता-
स्तेभ्योऽपि मच्चित्तमलं पुनातु ॥
या सा शम्भोश्चिन्मयी शक्तिराद्या
ज्योन्स्नेवेन्दोरुन्नता वा यथाग्नेः ।
प्रीत्यै तस्याः कल्पितोऽयं भवान्या
न्यायोदर्चिर्भातु सिद्धान्तदीपः ॥

इत्यानन्दवेदशिष्यविश्ववेदविरचिते संक्षेपशारीरक-व्याख्याने चतुर्थोऽध्यायः समाप्तः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः । श्रीकृष्णाय नमः । केरललिखितमिदं पुस्तकम् । नमश्शिवाय ।

Author—Viśvaveda.

Remarks—The author was a disciple of Ānandaveda.

॥ सिद्धान्तपञ्जरम् (केरलभाषाव्याख्योपेतम्) ॥

655. SIDDHĀNTAPAÑJARAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—13″ × 2″. Leaves—96. 6—9 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—1800. Complete.

Subject—Exposition of the means of attaining salvation.

Beginning :

गणपतये नमः । अविघ्नमस्तु ।

विश्वात्मनावतीर्णेन राघवानन्दयोगिना ।
मदीयचित्तरङ्गेऽस्मिन् नृत्तलीला विधीयताम् ॥

राघवानन्दयोगिना अस्मिन् मदीयचित्तरङ्गे नृत्तलीला विधीयताम् ।

രാഘവാനന്ദയോഗിയാൽ മദീയമായിരുക്കിൻറള്ള ചിത്ത രംഗത്തിങ്കൽ നൃത്തലീലാ ചെയ്യപ്പെട്ടവൃതാക, അങ്ങിനേയിരുന്നൊരുത്തൻ രാഘവാനന്ദയോഗീ, വിശ്വാത്മനാഅവതീർണ്ണനായിരുന്നൊരുത്തൻ സർവ്വാത്മാവായി അവതരിച്ചിരുന്നൊരുത്തൻ ഇവണ്ണം ഗുരുവിനേ നമസ്കരിച്ചു.

End :

सिद्धान्तपञ्जरं शास्त्रमेतत् केरलवर्मणः ।
सन्निधौ मटिकेन्द्रस्य विघ्नराजमुखोदितम् ॥

एतत् सिद्धान्तपञ्जरं शास्त्रं मटिकेन्द्रस्य केरलवर्मणः सन्निधौ विघ्नराजमुखोदितम् ।

ഇസ്സിദ്ധാന്തപഞ്ജരമായിരിക്കിൻറ ശാസ്ത്രം മടികേന്ദ്രനായിരിക്കുന്ന കോളവമ്മൻറേറ സന്നിധിയിങ്കൽ വിഘ്നരാജൻറേറ മുഖത്തിങ്കൽ നിൻറുദിത.....

Colophon :

इत्यष्टमोपदेशः ।

Author—Vighnaraja.

Remarks—The Ms. is damaged.

॥ सिद्धान्तपञ्जरम् (केरलभाषाव्याख्योपेतम्) ॥

656 A. SIDDHĀNTAPAÑJARAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—14½" × ½". Leaves—15. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—375. Incomplete.

Subject—Same as No. 655.

Beginning :

... ...मग्नं जगत् सर्वं चराचरम् ।
तथापि तन्न जानन्ति मायाव्यामोहिता जनाः ॥

चराचरं जगत् सर्वं आत्मवारिधौ मग्नं

ചരാചരമായിരിക്കിൻറ ജഗത്തൊട്ടൊഴിയാതെ ആത്മാവായിരിക്കിൻറ വാരിധിയിങ്കൽ മഗ്നമായിരുന്നാൻറു് तथा अपि मायाव्यामोहिताः तत् न जानन्ति । അവ്വണ്ണമിരിക്കിൻറു താകിലും മായാവ്യാമോഹിതന്മാരായിരിക്കിൻറ ജനങ്ങളിതിനെ അറിയിൻറാരല്ല.

End :

यत् अज्ञात्वा परित्यक्तं तत् त्यक्तेऽपि न त्यक्तमेव ।

യാതൊൻററിയാതെ ത്യജിക്കപ്പെട്ടത. ആത ത്യക്തമായിരിക്കിൻ വിഷയത്തിങ്കലും. ത്യജിക്കപ്പെട്ടിലേ. यत् इदमित्थमिति ज्ञात्वा तस्मात् मायास्वरूपं च ब्रूहि । എടോ കാരുണ്യവിഗ്രഹനായിരുന്നാല്ലേ യിൻറാൽ മായാസ്വരൂപത്തെയും അരുളിച്ചൊല്ലുവേണം. ശിഷ്യനോടു ചോദിക്കപ്പെട്ടി

രിക്കിൻറ വിഷയത്തിങ്കൽ ഗുരു മായയുടേ സ്വരൂപത്തേ കാട്ടി ൻെറാൻ. അവിടേ स्वाङ्गभूतेषु भावेषु भेदः प्रथमा या എൻറിപ്പണ്ണം ദർപ്പണകാരരാൽ ഉപപാദിക്കപ്പെട്ടിരിക്കി ൻറ മായയുടേ സ്വരൂപത്തെക്കാട്ടിൻെറാൻ स्वाङ्गभूतेषु भावेषु ।

Colophon :

इति तृतीयोपदेशः ।

Author—Same as No. 655. Vighnarāja

Remarks—15 leaves at the beginning of the Ms. are missing.

॥ अध्यात्मचिन्ता ॥

656 B. ADHYĀTMACINTĀ.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—8. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—A disquisition on the reality of soul.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

नमोऽस्त्वस्मद्गुरुभ्यश्च तद्गुरुभ्यस्तथा नमः ।
परमेभ्यो गुरुभ्यश्च निखिलेभ्यो नमो नमः ॥
नमो रामानुजायेदं पूर्णाय महते नमः ।
यामुनाय मुनीन्द्राय नमः सर्वात्मवेदिने ॥
नमोऽस्तु राममित्राय पुण्डरीकदृशे नमः ।

(य?ना)थाय मुनये नित्यं नमः परमयोगिने ।
आद्याय कुलनाथाय नमोऽस्तु शठवैरिणे ।
नमः सेनाधिपतये ज्ञानयाथात्म्यदायिने ।
श्रियै श्रीशान(चा?पा)यिन्यै जगन्मात्रे नमो नमः ।
श्रीधरायादिगुरवे नमो भूयो नमो नमः ।
इत्थं सञ्चिन्त्य मनसा शुभां गुरुपरम्पराम् ।
अध्यात्मविषयां चिन्तां करोम्यात्मविशुद्धये ॥

End:

सौम्यजामातृमुनिना सम्यग् दृष्टामिमां सदा ।
चिन्तामध्यात्मविषयां यश्चिन्वन् भवेत्सुखी ॥
हस्तद्विधपरित्राणप्रयत्नप्रद्राणमानसम् (?) ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ।

Colophon :

इयं सप्तर्षिनाथेन कावेरीतीरवासिना ।
लिखितं ग्रन्थका कण्ठे क्षन्तुमर्हन्ति साधवः(?) ॥

Author—Saumyajāmātṛmuni.

Remarks—The author may probably be identified with Azhakiyamaṇavālamuni, the celebrated Vaiṣṇavamatācārya.

॥ सिद्धान्तलेशसंग्रहः ॥

657 A. SIDDHĀNTALEŚASAṄGRAHA.

Substance—Palm leaf. Size—18" × 2¼". Leaves—48. 12 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject—A compendium of the tenets bearing upon the absolutism of the Supreme Spirit.

Beginning:

हरिः ॐ । ज्ञानाम्बिकायै नमः ।

अधिगतभिदापूर्वाचार्या(र)नषेत्य (?) सहस्रधा
सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरिणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥
प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं
सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह संग्रहेण कतिचित्सिद्धान्तभेदा...यः
शुद्ध्यै सङ्कलयामि तातचरणव्याख्यावचःख्यापितान् ॥
तेषूपपादनापेक्षान्... ...प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम् ॥

तत्रात्मा वा अरे द्रष्टव्यः श्रोतव्यः इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मात्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः किंविध इति चिन्त्यते। तिस्रः खलु विधेर्विधाः । अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति ।

End:

नहि पापजननप्रतिबन्धिका शक्तिः संसारपरिभ्रमणदशायां पापानुत्पत्त्यर्थं कल्पनीया । तदानीं तदुत्पत्तेरिष्टत्वात् विद्योदयप्रभृति विद्यामाहात्म्यादेवाश्लेषः तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्दर्शनादिति सूत्रेण दर्शितः । तत एवमुक्तावश्लेष उत्पद्यत इति व्यर्था शक्तिकल्पना । तस्मादुक्तश्रुतिसू-

त्रानुषारिभिर्मुक्तजीवानां यावत् सर्वमुक्तिवस्तुत्वं चैतन्यमात्रता-
विरोधिबद्धपुरुषाविद्याकृतनिरवग्रहैश्वर्यतदनुगुणकलापविशिष्टनिर-
तिशयानन्दस्फुरणसमृद्धनिस्सन्धिबन्धपरमेश्वरभावापत्तिरादर्तव्येति
सिद्धम् ।

Colophon :

इति वेदान्तशास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थपरिच्छेदः
समाप्तः ।

कल्याणमावहतु वः शिवयोः शरीर-
मेकं यदीयमसितच्छविकर्णमूलम् ।
वामेतरेऽपि कुरुते स्त्रि भसिभागे (?)
प्रालेयशैलतनयापरिणामशङ्काम् ॥

श्रीवञ्चिभूभृत्कुलभूषणस्य
श्रीरामवर्मक्षितिपालकस्य ।
कृपाम्बुराशेरनुशासनेन
सिद्धान्तलेशो लिखितो मयायम् ॥

Author—Appayyadikṣita.

Remarks—This Ms. comprises four *paricchedas*. It is available in print in Advaita Series, Kumbhakonam. For further information see p. 645 C. C .

॥ आत्मज्ञानप्रकरणम् ॥

657 B. ATMAJÑĀNAPRAKARAṆAM.

Substance—Palm leaf. Size—18" × 2¼". Leaves—2.

10 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—65.

Subject—Self-realisation.

Beginning:

.....वितृप्रकाशवद् आकाशादिभूतरहितो बुद्ध्या... प्राणादिवायुभेदरहितः.....शरीरधर्मरहितो यः सर्वप्राणिहृदिस्थितः स बुद्धेर्द्रष्टा आत्मेत्युच्यते ।

End:

एष आत्मज्ञानोपदेशविधिः । एवं ज्ञात्वा कृतकृत्यो भवति नान्यथेति । एवं वेदान्तानुशासनं वेदान्तानुशासनम् ।

Colophon:

इति चतुर्थः खण्डः ।

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ आत्मज्ञानाख्यं प्रकरणं समाप्तम् ।

Author—Sankaracarya.

Remarks—The whole Ms. encases only one Khanda out of four in the original. The work is available in print at the Vāṇī Vilas Press, Śrirangam. The opening leaf is numbered 65. This is evidently a continuation of another Ms.

॥ वाक्यवृत्तिः ॥

657 C. VĀKYAVṚTTI.

Substance—Palm leaf. Size—18″ × 2¼″. Leaf—1. 12 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—55. Complete.

Subject etc. Same as No. 622.

॥ हस्तामलकप्रकरणम् ॥

657 D. HASTĀMALAKAPRAKARAṆAM.

Substance—Palm leaf. Size—18″ × 2¼″. Leaf—1. 10 lines per page and 53 letters per line. Script—Grantha. No. of Granthas—25. Complete.

Subject—Substantiation of the eternity of soul.

Beginning:

For 2 extra verses in the beginning see 1242-A-14. and for arrangement of verses changed 1242-A-31.

ब्रह्मणे नमः ।

निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलो(पाधिराकाशकल्पः) ।
रविर्लोकचेष्टानिमित्तं यथा यः
(स नित्योपलब्धिस्वरू)पोऽहमात्मा ॥

End:

उपाधौ यथा भेदता सन्मणीनां
तथा भेदता बुद्धिभेदेषु तेऽपि ।

यथा चन्द्रिकाणां जले चञ्चलत्वं
तथा चञ्चलत्वं नवापीह विष्णो ॥

Colophon :

इति हस्तामलकं समाप्तम् । हरिः ।

Author—Hastāmalakācārya.

Remarks—This work has been printed in Vāṇī Vilas Press, Śrīraṅgam with the Śāṅkara Bhāṣya.

॥ श्रुतिसारसमुद्धरणम् ॥

657 E. ŚRUTISĀRASAMUDDHARAṆAM.

Substance—Palm leaf. Size—18″ × 2¼″. Leaves—5. 10 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—200. Complete.

Subject—Same as No. 536.

Beginning :

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं
शक्तेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं
वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

सकलं मनसा क्रियया जनितं समवेक्ष्य विनाशितया तु जगत् ।
निरविद्यत कश्चिदतो निखिलादविनाशिकृतेन...लभ्यमिति ॥
प्रतिपित्सुरसावविनाशिपदं यतिधर्मरतो यतिमेव गुरुम् ।
विदितात्ममतत्त्वमुपेत्य कविं प्रणिपत्य निवेदितवान् स्वमतम् ॥

End :

भूः पादौ यस्य खं चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नतोऽस्मि ॥

सकलश्रुतिशिरसामनुसरणादतिनिपुणैः
परिहृत्य तु सकलं जगदतिचञ्चलमनृतम् ।
अनुमात्रबलमनुसृत्य तदुपबृंहितमतिभिः
कथमप्यनुविदितं हरिचरणं मम शरणम् ॥

Colophon :

Author—Toṭakācārya.

Remarks—This work is composed in verses of Toṭaka metre.

॥ कालोत्तरम् ॥

657 F. KĀLOTTARAM.

Substance—Palm leaf. Size—18″ × 2¼″. Leaves—3. 11—13 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—144.

Subject—An account of the customary rites pertaining to those who are desirous of attaining salvation.

Beginning :

देव्युवाच—
सर्वेषामपि मुक्त्यर्थं मुक्तिमार्गस्य निर्णयम् ।

देवेश ज्ञानमाचारं कृपया कथयस्व मे ॥
ईश्वर उवाच—
ज्ञानाचारौ वरारोहे कथयामि तवाधुना ।
प्रविशन्ति यतो मोक्षं ज्ञानिनो ध्वस्तकल्मषाः ॥
येषां बोधो न सञ्जातः कालज्ञाने वरानने ।
न तेषां जायते बोधः शास्त्रकोटिशतैरपि ॥

End :

प्रवृत्तिश्च निवृत्तिश्च ब्रह्मचर्यव्रतानि च ।
अग्निकार्यविधिर्नास्ति पतनं नाप्यधःकृतौ ॥
शिवज्ञानामृतं ज्ञात्वा विचरस्व यथासुखम् ।
शिववच्छाश्वतः शुद्धः सृष्टिधर्मविवर्जितः ॥
सत्यं सत्यं पुनः सत्यं त्रिसत्यञ्च मया कृतम् ।
अतः परतरं नास्ति विज्ञेयं कुत्रचिद् गुह ॥

Colophon :

इति श्रीकालोत्तरे नैष्ठिकाचारविचारः पञ्चषष्टि(तम)ः पटलः ।
इति सर्वज्ञानोत्तरे मोक्षोपायपटलः ।

Author :

Remarks—Two *patalas* styled Ācāravicāra and Mokṣopaya constitute this Ms. A dialogue between the God and Goddess marks its opening. The contents of the Ms. show that the work is a portion of some other voluminous treatise. The title given above is however derived from the 1st colophon noted above.

॥ पञ्चीकरणवार्त्तिकम् ॥

657 G. PAÑCĪKARAṆAVĀRTIKAM.

Substance—Palm leaf. Size—18″ × 2¼″. Leaves—2 12 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—60. Complete.

Subject—Same as No. 536.

Beginning :

श्रीगुरुभ्यो नमः ओं ॥
पञ्चीकरणवार्त्तिकम् । ओं ।
ओङ्कारः सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत् स्वमायासमावेशाद् बीजपञ्चाकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकमतथा वायुस्तेजो रूपात्मकं तथा ॥

End:

आनन्दमचलं शुद्धं मनोवाक्कायगोचरम् ।
वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ॥
प्रज्ञानघनमद्वैतं वैष्णवं पदमश्नुते ।
इदं प्रकरणं यत्नाद् ज्ञातव्यं भगवत्तमैः ॥
अमानित्वादिगुणकैर्गुरुभक्तिप्रसादतः ।
श्रीकृष्णरामपादानां शिष्येण रचिता मया ॥
अन्तरारामयतिना ब्रह्मवित्प्रवरेण तु ।

वेदशास्त्रेषु निर्णीता व्यासादिगुरुसम्मता ॥
निःश्रेयसे मुमुक्षूणां समाधिप्राक्रियादरात् ।

Colophon :

इति पञ्चीकरणवार्त्तिकं सम्पूर्णम् ॥

Author—Antarātmāmayati, disciple of Śrī Kṛṣṇa-rāmapāda.

Remarks—The work aims at giving a versified account of the Supreme Being and the origin of the universe.

॥ ज्ञानाङ्कुशम् ॥

657 H. JÑĀNAṄKUŚA.

Substance—Palm leaf. Size—18" × 2¼". Leaves—2. 12 lines per page and 64 letters per line. Script —Grantha. No. of Granthas—60. Complete.

Subject—The possibility of concentrating the mind by means of knowledge.

Beginning :

सरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।
महात्मनां सत्त्ववशाद् व्यवस्थिति-
र्दृढा परिज्ञानसमाहितात्मनाम् ।
परापचारेषु तु मा(तृ?द)गात्मनः
समानयेत् कल्पनया नयाङ्कुशम् ॥

यथा ममात्मप्रियसम्पदुद्यमस्तथा परेषामथवा विशेषतः ।
अवाप्नुयुश्चेन्मदभिग्रहात् प्रियं न ते चरेयुः कथमात्मनः प्रियम् ॥
न मेऽपराधः किमकारणे नृणां
मदभ्यसूयेत्यपि नैव चिन्तयेत् ।
न यत्कृता प्राग्भवबन्धनिस्मृति-
स्ततोऽपराधः परमोऽनुचिन्त्यताम् ॥
अयं जनः कर्मवशाद् विलक्षणः
प्रसूतिविद्याभिनिवेशकर्मभिः ।
किमत्र चित्रं यदि युक्तमाचरेत्
प्रसूतिविद्याभिनिवेशकर्मणाम् ॥

End :

मन्निन्दया यदि जनः परितोषमेति
नन्वप्रयत्नजनितोऽयमनुग्रहो मे ।
श्रेयोर्थिनो हि पुरुषाः परतुष्टिहेतो-
र्दुःखार्जितान्यपि धनानि परित्यजन्ति ॥
शमदमनियतात्मा सर्वभूतानुकम्पी
विषयसुखविरक्तो ज्ञानतृप्तः प्रशान्तः ।
अनियतनियतान्नो नैव रुष्टो न हृष्टः
प्रवसितभवे देहे वर्त्तते यः स मुक्तः ॥
सर्वतः परिधावन्तं मनोमत्तमतङ्गजम् ।
ज्ञानाङ्कुशवशं कृत्वा पुनः पन्थानमानयेत् ॥

Colophon :

इति ज्ञानाङ्कुशः सम्पूर्णः ।

Author :

Remarks—The work shows that the mind could be controlled by the practice of Śama, Dama etc. Certain verses from a different work are quoted towards the end the first of which is given below :

"भवितव्यमविच्छेदेऽस्मिन् सांसारिके विभूतिलवे ।
विमृशद्भिर्मतिमद्भिर्गहनं संसारचक्रमविवर्धम् ॥"

॥ हस्तामलकप्रकरणम् ॥

658. HASTĀMALAKAPRAKARAṆAM.

Substance—Palm leaf. Size—3½" × 1". Leaves—4. 8 lines per page and 10 letters per line. Script —Malayāḷam. No. of Granthas—25.

Subject—Beginning — End—Colophon — Author— Same as No. 657 D.

Remarks—The Ms. opens with the letter-numerals "सद्वे" (49) and comes to a close with "वन्य". (53).

॥ हस्तामलकप्रकरणम् (सभाष्यम्) ॥

659. HASTĀMALAKAPRAKARAṆAM with Bhāṣyam.

Substance—Palm leaf. Size—14" × 2". Leaves—9. 11 lines per page and 54 letters per line. Script —Malayāḷam. No. of Granthas—350,

Subject—Same as No. 657 D.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्मिन् ज्ञाते भवेत् सर्वं विज्ञातं परमात्मनि ।
तं वन्दे नित्यविज्ञानमानन्दमजमव्ययम् ॥ १ ॥
यदज्ञानाद्भवेद् द्वैतं ज्ञाते यस्मिन् निवर्तते ।
रज्जुसर्पवदत्यन्तं तं वन्दे पुरुषोत्तमम् ॥ २ ॥
यस्योपदेशदीधित्या चिदात्मा नः प्रकाशते ।
नमः सद्गुरवे तस्मै स्वाविद्याध्वान्तभानवे ॥ ३ ॥

इह हि सर्वस्य जन्तोः सुखं मे भूयाद् दुःखं मे मा भूयादिति स्वरसत एव सुखोपादित्सादुःखजिहासे भवतः ।

End :

निर्मलितानां जले प्रतिबिम्बितस्वरूपेण दृश्यमानानां जलस्य चञ्चलत्वाच्चञ्चलत्वमौपाधिकं न पारमार्थिकं, तथा बुद्धीनां चञ्चलत्वात् तवापि चञ्चलत्वमौपाधिकं न पारमार्थिकमित्यर्थः । इह बुद्धिषु हे महाविष्णो ।

Colophon :

इति श्रीशङ्करभगवत्पादकृतं हस्तामलकभाष्यं समाप्तम् ।
शुभमस्तु ।

Author—Text—Hastāmalakācārya.
Com : Śaṅkarācārya.

Remarks—The work is printed in N. S. Press, Bombay.

———

॥ मीमांसा ॥

॥ अध्वरमीमांसाकुतूहलवृत्तिः ॥

660. ADHVARAMĪMĀMSĀKUTŪHALAVṚTTI.

Substance—Palm leaf. Size—18″ × 2″. Leaves—348. 9—12 lines per page and 60 letters per line. Script—Grantha. No. of Granthas—13750.

Subject—Simple and elucidative exposition of the sūtras of Jaimini.

Beginning:

प्रकृतिवद् विकृतिः कर्तव्येत्यतिदेशस्य इत्थं कुर्यादित्युपदेशोपजीव्यकत्वादुपदेशविचारानन्तरमतिदेशविचारः प्रस्तूयते । तदुपोद्घातत्वेनेदं चिन्त्यते—किं दर्शपूर्णमासाभ्यां स्वर्गकामो यजतेति सन्निधौ धर्मान्नानं सर्वयागार्थतया, उत दर्शपूर्णमासयागार्थतयेति । तदर्थं च...यज्युद्देशेन धर्मा विधीयन्ते, उत यजिवदपूर्वभावनया सहैव विधीयन्त इति । तत्र सिद्धान्तेनोपक्रमते—

End:

प्रयाजकृतस्तावददृष्टसंस्काराः कालान्तरेऽवतिष्ठन्ते । अग्निगुस्तु प्रवृत्तिप्रकाशनस्य च तदानीं प्रध्वस्तस्य कालान्तरे कार्यकारणत्वासम्भवादावृत्तिरग्निगोरिति सिद्धम् ।

Colophon :

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मपोडशरथचक्राकारादिबहुगुणविराजमानप्रौढापरिमितमहाध्वरस्य श्रीशाहजीशरभजितुक्कोजिभोसलचोलमहीमेहन्द्रमाल्यधुरन्धरस्य श्रीमदानन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तद्यानिर्वर्तितापरिमितमहाग्निविजृम्भितसर्वपृष्ठसर्वस्तोमाप्तोर्यामवाजपेयप्रमुखसन्तर्पितशतमखमुखबर्हिर्मुखेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविदेवेश्वरवाजपेययाजिनो लब्धविद्यावै-

शद्येन श्रीमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायामध्वरमीमांसाकुतूहलवृत्तौ एकादशाध्यायस्य चतुर्थः पादः ।

आहत्योत्तरषट्कस्य १६००० अध्यायग्रन्थसंख्या २८५० । ग्रन्थसंख्या ५५० । द्वादशस्य २१५० ।

श्रीरामार्पणमस्तु । [illegible]

Author—Vāsudeva Dīkṣita.

Remarks—This Ms. covers five chapters from the 7th to the 11th. The commentary is of invaluable service to the Mīmāmsakas, even as Bālamanoramā, a commentary on Bhaṭṭojidīkṣita's Siddhāntakaumudī by the same author is to grammarians.

॥ ऋजुविमला (शाबरभाष्यव्याख्या) ॥

661. ṚJUVIMALĀ.

Commentary on Śābarabhāṣya.

Substance—Palm leaf. Size—19″ × 1⅞″. Leaves—171. 10 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—7000. Incomplete.

Subject—Exposition of Śābarasvāmin's Mīmāmsābhāṣya.

Beginning :

ओम् । अथातः शेषलक्षणम् । अत्र भाष्यं नानाकर्मलक्षणं प्रवृत्तमिति । तदनुपपन्नम् । नहि द्वितीयेऽध्याये नाना-

कर्मलक्षणं वृत्तम् । अपि तु नानाशास्त्रलक्षणमित्याशङ्क्याह— नानाकर्मलक्षणं वृत्तमिति । कर्मानुबन्धभेदाच्छास्त्रभेदः । अतः शास्त्रभेदलक्षणं वृत्तमित्यर्थः । अस्यार्थः—साध्यानुबन्धभेदाभ्यां शास्त्रभेद उक्तः । तत्सिद्ध्यर्थं चानुबन्धभूतकर्मभेदः प्रतिपादितः ।

End:

अस्यार्थः— अत्रापि त्वप्रत्ययप्रयोगतादिभिर्निवृत्तदर्शपूर्णमाससमानकर्तृकता सोमस्याप्यवगम्यमाना कृतदर्शपूर्णमास एव सोमे कर्तेत्यवगमयति । न चातथाभूतेऽधिकारीति । तथाभूतस्य कर्तृतोपपद्यत इति लब्धोऽधिकारिणि तद्बलेनैव दर्शपूर्णमासोत्तरकालता सोमस्यावगम्यत इति तुल्यतोक्ता ।

Colophon:

इति महोपाध्यायशालिकनाथमिश्रकृतायाम् ऋजुविमलायां पञ्जिकायां पञ्चमस्य चतुर्थः पादः ।

Author—Śālikanātha Miśra.

Remarks—This Ms. extends over three chapters from the 3rd to the 5th.

॥ काशिका (श्लोकवार्त्तिकव्याख्या) ॥

662. KĀŚIKĀ.

Commentary on Ślokavārtika.

Substance—Palm leaf. Size—$28\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—98. 6—9 lines per page and 112 letters per

line. Script—Malayāḷam. No. of Granthas—
—6000. Incomplete.

Subject—Elucidative exposition of Ślokavārtika.

Author—Upādhyāya Sucaritamiśra.

Remarks—This work is printed in T. S. S. as No. 90.

॥ जीवरक्षा (प्रकरणपञ्चिकान्तर्गता) ॥

663. JĪVARAKṢĀ.

Substance—Palm leaf. Size—11½" × 2". Leaves—46. 6 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—800. Complete.

Subject—The interconnection of words and their meanings in the light of Mīmāmsā philosophy.

Beginning:

अर्थसंस्पर्शिताशङ्का यथा शब्दस्य वार्यते ।
प्रभाकरगुरोः शिष्यैस्तथा यत्नो विधीयते ॥
तत्र लौकिकवाक्यानां व्यभिचारादिमानतः ।
अर्थासंस्पर्शितां (कशि ? केचि) दाहुः शब्दस्य वादिनः ॥
निश्चयोऽर्थस्य संस्पर्शः स चार्थाव्यभिचारिणः ।
प्रत्यक्षादेरिव भवच्छब्दस्तु व्यभिचारवान् ॥

End:

अत्रोच्यते—उक्तमस्माभिः यथा त... ...त्रोपलब्धिरेव

विनाश इति। तेन तस्या हेतुसद्भावात् तथैव भवितव्यम्। अनुपलब्धिरपि तस्य सैवेत्युपलब्धिरेव तस्य नोपलब्धिः। तन्निबन्धनत्वाभावव्यवहार इति सर्वमनाकुलम्।

Colophon :

सुगताशीविषविषमक्षणभङ्गविषानलावलीढायाः।
मीमांसाया विहिता तत्त्वमयी जीवरक्षेयम्॥

जीवरक्षा समाप्ता।

Author—Śālikanāthamiśra.

Remarks—This work repudiates the idea harboured by the Buddhists that all existing objects including the connection between words and their meanings are perishable. This work is a portion of Śālikanātha's Prakaraṇapañcikā.

॥ जैमिनिसूत्रार्थसंग्रहः ॥

664. JAIMINISŪTRĀRTHASAṄGRAHA.

Substance—Palm leaf. Size—19″ × 2″. Leaves—91. 10—12 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Subject—An abbreviated exposition of the Sūtras of Jaimini.

Beginning :

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

अथ प्रथमस्याध्यायस्य द्वितीये पादे प्रथममर्थवादाधिकरणम् ।

तत्राद्यपादे वेदस्य प्रामाण्ये प्रतिपादिते ।
तत्प्रकारविशेषोऽर्थवादादेरधुनोच्यते ॥

विध्युद्देशे यथा त्र्यंशभावना प्रतिभावनात् ।
प्रामाण्यं दृश्यते तद्वदर्थवादेष्वदर्शनात् ॥

किमप्रमाणमेते स्युः प्रमाणं वेति संशये ।
पूर्वपक्षं पूर्वपक्षं वक्तुं सूत्रमिदं स्मृतम् ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् इति ।

End :

उस्राणां छागानां मेषाणां मेदसोऽनुब्रूहीति जातिप्रायवचनादवयवप्रसिद्ध्या छिद्रनिमित्तत्वकल्पनातः समुदायप्रसिद्ध्यार्थान्तरवचनत्वेऽर्थवत्त्वाधिक्याच्चेत्यर्थ इति ।

तदेवं विधिवाक्यस्थपशुशब्दार्थनिर्णयः ।
मन्त्रितो मन्त्रवर्णेन छागस्येत्यमुना स्फुटम् ॥

Colophon :

इति श्रीमदृषिपुत्रपरमेश्वरविरचिते सूत्रार्थसंग्रहे षष्ठाध्यायस्याष्टमः पादः । समाप्तश्चाध्यायः ।

Author—Parameśvara, ಸಂ-ಋಷಿ.

Remarks—Only chapters 2—6 are commented upon in this Ms. Each aphorism is succinctly explained.

[मीमांसा]। तत्त्वाविर्भावः ॥

665. TATTVĀVIRBHĀVA.

Substance—Palm leaf. Size—9¼″ × 1½″. Leaves—169. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—4000. Complete.

Subject—Same as No. 664.

Beginning :

हरिः। श्रीगणपतये नमः ।

वन्दे कल्याण... ... ...

.....मवत्सुतयोरिव संगमम् ॥

आचार्यकृतिप्रकृते(रावि)र्भावाय... ... ...

....मयमिह यत्नः क्रियते सन्तः पुष्यन्तु सन्तोषम् ।

विदुषामयं प्रबन्धो दुर्जनदूष्योऽपि जायते प्रीत्यै।

किं शर्करा न मधुरा पित्तोपहतस्य तिक्तेति ।

आदौ स्वाध्यायविध्यर्थनिर्णयाय यतामहे ।

शास्त्रारम्भस्य वैधत्वप्रतिपादनसिद्धये ॥

यदि हि स्वाध्यायोऽध्येतव्य इति विधिरनध्ययनस्य स्वाध्यायसंस्कारद्वारेणार्थज्ञानसाधनत्वं बोधयतीति न प्रतिपाद्येत। तर्ह्यर्थज्ञानस्यानुष्ठानस्य वैधत्वाभावात् तदङ्गभूतं मीमांसाश्रवणमपि न वैधं स्यात् ।

End :

कर्त्राभिसामात्यापि(?) कस्यचिदेव कठादेः प्रकृष्टवचनामिति तेन प्रोक्तमिति वचननिबन्धनेनैव इति सिद्धमपौरुषेया वेदा इति ।

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रप्यस्मास्ववधीर.... ....ग्रन्थोऽयमुद्घट्यताम् ।
नो चेदुद्धततार्किक.... ....
त्तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः ॥
... ... वेश्च साधारण-
श्रीविद्यान...मेकमो... ...धवे... ....

Colophon:

... ...या श्रीचिदानन्दनामा ।
तत्त्वाविर्भावमुच्चैर्व्यधित बुधसभागेहि.... ....
तत्त्वाविर्भावः समाप्तः ।
....
विष्णुभक्तेन कृष्णेन लिखितमिदं पुस्तकम् ।

Author—Cidānanda.

Remarks—The Ms. is much damaged.

[नीति]तत्त्वाविर्भावः ॥

666. TATTVĀVIRBHĀVA.

Substance—Palm leaf. Size—19¼″ × 2″. Leaves—63. 10—14 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—4000. Complete.

Subject etc. Same as No. 664.

Remarks—This Ms. is only a copy of No. 665.

[नीलि]॥ तत्त्वाविर्भावव्याख्या ॥

667. TATTVĀVIRBHĀVAVYĀKHYĀ.

Substance—Palm leaf. Size—9¾"×1¾". Leaves—134. 10 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—3700. Incomplete.

Subject—Same as No. 664.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिनन्द्य चिदानन्दं परमात्मानमीश्वरम् ।
वागिन्दिरोमासम्भिश्रब्रह्मविष्णुशिवात्मकम् ॥
व्याख्या प्रस्तूयते ग्रन्थे तत्त्वाविर्भावसंज्ञके ।
चिदानन्दकृते नत्वा गुरूनपि यथामति ॥

प्रकरणमारिप्सुरभिमतां देवतां नमस्यति वन्द इति । अहमिन्दुचूडमुकुन्दयोरेकमङ्गं वन्दे । महादेवपुरुषोत्तमयोः साधारणं विग्रहं कायवाङ्मनःप्रह्वतालक्षणया प्रणत्या पूजयामि । इन्दुचूडमुकुन्दौ विशिनष्टि—कल्याणयोरिति ।

End :

न चायं दोष आवयोस्तुल्य एवेति वाच्यमित्याह—न चेति । येन क्रियाफलस्याकर्त्रभिप्रायत्वं स्यादिति क्रियाफलत्वमकर्त्रभिप्रायत्वं चोभयमपि सिद्धयेद् यत इत्यर्थः । माणवकाधिकार इति । यद्यपि पुरुषस्य कर्मणि फलितया शेषित्वमधिकारस्तथापि तद्धेतुभूतनियोगफलयोरपि शास्त्रेऽधिकार इति नियोगस्यात्र निर्देशः । अत एवाहाचार्यकाधिकारस्येति । कर्मधारय एषः । क्वचिच्चाचार्याधिकारस्येति पाठः । तत्र

माणवकाधिक... ...षष्ठीतत्पुरुषः । एवं चात्मनेपदात्मा-
ध्यापनाङ्गमु... ... .

Colophon :
Author :

Remarks—The Ms. is very old.

॥ तन्त्रवार्त्तिकव्याख्याटीका ॥

668 A. TANTRAVĀRTIKAVYĀKHYĀṬĪKĀ.

Substance—Palm leaf. Size—19″ × 2″. Leaves—42. 11 lines per page and 72 letters per line. Script —Malayāḷam. No. of Granthas—1534.

Subject—Same as No. 661.

Beginning:

...वार्त्तिके वेदस्येत्यादिवत् स्वातन्त्र्यमबुद्धिपूर्वेत्यनेनोक्तम् । अबुद्धिपूर्वस्यापि प्रामाण्यानुपपत्तिरित्येतद् दर्शयितुमुक्तं नित्यावस्थितेति ।

End :

....ख्यानवार्त्तिकमनन्तरोक्तानुगुण्यप्रदर्शकतया व्याचक्षाण आह—एतद्धीति । उत्तरभाष्यं वार्तिककृता नोपात्तम् । न चाक्षरार्थ उक्तः । तेन तत्प्रदर्शनपूर्वकं तात्पर्यार्थं कथयतीति वक्तुमारभते ।

... ...
... ...

Colophon :

Author :

Remarks—The first nine leaves are missing. The commentary comes to a close with the 26th Sūtra of the 2nd Pāda. Only the initial letters of the Sūtras in the text are noted here.

॥ शाबरभाष्यव्याख्या ॥

668 B. ŚĀBARABHĀṢYAVYĀKHYĀ.

Substance—Palm leaf. Size—19″ × 2″. Leaves—10. 11 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject—Same as No. 661.

Beginning :

...च्चाचमनादीनां न तैर्व्यवधानमित्याह—अपिचेति। शौचशुद्धता आचान्तता यज्ञोपवीतित्वं चेत्यस्यानन्तरमितिशब्दमध्याहृत्य एवंजातीयकपदेन सम्बन्धनीयः।

End :

यत् प्रत्यक्षविरुद्धाप्रसिद्धार्थकल्पनं दूषणमुक्तं तदविधायकत्वादिति सूत्रावयवं व्याकुर्वन् परिहरति—न नामधेयमिति नोदभिच्छब्दस्य.... ....

... ...

... ...

Colophon :

Author :

Remarks—The commentary covers only the portion beginning from Sūtra 8, Pāda 3, chapter 1, and ending with the 2nd Sūtra in the 4th Pāda of the same chapter.

॥ तन्त्रासिद्धान्तदीपिका ॥

669. TANTRASIDDHĀNTADĪPIKĀ.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 1\frac{7}{8}''$. Leaves—245. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—6400. Incomplete.

Subject—Sacrificial rituals.

Beginning:

हरिः ओम् । श्रीगुरुभ्यो नमः ।

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत । एष ह्यर्थो विधीयते । एवं धर्मप्रमाणेऽवगते धर्मस्वरूपेऽपि तत्प्रमेयत्वेन सामान्यतः सिद्धे पतञ्चान्तभादिभि(?)स्तद्भेदनिरूपणेन तदियत्तावधार्यते । तदत्रापूर्वधात्वर्थ(भेद?भावनानां) भेदोऽध्यायार्थः । न चैवं विचार्यभेदेऽध्यायभेदापत्त्या भावनाभेद एक एव अध्यायार्थस्तया विचार्यः । तद्गुणतया तत्फलतया च परं धात्वर्थापूर्वभेदौ विचार्याविति वाच्यम् । विनिगमनाविरहाद् अपूर्वभेद एवाध्यायार्थः ॥

End:

तेषां मते इन्द्रियाणां प्रतिनियतविषयत्वविरोधात् । किन्तु

पुत्रो भवतीत्युक्ते भार्यामुपेत्य पुत्रं भावयतीतिवत् सर्वज्ञो भवतीत्युक्तेऽपि तद्धेतुमूलश्रुत्यादिबुद्ध्यैव सर्वज्ञः स्यादिति कल्पनया श्रुतिमूलत्वाविरोधात्। यत्तु स्वर्गवाक्यमेव निष्फलं स्यादिति गोबलीवर्दन्यायेन वा अङ्गप्रधानसम्बन्धार्थत्वेन वा एवं वाक्यद्वयेन फलज्ञानमभ्युदयकारिणा...न्यथेति कल्पनया वा परिहर्तव्यम् ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरन्धरमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेणालङ्कारतिलकाख्येनकप्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेण भूमिदेवीनन्दनेन अप्पय्यदीक्षितेन विरचितायां तन्त्रसिद्धान्तदीपिकायां तृतीयस्याध्यायस्य षष्ठः पादः।

Author—Appayyadīkṣita.

Remarks—This is an independent commentary on Mīmāmsā Sūtras. The second chapter marks its opening and the 25th Sūtra of the 3rd pāda in the 4th chapter, its close.

॥ नयदीपिका (नयविवेकव्याख्या) ॥

670. NAYADĪPIKĀ.

Commentary on Nayaviveka.

Substance—Palm leaf. Size—$28\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves

—34. 8—11 lines per page and 104 letters per line. Script—Malayāḷam. No. of Granthas —2100. Incomplete.

Subject—Same as No. 664.

Beginning :

हरिः । श्रीगणपतये नमः । ॐ ।

प्रणताज्ञानसन्दोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं सारस्वतप्रदम् ॥
यन्नामग्रहमात्रेण क्षीयन्ते विघ्नहेतवः ।
तमेकदन्तं वन्देऽहं वन्दकाभीष्टदायकम् ॥

यत्पादपङ्कजद्वन्द्वनिरन्तरनिषेवणात् ।
विद्यानिधिः शिष्यगणो नमामस्तं सुदर्शनम् ॥
नमामि पितरौ वृद्धानपि कल्याणचेतसः ।
यत्प्रसादेन मूकोऽपि भवेद्वाचस्पतेः समः ॥

नमामि जैमिनिसुनिं भाष्यकारप्रभाकरौ ।
नाथं भवं निबन्धृंश्च चन्द्रादीन् समुपास्महे ॥
पुराद्युगापगातीरे किडाम्बिकुटिभूषणः ।
यज्ञद्रोणात् समभवत् प्रणतार्तिहराभिधः ॥
तस्मात् समभवत्प्राज्ञो देवराजो बहुश्रुतः ।
ततः श्रीरङ्गनाथाख्यो विपश्चित्सप्तमोऽजनि ॥

तत्सूनुना वरदराजबुधाग्रिमेण
व्याख्यायते नयविवेक इति प्रबन्धः ।
सत्सम्प्रदायमहिता नयदीपिकेति
ख्याता यदीयकृतिरादरणीयभावा ॥

तत्र त्रिपाद्यां गम्भीरं भवनाथसमीरितम् ।
अहं नयविवेकाख्यं व्याचक्षे दुर्ग्रहं परैः ॥

... ...

... ...

तत्र प्रथमपादोक्तस्य सर्वतन्त्रसाधारणतया सुगमत्वात् तत्र गुरुणा ग्रन्थः संक्षिप्त इति तदीयगम्भीराशयविवृतये स्वेन तत् प्रपञ्चितं त्रिपाद्यां वाद्यन्तराप्रसिद्धवाक्यविवृतिविषयत्वात् न्यायानां तत्सुखावगत्युन्मुखशिष्यव्युत्पत्तये विस्तरप्रधानो गुरुग्रन्थ इति तदभिप्रायमात्रकथनाय तदर्थप्रतिपादकोऽयं ग्रन्थः ।

End :

तथा श्यामत्वादेः कस्यचिल्लिङ्गस्य व्यवस्थितत्वात् होलाकादीनामपि व्यवस्था स्यादित्यत्राह—शुक्लेति । उक्तं शुक्लिम्नोऽव्यवस्थितत्वम् उपादेयत्वात् । श्यामत्वादि तु न स्वयमुपादेयम् किन्त्वन्योपादानोपाधिभूतम् । तथा चानुगतैकरूपापेक्षा दुर्वारेत्यर्थः । नन्वनुगतैकरूपोपाध्यभावेऽपि अनेकोपाधियुक्तवेदानुमास्त्वित्याशङ्कते अथेति । तन्नेति । अनेकपदवत्त्वं नाम प्राच्याख्यस्तत्सुतश्चेत्येवमपि न सर्वानुष्टातृसङ्ग्रहः । कथमित्यत्राह—तादिति । ननु तर्हि प्राच्यप्राच्यसुतत्वाद्यभिमाना (ध्य?द्य)वस्थास्त्वित्यत्राह—न चेति । प्रयोगोत्पत्त्यशास्त्रत्वात् शब्देषु न व्यवस्था स्यात् । इह गौर्गवी गोणी गोपतल्लिकेत्येव ... ... ।

Colophon :

इत्यात्रेयस्य श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमस्याध्यायस्य द्वितीयः पादः ।

Author—Varada Rāja, son of Śrī Raṅganātha and a disciple of Śrī Sudarśanācārya.

Remarks—The verses at the outset of the Ms. disclose the author's parentage.

॥ नयदीपिका (नयविवेकव्याख्या) ॥

671. NAYADĪPIKĀ.

Commentary on Nayaviveka.

Substance—Palm leaf. Size—$28\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—58. 8 lines per page and 72 letters per line. Script—Grantha. No. of Granthas—2100. Incomplete.

Subject—Same as No. 664.

Beginning etc,—Same as No. 670.

॥ नयविवेकः ॥

672. NAYAVIVEKA.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—18. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—675. Incomplete.

Subject—Exposition of the aphorisms on Mīmāṃsā.

Beginning:

श्रीगणपतये नमः ।

श्रुतिप्रमाणत्वात् ।

अत्र भाष्यं पूर्वेणेत्युपक्रम्य चिन्तयितुमिष्यते इत्येवमन्तं पङ्क-

योरर्थभेदं सम्बन्धं चाह। तद्गुरुणा व्याख्यातम्। औपदेशिकी प्रतिपत्तिः पूर्वषट्कार्थः कार्यजातं तूत्तरषट्कार्थ इति प्रतीतेस्त्वर्थप्रवणत्वात् तन्मुखेन तत्प्रमेययोरेव षट्कार्थतोक्ता। उपदेशो विवृतः। उपदेशो नाम ग्रन्थसन्दर्भस्य पाठ इति उपदिश्यते ऽनेनेति व्युत्पत्त्या। सन्दर्भग्रहणावान्तरवाक्यार्थेनौपदेशिक इत्युक्तम्। पाठग्रहणात् पाठानन्तरितं शाब्दमौपदेशिकमित्युक्तम्। कार्यमपि विवृतम्। कार्यं चात्र करणोपकारादिद्वारभूतमिति न परमकार्यमपूर्वमित्यर्थः।

End :

उत्तरवेदिर्न वरुणप्रघासमात्रस्येति तदनारभ्य पर्वविशेषं विधिरिति वक्तुम्। एवमुपसंहारोऽनुज्ञातः सिध्यतीति स्वरसाम.... यदि सम्भवति स्वार्थविधौ न वत्स्यर्थविधिः। तदा लिङ्गितानुपपत्त्यापि वचनकल्पना युक्ता न तु परशब्दता स्वरसामकपालामिक्षाशब्दानाम्। अत एव पि ... ...

Colophon :

इति नयविवेके सप्तमस्य द्वितीयः पादः।

Author—Bhavadeva.

Remarks—The commentary commences from the 7th chapter and finishes with the 25th sūtra of the 3rd pāda of the same chapter.

॥ नयविवेकः ॥

673. NAYAVIVEKA.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—

187. 9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—2925.

Subject—Same as No. 672.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गणाधिपं ग्रहान् वन्दे हरिं हरसुमां गुरून् ।
वाग्देवीं स्वर्धुनीं विप्रान् कर्तुं गुरुनये कृतिम् ॥
विहाय विस्तरं शब्दसौन्दर्युद्धरनिन्दने ।
व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ॥
महता प्रणिधानेन शक्यमेव विधान्तरम् ।
लोकानुमतमित्येव शाल्लिकोक्तं प्रसाध्यते ॥
ग्रन्थेऽस्मिन्विस्मयो भावी नवा किं तस्य दुष्करम् ।
यो ददाति हि सर्वस्वं सहस्रोत्पत्तिशासनम् ॥

॥ अथातो धर्मजिज्ञासा ॥

देवगुरुपूजास्तुतिनमस्कारादिरूपं मङ्गलमुच्यते । 'मङ्गलाचार-युक्तानां विनिपातो न विद्यते' इत्यादिस्मृतेश्चाभिमताविनिपातो-ऽस्य फलम् ।

End :

अर्थाद्वा । यदि वाक्यशेषादिशेषपरता तदभावात् सर्वस्य सर्वापदानं शास्त्रात् । न तथानुष्ठानशक्तिरिति किं यथाशक्त्या-नुष्ठानम् । उत यथाशास्त्रमित्यनुष्ठान... ... ...नतु यथाशक्त्यनुष्ठानं विपर्यस्तं तत-श्चेत्थमेव सन्दिग्धम् । अस्ति नास्तीति अथवा सर्वं स्रुवेणापदेय-मनुग्राहकद्रव्यान्तर्भावात् शुक्तितो वा केनचित् किञ्चिदिति सङ्ग-

तिद्वयं पूर्वपक्षश्च । राद्धान्तस्तु स्वरूपमात्रश्रुतेर्नानुग्राहक.....
....श्शास्त्रात् । अतो विधिचिन्तया प्रथमपादे
अर्थवादमन्त्रस्मृतीनामनुष्ठानतः पादत्रये स्थापितं प्रामाण्यं निवित्तु ? परीष्टिरिति यत् प्रतिज्ञातम् ।

Colophon :

प्रथमोऽध्यायः समाप्तः ।
द्वितीयेन द्वितीयेन निबन्धेन निबध्यते ।
यस्तदेव भवेनाद्य निरवद्यं निगद्यते ॥
भावा.... ....

Author—Same as No. 672.

Remarks—This Ms. contains only the 1st chapter.

॥ प्रकरणपञ्चिका ॥

674. PRAKARAṆAPAṄCIKĀ.

Substance—Palm leaf. Size—30″ × 1½″. Leaves—63. 10 lines per page and 112 letters per line. Script—Malayāḷam. No. of Granthas—4500.

Subject—The principles of Mīmāmsā enunciated by the school of Guru.

Beginning :

हरिः । श्रीगणपतये नमः ।
स्वाध्यायविधिवाक्यार्थविचारं प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्वा मीमांसारम्भसिद्धये ॥
अत्र केचिदाहुः— न मीमांसाशास्त्रमारब्धव्यमिति । तद्धि

पदवाक्यार्थविचारद्वारभूतन्यायनिबन्धनम् । नच वेदवाक्यार्थो विचार्यो विचारस्य विषयभूतोऽस्ति । न चाप्यसौ विचार्य निर्णीतः प्रयोजनमवकल्पते अपुरुषार्थत्वात् । पुरुषार्थत्वे हि तस्य चोदनैव प्रमाणं स्यात् । न चाविवक्षिता सा प्रमाणं भवितुमर्हति ।

End :

स औपदेशिको ज्ञेयः स च द्वैधमवस्थितः ।
ग्रन्थेनोपस्थितिश्चैव विध्यर्थोपस्थितिस्तथा ॥
यथापकारप्रकृतौ नियोज्यो वा यथाश्रुतः ।
प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ॥
तेनौपदेशिको नासौ केवलं कार्यबन्धनः ।
पूर्वनिबन्धनसम्भवमपनेतुं सम्यगीहमानेन ।
शालिकनाथेन कृतः कृतिनामानन्दनो यत्नः ॥

Colophon :

अनिदेशपारायणं समाप्तम् । प्रकरणं समाप्तम् ।
पान्तु नो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिवाहवः ॥

श्रीपद्मनाभाय नमः । प्रभाकरगुरुभ्यो नमः ।

കൊല്ലം ആയിരത്തിഅമ്പത്തേഴാമാണ്ടു കന്നിമാസം ഇരുപത്തൊമ്പതാംതീയതി അപരപക്ഷത്തു ഷഷ്ഠിയും മകയിരവും വ്യാഴാഴ്ച അന്നുച്ചയ്ക്കു എഴുതിത്തീർത്തതു.

गुरुमतकौतुकचेताः सरसिजनाभे समर्प्य कृतिजातम् ।
व्यलिखत् प्रकरणवर्यं शालिकनाथेन रचितमतिकान्तम् ॥

गुरुभ्यो नमः ।

लेख्यान् विलेविलसियेद् (?) गुरुदर्शनेऽस्मिन्
योग्यः स योजयति यः स्वमतेन भाष्यम् ।
कौमारिलैर्नियमितं स च तत्र तद्वत्
प्राभाकरैस्तदितरच्छिखतो ह्यकीर्तिः ॥

പള്ളിപ്പുറത്തിന്റെ ശ്ലോകം.

अब्दे चिन्निधिमम्मिते श्वितलसत्तुङ्गे पतङ्गेऽसित-
द्वादश्यां चरमाद्यभे गुरुदिने लग्ने कुलीरे वरे ।
प्राकारान्तरनाय्यनन्तशयितुः श्रीबालमार्त्ताण्डभू-
पालेनैकदपत् सुखेन मनुजाः कल्पान्तमालोक्यताम् ।
कोलम्बे भूनुलाख्ये जतुमजु(षि)रवौ वासरे भूपसंख्ये
वञ्चिक्षोणीमघोनः क्षितिपकुलमणे रामवर्माभिधस्य ।
स्वस्रीयः सत्यधर्मा निरुपममहिमा बालमार्त्ताण्डवर्मा
प्लुष्टं प्राग्वद्विधातुं मनसि निरचिनोत् पद्मनाभीयगेहम् ॥

Author—Śālikanātha.

Remarks—This work has been printed in Benares. It contains the following eight prakaraṇas:

1 शास्त्रमुखम्	5 प्रमाणपारायणम्
2 नीतिपथः	6 अङ्गपारायणम्
3 जातिनिर्णयः	7 अतिदेशपारायणम्
4 नयवीथी	8 तत्त्वालोकः

The last two verses in the colophon furnish historical details regarding the date of bringing the celebrated square slab after which Ottakkalmaṇḍapam in the Śrī Padmanābhasvāmikṣetra is named besides referring to the resolution of H. H. Bālamārtaṇḍavarmā to renovate the temple on account of the havoc caused by fire.

॥ भाट्टदीपिका ॥

675. BHĀṬṬADĪPIKĀ.

Substance—Palm leaf. Size—17½″ × 1½″. Leaves—148. 9 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—5900.

Subject—Exposition of the Sūtras of Jaimini.

Beginning :

ओं भवान्यै नमः ।

विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे ।
तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकाम् ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् । तस्मादनित्यमुच्यते ।' वायुर्वै क्षेपिष्ठा देवता । वायुमेव स्वेन भागधेयेनोपधावति । स एवैनं भूतिं गमयति' इत्याद्यर्थवादानां विधिप्रतिषेधवदेव कर्तृस्मरणाभावादपौरुषेयत्वे पूर्वाधिकरणेन सिद्धे सम्प्रति तद्वदेव धर्माधर्मयोः प्रामाण्यमस्ति न वेति विचार्यते ।

End :

अतश्च पूर्वकर्मणि शेषाभावेनाज्यविधिनानुपपत्तेः गुणात् कर्मान्तरमेवैतदाज्यद्रव्यकमनुपक्तपपत्ति (?) सदेवत्यमुपांशुयाजप्रकृतिकम् । शेषसंस्थानशब्दौ तु पूर्वस्य कर्मणोऽसमाप्तप्रायतया कथञ्चिदनुवादो वेति सिद्धस्त्रिविध ऊहः ।

Colophon :

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां नवमस्याध्यायस्य चतुर्थः पादः । श्रीगुरुभ्यो नमः । हरिः ओम् ।

Author—Khaṇḍadeva.

Remarks—Chapters 1—9 are embodied in this Ms. The work has been printed in Mysore.

॥ भाट्टदीपिका ॥

676. BHĀṬṬADĪPIKĀ.

Substance—Palm leaf. Size—14½″×2″. Leaves—13. 11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—600. Incomplete.

Subject—Same as No. 675.

Beginning:

अविघ्नमस्तु ।

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् । इतरवद्गृहे सिद्धे अधुनातिदिष्टानां पदार्थानामुत्तरत्रापवादाभ्यां विकृतौ बाधो निरूप्यते । बाधो नाम प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावः ।

End:

अमावास्योत्तरप्रतिपदि चायुस्संज्ञकः अन्तरा शुक्लपक्षे दर्शः कृष्णपक्षे पौर्णमास इत्येवं क्रमेण । तत्र च सोमयागस्यैव प्राधान्यम् । अस्तु वा तन्त्ररत्नोक्तकौण्डपायिनामयनवद् दर्शपूर्णमासयोरपि काम्येष्टित्वमङ्गत्वमविवादमेव । नच तथापि प्रकृतौ द्वादशाहे आर्त्वि-

ज्य एव यजमानविधेः तस्य चाङ्गमात्रविषयत्वात् कामेष्ट्याद्यङ्गेष्वपि तत्प्राप्त्यविरोध इति ।

Colophon :

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां दशमस्याध्यायस्य प्रथमः पादः ।

Author—Same as No. 675.

Remarks—The Ms. contains the 1st *pāda* and a fragment of the 2nd in chapter 10.

॥ भाट्टदीपिका ॥

677 A. BHĀṬṬALĪPIKĀ.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—137. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—5275.

Subject—Beginning—Same as No. 675.

End:

कल्पसूत्रकारैः कात्यायनादिभिरार्त्विज्योद्देशेन ब्राह्मण्यविधा-

नाद् मन्त्रार्थवादेतिहासादौ तत्तद्गमकसत्वाच्च ब्राह्मणस्यैवार्थित्व-
ज्यमिति सिद्धम् । तदेवं निरूपितो द्वादशभिरध्यायैः धर्माधर्मौ ।

Colophon :

जैमिनेरमलसूक्ति(पु)मयं
शुद्धिमाप विपुलां मम चेतः ।
प्रीतिमेतु नृहरेः पदपद्मे
येन जन्मनिवहो न पुनः स्यात् ॥

इति खण्डदेवकृतौ भाट्टदीपिकायां द्वादशाध्यायस्य चतुर्थाङ्घ्रिः । हरिः ॐ ।

Author—Same as No. 675.

Remarks—Chapters 10—12 are embodied in the Ms. The succeeding śloka occurs in the wake of the colophon :

"आ सेतोरा हिमाद्रेः क्षितितलविलसत्कीर्तिपूर्णेन्दुशाङ्क-
श्रीमानप्पय्ययज्वा सकलगुणनिधिर्यत्कुलाह्वार्यदीपः ।
मीमांसाशास्त्रधारामधुरमधुरसामाग्रभृङ्गायमाणो-
ऽपान्तो विश्वेश्वराख्यो जयति वरमिदं पुस्तकं तस्य सूरेः ॥

॥ भाट्टदीपिका (संकर्षकाण्डः) ॥

677 B. BHĀṬṬADĪPIKĀ.

(Saṅkarṣakāṇḍa.)

Substance—Palm leaf. Size—14" × 1½". Leaves—

74. 8—10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas —2325. Complete.

Subject—Same as No. 675.

Beginning :

श्रीगणपतये नमः ।

एवं द्वादशभिरध्यायैः प्रकृतिविकृतिभेदेन कतिपयान् न्यायान् संशोध्य तैरेव न्यायैरितस्ततोऽपि विप्रकीर्णान् वेदवाक्यार्थानैदम्पर्येण सम्यक् निष्कृष्य निर्णेतुमेषा चतुरध्याय्यारभ्यते । अत एव सङ्क्षेपेण प्रत्यधिकरणं सङ्गत्यपेक्षा । अनुयजतीत्यनुवषट्कारश्चोद्यते ।

End :

तदेवं षोडशभिरध्यायैः पञ्चसप्तत्या पादैः भगवता जैमिनिना निरूपितौ धर्माधर्मौ । तदुक्तयैव दिशा विविच्य गुरुकुलादवगत्य स्नात्वा यथाश्रमं यथाशास्त्रं धर्मानुष्ठाय भगवत्यर्पितवतां क्रमेण चित्तशुद्धिविविदिषात्मज्ञानोदयैर्नित्यसुखाभिव्यक्तिरु.....क्षः फलति । एतदुत्तरापि व्यासपादप्रणीता चतुर्लक्षणी शारीरकमीमांसात्मज्ञानोपयोगिन्यपि अनुबन्धभेदादिभिः भिन्नमेव शास्त्रमिति द्योतनाय वाक्यावृत्तिः । वाकारेण याज्यादिपदेन च मङ्गलं ध्वनितमिति सर्वं शिवम् ।

Colophon :

जैमिनेर्विमलसूक्तिकठिन्यां
मग्नमाप शुचितां मम चेतः ।
तेन खेलतु पिनाकिपदाब्जे
येन जन्मनिवहो न पुनः स्यात् ॥

खण्डदेवकृतभाट्टदीपिका
लक्षणैः कतिपयैरसम्भृता ।
इत्युदीक्ष्य बुधभास्करोऽग्रिचिद्-
भारती वरिभरांबभूव ताम् ॥

आसीत् षोडशलक्षणी श्रुतपदा या धर्ममीमांसिका
सङ्कर्षाख्यचतुर्थभागविधुरा कालेन साजायत ।
गायत्री त्रिपदात्मिकेव विबुधैरद्यापि या पठ्यते
तां पूर्णामतनोच्छ्रमेण महता गम्भीरजो भास्करः ॥

इति श्रीमद्भास्करराय भारतीविरचितायां सङ्कर्षे भाट्टदीपिकायां षोडशाध्यायस्य चतुर्थः पादः ।

ललिताम्बिकायै नमः । श्रीवासुदेवाय नमः । श्रीसाम्बपरमेश्वराय नमः । शुभम् । अविघ्नमस्तु ।

अध्यायशास्त्रं समाप्तं । श्रीशिवाय नमः ।

Author—Bhāskara Rāya Bhāratī.

Remarks—The work describes the divinities presiding over each religious function. The Ṣodaśalakṣaṇī becomes complete only by the addition of 4 chapters found in this work.

॥ भाट्टरहस्यम् ॥

678. BHĀṬṬARAHASYAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—72. 10 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—2610.

Subject—Same as No. 675.

Beginning :

हरिः । श्रीगणपतये नमः ।

स्मृत्वा स्मृत्वा पुरारातिं तत्प्रसादावलम्बनात् ।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे ॥
यज्ज्ञानान्न्यायसाहस्री स्फुटीभवति तत्त्वतः ।
तद्रहस्यं खण्डदेवः प्रकाशयितुमुद्यतः ॥

तत्र द्वादशलक्षण्यां धर्माधर्मावेव जैमिनिनानुष्ठानोपयोगितया विचारितौ । यद्यपि धर्माधर्मावदृष्टविशेषात्मकौ न क्रियारूपौ । अत एव "धर्मः क्षरति कीर्तनादि"त्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धर्माधर्मशब्दप्रयोगः । तथापि "धर्मः स्वनुष्ठितः पुंसाम्" इत्यादौ तज्जनकविहितनिषिद्धक्रियादावपि तच्छब्दप्रयोगात् ताविह प्राधान्येन विचार्येते ।

End :

तत् सिद्धं सप्तम्यर्थः शक्यो लाक्षणिको वा सर्वोऽपि भावनान्वयीति । तदेवं लिङ्गसंख्याव्यतिरिक्तसम्बन्धमात्रस्य सिद्धो भावनान्वयः ।

नवीनानां नानामननविशदानामयमहो
सुयुक्तीनां पुञ्जैरिह विरचितः कोऽपि जगति ।
महानर्कस्तर्कप्रयिततमसज्ञाततमसां(?)
सुधांशुर्मीमांसामतकुमुदपूरस्य जयतु ॥

Colophon :

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ।
समाप्तश्चायं ग्रन्थः ।

Author—Khaṇḍadeva.

Remarks — The author substantiates his own school of Mīmāṁsa philosophy and repudiates others.

[नीलित्वाजिभि-ज्यारण्या]

॥ मङ्गलटीका ॥

679. MAṄGALAṬĪKĀ.

Substance—Palm leaf. Size—23″ × 1½″. Leaves—129. 8—9 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—5900.

Subject—Same as No. 675.

Beginning:

... ...र्थत्वान्यत्वयोरन्यतरनिश्चयवत एव युक्तम् । उभयथापि वेदार्थस्य धर्मताजिज्ञासाया अपि अनवकाश एव स्यात् । वेदार्थादन्योऽधर्म इति हि निश्चिते वेदार्थस्य धर्मत्वशङ्कापि नोदीयात् ।

End:

अन्यत्राप्रमितस्यापि शशविषाणस्य अत्यन्ताभावप्रतियोगिनः प्रतिषेधरूपसाध्यविशेषण... ...प्रसिद्धविशेषणत्वं तत्र इति । नन्वेवमान्मत्वं तावद् दिव्यशक्तिसमवेतं न भवति जातित्वाद् गोत्वादिवदिति प्रतिसाधनात् तेषामपि नित्यत्वप्रसङ्गः । अत्राप्याह—न चेति । यत्पुनरित्यादि निगदव्याख्यानमिति । इति सिद्धं वेदः स्वतः प्रमाणमिति ।

Colophon :

परशुकरवनाख्ये पण्डितग्राममुख्ये
समजनि महनीये मङ्गलाख्ये कुले यः ।
कथमपि स सतामेवाज्ञया प्राज्ञवर्य्यः
प्रकरणमिदमेवं व्याकरोन्नीलकण्ठः ॥
हरिहरहिरण्यगर्भेभ्यो नमः ।

Author—Nīlakaṇṭha.

Remarks—The commentary is lucid and elaborate. The proofs of knowledge like perception, inference etc. are dealt with here in detail. The words "मङ्गलाख्ये कुले यः" in the colophon disclose the name of the family to which the author belonged.

॥ मयूखमालिका (शास्त्रदीपिकाव्याख्या) ॥

680. MAYŪKHAMĀLIKĀ.
Commentary on Śāstradīpikā.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—160. 14 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—3900.

Subject—Same as No. 675.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथा विकारभावः स्यात् ।

वृत्तकथनपूर्वकं सङ्गतिं दर्शयन् वर्तिष्यमाणं प्रतिजानीते— उपदेशविचार इति । पूर्वषट्के उपदेशविचारं परिसमाप्य इदानीमुत्तरषट्केऽतिदेशविचारः हेतुहेतुमद्भावसङ्गत्या प्रस्तोष्यत इत्यर्थः । इत्थं कुर्यादित्युपदेशपूर्वकत्वात् तद्वत् कुर्यादित्यतिदेशस्य तद्विचारयोरपि हेतुमद्भावः । इदं पञ्चकद्वयार्थकथनं प्रायिकाभिप्रायम् ।

End :

द्रव्योत्सर्गमात्रविधाने तु देवतानिबन्धनसादृश्याभावात् शेषसंस्थापादो न घटत इति त्वाष्ट्रवाक्ये यागविधिः । पर्यग्निकरणवाक्यं तु तत्रैव तदङ्गरीतिविधायकमिति निश्चयः । तद्वदारण्येष्वपि ईशानवाक्ये यागविधिः पर्यग्निकरणवाक्ये तदन्ताङ्गरीतिविधानमिति समानन्यायत्वात् सिध्यतीति युक्तं लिङ्गत्वम् । सूत्रार्थस्तु आज्येन शेषं संस्थापयतीत्यत्राज्यप्रतिनिधिः स्यात् । पशुद्रव्येऽस्योत्सृष्टत्वेन कर्मणो द्रव्यापेक्षत्वादिति ॥

Colophon :

इति निडुलकुलतिलकसूरभट्टसोमनाथयज्वनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकायां नवमाध्यायस्य चतुर्थः पादः । समाप्तश्च नवमाध्यायः ।

श्रीपद्मनाभो रक्षतु ।

Author—Somanāthayajvan.

Remarks—The Ms. comprises chapters 7, 8 & 9.

॥ मयूखमालिका (शास्त्रदीपिकाव्याख्या) ॥

681. MAYŪKHAMĀLIKĀ.
Commentary on Śāstradīpikā.

Substance—Palm leaf. Size—7½″×1½″. Leaves—420. 10 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—4200.

Subject—Same as No. 675.

Beginning:

ओम्। विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात्। शिष्यावधानार्थं वृत्तकथापूर्वकं वर्त्तिष्यमाणं प्रतिजानीते ऊह इति। विकृतिष्वतिदिष्टानामङ्गानामियत्तेत्यन्वयः। अभ्युच्चयो वैकृतैः प्राकृतानां समुच्चयः। अत्र बाधाभ्युच्चययोरप्याध्यायार्थत्वम् अध्यायभेदापत्तेरित्याशयेनोक्तमिति। धत्तेति। तथाच्चाङ्गपरिमाणमेकमेवाध्यायार्थ इति न भेदप्रसक्तिरित्यर्थ इत्याहुः।

End:

तस्मात् पुरोडाशौ केवलमुपलक्षणतयोपादीयेते। ततश्च तदुपलक्षितकाल एव गुणः। स चोपलक्षणापायेऽप्यन(स्ते?पेत) इत्येकपुरोडाशायामपि स्याद् यथा शङ्खेऽप्यायामागन्तव्यमिति कालविशेषोपलक्षणतयोपात्ते शङ्खध्वनौ क्वचिद् दैवादकृतेऽपि तदुपलक्षितकालस्यानपायात् तत्राप्यागम्यते, तद्वदित्यर्थः।

Colophon:

इति श्रीनिट्टलकुलतिलकसूरभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रियज्वगुरुचरणानुजस्य सोमनाथयज्वनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां दशमाध्यायस्य प्रथमः पादः।

कृष्णाय वासुदेवाय देवकीनन्दनाय च।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

Author—Same as No. 680.

Remarks—Only the tenth chapter is comprised in this Ms. Intermissive gaps are seen in it.

॥ मानमेयोदयः ॥

682. MĀNAMEYODAYA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—158. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Authors—Nārāyaṇabhaṭṭa and Nārāyaṇa Paṇḍita.

Remarks—This work is published as No. 19 in T S S

॥ मीमांसाकौस्तुभः ॥

683. MĪMĀMSĀKAUSTUBHA.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—289. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—10500.

Subject—Same as No. 675.

Beginning :

शुभमस्तु ।

विघ्नध्वान्तनिवारणैकतरणिर्भक्तौघचिन्तामणि-
विद्याकाननगाहनैकतरणिर्मच्चित्तभूपामणिः ।
भूयादेष कुतर्ककर्कशधियां हर्तापहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥

वृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मच्चित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः ॥
शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमा(ङ्गेऽङ्गगा) यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते। अत्र "सोऽरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्वम् । वायुर्वै क्षेपिष्ठा देवता । वायुमेव स्वेन भागधेयेनोपधावति । स एवैनं भूतिं गमयति ।" इत्याद्यर्थवादाः धर्माधर्मयोः प्रमाणं न वेति सन्देहः । अत्र लक्षणसङ्गतिः—

End :

अतः कथं प्राप्तबाधत्वावच्छेदेन प्रापकशास्त्रस्य बाधकशास्त्रेण स्वविषयविषयकताप्रतिबन्ध इति चेन्न । प्रयोगे प्रापकशास्त्रस्य विषयताप्रतिबन्धेन बाधकाभावात् । रागप्राप्तनिषेधे तु अर्थवंशसम्पन्नप्रवृत्तिप्रतिबन्धकत्वेऽपि प्रमाणस्य विषयताप्रतिबन्धाभावाद् बाध्यव्यवहारो भाक्त इत्यनुसन्धेयम् । तस्मात् सिद्धं श्रुतिलिङ्गादावप्राप्तबाध एवेति ।

Colophon :

मीमांसाम्बुनिधिं प्रमथ्य विविधैर्न्यायोच्चयैर्निर्जरैः
कृत्वा जैमिनिसूत्रमन्दरमसुं वेदं तथा वासुकिम् ।
यद्बालाहलसंज्ञमेव कथितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥
श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्ये शेषाध्याये द्वितीयाङ्घ्रेः ॥
इति रुद्रदेवसुतखण्डदेवकृतौ मीमांसाकौस्तुभे तृतीयाध्यायस्य द्वितीयः पादः । हरिः । शुभमस्तु ।

Author—Khaṇḍadeva.

Remarks—The Ms. commences from the 1st *pāda* of the 2nd chapter and comes to a close with a fragment of the third. It is available in print at Benares. Only 156 leaves are numbered.

॥ मीमांसान्यायप्रकाशः ॥

684. MĪMĀMSĀNYĀYAPRAKĀŚA.

Substance—Palm leaf. Size—17″×2″. Leaves—27. 11 lines per page and 72 letters per line. Script —Grantha. No. of Granthas—1350.

Subject—A simple exposition of Mīmāmsāśāstra.

Beginning :

... ...
करणत्वं च भावनाभाव्यनिवर्तकत्वेनेत्युक्तम् । नहि सोमोऽ

दृष्टमन्तरेण फलं जनयितुं समर्थः । ग्रहैर्जुहोतीति वाक्यविहितहोमेन तस्य भस्मीभावात् । अतोऽदृष्टद्वयापातान्न यागस्य सोमार्थत्वमिति ।

End :

कुठारेण तथा व्याप्रियते । यस्मिन् व्यापारे कृते कुठारगद् भेदनं भवतीति । एवं च यजेत स्वर्गकाम इत्यस्यायमर्थः — यागेन तस्य... ... .कृते यागात् स्वर्गो भवतीति । न च व्यापारः क्वचिदुद्यमननिपतनादिः । क्वचिच्चाग्न्यन्वाधानादिव्राह्म ... ... कथम्भावाकाङ्क्षाया ... .

Colophon :

Author—Āpadeva.

Remarks—This Ms. lacks its beginning and end. The leaves are completely damaged. The printed edition in N. S. Press, Bombay, furnishes the author's name.

॥ मीमांसासूत्रम् (तन्त्रचूडामणियुतम्) ॥

685. MĪMĀMSĀSŪTRAM
with Tantracūḍāmaṇi.

Substance—Palm leaf. Size—16″ × 1½″. Leaves —122. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas —4000. Incomplete.

Subject—Same as No. 675.

Beginning:

वेदोऽनादिर्यस्य निश्वासभूतः
पश्चान्माग्निर्वक्रतो यस्य जातः ।
....
.... मी मे स्यात् पातः ॥
निगमाय विनाशिकर्मणे
मुनये जैमिनये च सूरये ।
....
नम ईशाय कुमारिलात्मने ॥
वन्दे पूर्वोत्तरोदन्वन्मीमांसासङ्गमेश्वरम् ।
....रागा .... रं गुरुम् ॥
श्रुतिस्मृतिसदाचारप्रमाणप्रमितात्मनः ।
बोधाय धर्मतत्त्वस्य मीमांसार्थः समर्थ्यते ॥

वेदस्तावद् ऋग्यजुस्सामात्मा प्रभूतशाखाचितो विध्यर्थवादमन्त्रशरीरः प्रत्यक्षानुमेयविभागविभिन्नस्वरूपेण विगतधृतिबृहस्पतिप्रभृतीनामनवगाहः ।

End:

'अर्थवादो वा प्रकरणादि'ति वोक्तार्थः । नातिर्यायां नि-.... व्यानं विधीयते । कुतः प्रकरण ....यथालोच्य तथात्वे तद् बाध्यते इत्यर्थः' । अगम्यैवमिति न चेत् तत्राह्यर्थवादोऽयं भविष्यति ।

Colophon:

इति श्रीमत्परमवैष्णवधर्मप्रतिष्ठापकाचार्यश्रीरामाचार्यवर्य-

सुतश्रीकृष्णदेवविरचिते धर्ममीमांसासंग्रहे तन्त्रचूडामणौ प्रथमस्याध्यायस्य तृतीयः पादः ।

Author--Text—Jaimini.

Com : Śrī Kṛṣṇa Deva.

Remarks—The Ms. extends upto the 10th *Sūtra* of the 4th *pāda* in the 3rd chapter. It is printed at Benares. The colophon shows that the author was the son of Rāmācāryavarya, a staunch Vaiṣṇava.

॥ मीमांसासूत्रभाष्यम् ॥

686. MĪMĀMSĀSŪTRABHĀṢYAM.

Substance—Palm leaf. Size—17″ × 1¼″. Leaves—210. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—6300. Incomplete.

Subject—Same as No. 675.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ओम्—श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारभावः स्यात् । पूर्वेणाध्यायषट्केन प्रत्यक्षविहितधर्माणां कर्मणां दर्श-पूर्णमासादीनां कर्तव्यता चिन्तिता । उत्तरेणेदानीमविहितेति-कर्तव्यताकेष्वैन्द्राग्नादिषु चिन्तयितुमिष्यते ।

End :

जगत्सामि श्रूयमाणे ऋक्तः साम तदाख्यमित्यवगम्येत ।

कुतः। सामाभावात्। नहि कृत्स्नेऽपि सामवेदे जगन्नाम सामास्ति। तस्माद्यत्र जगत्यामुत्पन्नं साम जगत्सामा स विषुवान् ननु। शुक्राग्रो विषुवानित्युच्यते। नैष दोषः। सकामाय भविष्यति। तस्माद्विकृतौ विषुवति निवेश इति।

Colophon :

इति शाबरे भाष्ये दशमस्याध्यायस्य चतुर्थपादः।
करुणाकरेण लिखितमिदं पुस्तकम्।

Author—Śabarasvāmin.

Remarks—The Ms. opens with the 7th chapter and ends with the 4th *pāda* of the 10th.

॥ मीमांसासूत्रभाष्यम् ॥

687. MĪMĀMSĀSŪTRABHĀṢYAM.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—53. 10 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—2100. Incomplete.

Subject—Same as No. 675.

Beginning :

... ... द्वा कारणाभावादनि.....शश्च .....मसानां कर्तुस्तद्वचनत्वात्। स्या .... चमसेषु वर्षं कर्त्रादीनां भक्षः। प्रत्यते हि तेषां(?)। तत्र कारणं न च प्रतिषिध्यते। ननु चमसिनां प्रत्यक्षोपदेशान्निवर्तेरन्। उच्यते। अनिर्देशश्चमसानां

कर्तुः . . . . . नत्वात् । प्रेतु हेतुश्च . . . . . त्येवमादयः शब्दा न शक्नुवन्ति वषट्कर्त्रादि संप्रतिषेद्धुम् । उपदेष्टारो हि ते भक्षणस्य कर्तुः न प्रतिषेद्धारः ।

End :

प्रापयतः कथं वचनमिति गम्यते । सर्वास्वेव वैकृतीषु चोदनासु प्राकृतधर्मजातमपेक्ष्यते वाक्यशेषत्वेन । तत्रैव प्रकृत्यां चोदनायामनुपलभ्यते एवं वैकृत्यामपि न कश्चिद्विशेषोऽस्ति । तत्र यथा कृष्णलानां पाको प्रा . . . . . थो वचनप्रामाण्यात् क्रियते । एवमिदमवहन्याद्यप्रकृतार्थमपि सर्वं कर्तव्यम् ।

Colophon :

इत्याचार्यशबरस्वामिविरचिते मीमांसाभाष्ये नवमस्याध्यायस्य चतुर्थः पादः ।

Author—Same as No. 686.

Remarks—The Ms. commences from the 5th *pāda* of the 3rd chapter and extends to 4th *pāda* of the 9th. It has become almost mouldered.

॥ मीमांसासूत्रभाष्यम् ॥

688. MĪMĀMSĀSŪTRABHĀṢYAM.

Substance—Palm leaf. Size—22½″ × 2″. Leaves—152. 8—12 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—7600. Incomplete.

Subject—Same as No. 675.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

ओम्—भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते । प्रथमेऽध्याये प्रमाणलक्षणमुक्तम् । तत्र हि विध्यर्थवादमन्त्रस्मृतयस्तत्त्वतो निर्णीताः । गुणविधिर्नामधेयं च परीक्षितम् । सन्दिग्धानामर्थानां वाक्यशेषाद्यर्थाच्चाध्यवसानमुक्तम् । तन्न प्रमर्तव्यम् । अनन्तरं प्रधानानि परीक्ष्यन्ते भिन्नान्यभिन्नानि चेति । अत एवार्थोऽपि वर्णनीयः ।

Colophon :

अथ पुनः पर्यपेतेष्वाग्नेयमेव प्रथमेऽहन्यालभेरन् । सारस्वतीं मेषीं द्वितीये । सौम्यं वभ्रुं तृतीये वारुणं तन इति । तदनारभ्यवादानां प्रकृत्यर्थत्वात् ज्योतिष्टोमं प्रविष्टं तत्राह्नां बहुत्वस्याभावादपरां प्रकृतिं द्वादशाहमागतम् । तत्रापि पुनः पर्यपेतेष्वेतन्न युज्यते इति तृतीयां प्रकृतिं गवामयनं प्रविष्टम् । एवमागतस्यैतद्दर्शनमिति ॥

End :

इति शाबरे मीमांसाभाष्ये सप्तमस्याध्यायस्य चतुर्थः पादः ।

समाप्तश्चाध्यायः ॥

Author—Same as No. 686.

Remarks—The Ms. ranges from the 1st *pāda* of the 2nd chapter upto the end of 4th *pāda* of the 7th.

॥ मीमांसासूत्रभाष्यम् ॥

689 A. MĪMĀMSĀSŪTRABHĀṢYAM.

Substance—Palm leaf. Size—13″ × 2″. Leaves—73. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Subject—Same as No. 675.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नयमुक्तामणिनिकरैर्येन कृता स्वर्गसूत्रसंस्यूतैः ।

मीमांसाहारस्रग् जैमिनयेऽस्मै नमो मुनये ॥

अथातो धर्मजिज्ञासा । लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् । नाध्याहारादिभिरेषां कल्पनीयोऽर्थः परिभाषितव्यो वा । एवं वेदवाक्यान्येवैर्विचार्यन्ते । इतरथा वेदवाक्यानि विचारयितव्यानि । स्वपदार्थाश्च व्याख्येयाः ।

End :

ऋच इत्यस्ति वेदे अहिर्बुध्नीयं मन्त्रं मे गोपायेति । यमृषयस्त्रयीविदो विदुः ऋचो यजूंषि सामानीति । कथंलक्षणका ऋचः । तेषामृक् । यत्रार्थवशेन पादव्यवस्था यत्र पादकृता व्यवस्था स मन्त्र ऋङ्नामा । यथा अग्निमीळ इति । एवंजातीयकेषु मन्त्रेष्वभियुक्ता उपदिशन्ति । ऋचोऽधीमहे ऋचोऽध्यापयाम ऋचो वर्तन्त इति । यद्यर्थवशेनेत्युच्यते यत्र वृत्तवशेन तत्र न प्राप्नोति । अग्निः पूर्वेभिः ऋषिभिरिति । यथार्थवशेनेति वृत्तादिपदव्याघृत्यर्थम् । किं त.....

Colophon :

इति शाबरे भाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ।

Author—Same as No. 686.

Remarks—Only a fragment of chapter 2 is embodied in this Ms.

॥ मीमांसासूत्रभाष्यव्याख्या ॥

689 B. MĪMĀMSĀSŪTRABHĀṢYAVYĀKHYĀ.

Substance—Palm leaf. Size—13″ × 2″. Leaves—142. 10 lines per page and 36 letters per line. Script —Malayāḷam. No. of Granthas—3200.

Subject—Same as No. 675.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

हरते सर्वविघ्नानि कर्मसिद्धिविधायिने ।
तुभ्यमभ्यासवन्त्यपा महागणपते नतिः ॥

अथातो धर्मजिज्ञासा । सूत्रेऽस्मिन् शब्दतोऽर्थतश्च वृत्तविशेषासंभवेन लौकिकार्थत्वेऽध्याहारादिबाधकसद्भावेन चाथातःपदयोरलौकिकार्थाशङ्कां प्रसक्तां निवारयति । लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेऽपीत्यवगन्तव्यमिति । सति संभव इत्यर्थासंभवरूपं हेतुमासिद्धयति । लौकिकार्थत्वावगमायाध्याहारादियत्नः कार्य इत्यवगन्तव्यमित्युक्तम् ।

End :

सौभरसंबन्धाद् वृष्टिकामादीनतूह्य हीपादिसंबन्धे नियम्यमाने-

ऽर्थात् तदीयसौभरसंबन्धो नियम्यत इति सौभरं लक्ष्यते। कृतवति कृत्वा लक्षयितुमित्युक्तम्। अनेन च फलतः सौभरसंबन्धित्वेन प्राप्तप्रकृतवृष्टिकामाद्यनुवाद एवोक्तः। किमर्थं तु लक्ष्यत इति। प्रकृतवृष्टिकामाद्यनुवादः किमर्थ इत्यर्थः।

Colophon :

इति द्वितीयस्य द्वितीयः पादः।

Author :

Remarks—The Ms. comes to a close with the 2nd *pāda* of the 2nd chapter. The commentary is elaborate.

॥ मीमांसासूत्रभाष्यम् ॥

690. MĪMĀMSĀSŪTRABHĀṢYAM.

Substance—Palm leaf. Size—28½" × 2⅛". Leaves—6. 18—26 lines per page and 160 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 675.

Beginning—Same as No. 689 A.

End :

अपि चामनन्ति उत्ताना वै देवगवा वहन्तीति। ये देवानां गावः त उत्ताना वहन्तीत्युक्ते गम्यते। एतेन य उत्ताना वहन्ति .... हूयन्ते तस्मा.... ....

Colophon :

Author—Same as No. 686.

Remarks—Not less than 100 leaves are left blank in this Ms. Only six leaves at the beginning are written.

प्रकरणपञ्चिकान्तर्गता ॥ युक्तिवर्णना ॥

691. YUKTIVARṆANĀ.

Substance—Palm leaf. Size—11¾" × 1¼". Leaves—29. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Subject—Same as No. 674.

Beginning:

प्रभाकरमतं सम्यगालोच्य क्रियते मया ।
विषयं करणं चैव विवेक्तुं युक्तिवर्णना ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादिषु स्वर्गकामान्नियोज्यत्वेन सम्बध्यमानो नास्वर्गसाधने कार्ये बोद्धृतयान्वेतुमलम् । न च क्रिया क्षणभङ्गिनी कालान्तरभाविनः स्वर्गादेः साधनमुपपद्यते इति कालान्तरस्थायिक्रियातो भिन्नं कार्यमपूर्वं लिङादयो बोधयन्तीति स्थितम् । कार्यं च कृतेरीप्सितमुच्यते । कृतिर्व्यापार इति चानर्थान्तरम् ।

End:

नन्वेवमुपदिष्टत्वं पदार्थानां प्रसज्यते ।
कार्यवत्तैरपि यतो विध्यर्थोऽन्वित उच्यते ॥

उच्यते शाब्दतैव स्यान्नोपदेशप्रमेयता ।
प्रमाणं न त्वभेदोऽयमुपस्थाननिबन्धनः ॥
उपदेशोपस्थितो यो वाक्यार्थोऽन्वयमृच्छति ।
स औपदेशिको ज्ञेयः स च द्वैधमवस्थितः ॥
ग्रन्थेनोपस्थितश्चैव विध्यर्थोपस्थितस्तथा ।
यथोपकारप्रकृतिर्नियोज्यो वा यथा श्रुतः ॥
प्रकारोपस्थितो यश्च द्वेधा नामावुपस्थितः ।
अतो नौपदेशिको यः केवलं कार्यवर्धनः ॥

Colophon :

पूर्वनिबन्धनिबद्धं व्यपनेतुं मोहमीहमानेन ।
शालिकानाथेन कृतः कृतिनामानन्ददः परो (य)त्नः ॥
नमः शिवाय । नमो नारायणाय । श्रीकृष्णाय नमः ।
गीर्वाणेन्द्रसरस्वत्याः प्रियदासेन केनचित् ।
लिखिता शालिकाद्यस्य नाथस्य कृतिरीदृशी ॥

Author—Śālikanāthamiśra.

Remarks—The script is very steady. The leaves have begun to decay.

॥ वाक्यार्थमातृकावृत्तिः (प्रकरणपञ्चिकान्तर्गता) ॥

692. VĀKYĀRTHAMĀṬṚKĀVṚTTI.

Substance—Palm leaf. Size—11¾″ × 1¾″. Leaves—57. 6—7 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Same as No. 674.

Beginning :

... . पयसो नास्ति । तादृशेऽपि तस्मिन् दधिस्वरूपमात्रोपलब्धेः । न च तां प्रति पयस एव निरपेक्षस्य हेतुता । अनुपनिपतिते हेत्वन्तरे पयस एवोपलब्धेः । न चेदं पयोन्तरमुपलभ्यत इति शक्यते वक्तुम् । प्रत्यभिज्ञानस्याभेदसाधकत्वात् । ननु च हेत्वन्तरापेक्षित्वे ध्रुवभाविता नोपपद्यते । ध्रुवभावित्वेन कुतोऽवगम्यते । दर्शनादिति चेत्, हेत्वन्तरेणैवावश्यं भवितव्यमिति ।

End :

"लक्षणानभिमानस्तु मुख्यर्थानवधारणात् ।
ये तु मुख्यार्थकुशलास्तेषां लाक्षणिकव्यधीः ॥"

इति । मुख्यमर्थान्तरमपि लाक्षणिकमप्यर्थं श्रौतमिव मन्यन्ते म्लेच्छा इव यवनवाक्यार्थम् । विवेकिनां तु परीक्षकाणां लाक्षणिकव्यधीरित्युपसंहरति—

तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम् ।
वेदवाक्यं ब्रवीतीति संक्षेपोऽयमुदाहृतः ॥

ग्रन्थस्य कर्तुः संज्ञां प्रयोजनं चाह—

वाक्यार्थमातृकेयं प्राभाकरमतानुसारेण ।
अनसूयुबोधनाया शालिकनाथेन संग्रहिः ॥
सच्चरितानामनुग्रहार्थमवितुः कामेन ।
वाक्यार्थमातृकाया वृत्तिरियं शालिकेनैव ॥

Colophon :

इति वाक्यार्थमातृकाया वृत्तौ द्वितीयः परिच्छेदः ।

Author—Same as No. 691. Aut & Com. शालिकनाथ:

Remarks—The closing lines prove that Śālikanātha is the author of both the text and the commentary. A portion in the beginning is missing.

॥ वाक्यार्थरत्नम् (सुवर्णमुद्रोपेतम्) ॥

693. VĀKYĀRTHARATNAM with Suvarṇamudrā.

Substance—Palm leaf. Size—$11\frac{5}{8}'' \times 1\frac{1}{4}''$. Leaves 101. 4—7 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—1200.

Subject—Disquisition on the coherence of words and sentences.

Beginning :

हरिः ओम् । शुभमस्तु ।

कालिन्दीपुलिने लोलं नानालीलालसाननम् ।
कलवेणुरवाकृष्टसत्त्वसत्त्वं भजे महः ॥

ननु अस्य ग्रन्थस्य कृत्स्नशास्त्रप्रमेयसम्बन्धित्वाभावेन प्रकरणतया एकदेशसम्बन्धित्वेऽपि शास्त्रे प्रमेयान्तराण्यपि सन्तीति किमिति तदनिरूपणेन एतन्निरूप्यत इत्यत आह—

धर्मं च विषयीकृत्य मीमांसा वर्तते स च ।
चोदनालक्षण इति भगवानाह जैमिनिः ॥
श्रूयते वचनं वेदे यत् क्रियायाः प्रवर्तकम् ।
तच्चोदनेति मुनिना शबरस्वामिनेरितम् ॥

प्रवृत्तिजनकं चार्थमभिधत्ते हि यद्वचः ।
प्रवृत्तिजनकश्चार्थः को वेत्यत्र विचार्यते ॥
तत्र विप्रतिपद्यन्ते वादिनो बहुधा यथा ।

अथातो धर्मजिज्ञासेति धर्मस्य विचारविषयतया मीमांसारम्भं प्रतिज्ञाय को धर्म इत्याकाङ्क्षायां चोदनालक्षणोऽर्थो धर्म इत्यभिहितं मीमांसाशास्त्रकृता जैमिनिना ।

End :

तत्रारभ्याधीतेषु अङ्गत्वनिश्चये प्रधानाधिकारेणैव निराकाङ्क्षता । अनारभ्याधीतेष्वन्यतोऽनुष्ठानार्थमेवाधिकाराकाङ्क्षा । अन्यतो लब्धानुष्ठाने त्वध्ययनविधौ विधित्वार्थमेव तदपेक्षेति । तदाह भवनाथः--विध्यन्तरेषु चानुष्ठानार्थाधिकारे लब्धे विधितासिद्धिः । इह त्वन्यतोऽनुष्ठाने लब्धे विधित्वार्थमेव पुरुषविशेषपर्यवसानापेक्षेति कृत्याश्रयपुरुषविशेषाप्रतीतौ पुरुषविशेषनिष्ठकृतिजननशक्तप्रवृत्तिहेतुविध्यपरपर्यायकार्याभिधायिता लिङादीनां न सिध्यतीति तत्सिद्ध्यर्थं पुरुषविशेषाकाङ्क्षा सर्वविधीनामिति सिद्धम् ।

Colophon :

इत्यहोबलविरचितायां वाक्यार्थरत्नतात्पर्यप्रकाशिकायामुपोद्घातो नाम प्रथमः परिच्छेदः ।

इत्यहोबलाचार्यविरचितायां वाक्यार्थरत्नतात्पर्यप्रकाशिकायां सुवर्णमुद्रायाम् अपूर्वस्य कल्प्यत्वनिरूपणेन लिङाद्यभिधेयत्वनिरूपणं नाम तृतीयः परिच्छेदः ।

Au. & Com.
Author—Ahobala.

Remarks.—The Ms. is slightly decayed. Vākyārtharatnatātparyaprakāśikā and Suvarṇamudrā are identical works.

तन्त्रवार्तिकव्याख्या-व्याख्या॥ विजया ॥ C. on Ajita of Parthasārathi miśra, which is a C. on Tantravārttika.

694. VIJAYĀ.

Substance—Palm leaf. Size—19½″ × 2″. Leaves—44. 11 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Subject—Same as No. 675.

Beginning:

.... जनवत्त्वेन प्रमाणलक्षणोपयिकत्वेन च प्रसङ्गाद्विचार्यते । एष च श्लोकार्थः । सिद्धप्रमाणभावस्य नित्यतया वे ..... धर्म एवोपयोग उच्यते । सर्वश इति । सर्वप्रकारम् । यावन्तः प्रकारा धर्मप्रमित्युपयोगिनः सम्भवन्ति । धर्मप्रमाणेन .....क्षितं तत्प्रतिपादनद्वारेणेत्यर्थः । अ.....नतिचापसरतः प्राप्तिं वदन् प्रासङ्गिकतां दर्शयतीति व्याख्येयम् ।

End:

जातिव्यक्तिरूपावित्यनेन जात्या सङ्कीर्णा इत्यस्यार्थे उक्तः । नरस्मृतिषु कृतो विवेकः । एषैव हीतिहासपुराणयोरित्यादिना वि.....स्थानान्तरेऽपि न्यायाविस्तरपर्यन्तं दर्शितः । किमिदानीं प्रायेण हीत्यादिना वक्तुमारभ्यतेऽत आह स्मृतीनां परंपरयेति ।

प्रामाण्ये प्रयोजनं दे ... ...
... ... ।

Colophon :

इत्यजिताचार्यापरनामधेयानन्तनारायणमिश्रविरचिते-
ऽजितानिबन्धने विजयाख्ये प्रथमस्याध्यायस्य द्वितीयः पादः ।

Author—Anantanārāyaṇa Miśra *alias* Ajitācārya.

Remarks—Several leaves are missing and those extant are much damaged. Though the opening leaf is numbered alphabetically as 'न" (2) and the last as 'ङ्क' (74) the Ms. consists of 43 leaves only. The script seems to be antiquated.

॥ विधिरसायनम्(सुखोपयोजिनीसहितम्) ॥

695. VIDHIRASĀYANAM
with Sukhopayojinī.

Substance—Palm leaf. Size—18" × 2". Leaves—82. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—3100.

Subject—A thorough disquisition on *Vidhi*, *Niyama*, *Parisaṅkhya*, etc.

Beginning :

हरिः ॐ ।

श्रीगणपतये नमः ।

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।

यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतने ध्रुवस्थिरमहापाशक्षयः प्राणिनाम् ।
तद् ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रमालमूलरसिकं साक्षात्क्रियासं सदा ॥

यत् कुमारिलभतानुसारिणा निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं तत् सुखावगतये विविच्यते ॥

प्रारिप्सितप्रकरणाविघ्नपरिसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिप्य समाधत्ते—

विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसा-
माचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥

मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादपूर्वत्वान्नियमार्थो वा पुनः श्रुतिः परिसंख्या वा इत्यादिषु त्रयोऽपि विधिप्रकाराः प्रसिद्धाः अपूर्वविधिः नियमविधिः परिसंख्याविधिरिति ।

End :

नन्वेवमप्युत्तरेऽहनि द्विरात्रस्य गृह्यते इति षोडशे ग्रहनियमविधौ लक्षणस्याव्याप्तिः । तत्र षोडशिग्रहप्राप्तिव्यतिरिक्तास्तेन सह प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्ते.....वेन न षोडशिग्रहप्राप्तौ तदभावनिवृत्तिनियतत्वाभावसम्भवादिति चेद्-

भेदेऽपि व्याप्तिसत्त्वेन तत्संभवाद् भेदगर्भव्याप्तेरविवक्षितत्वात् ।

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ विधिरसायनसुखोपयोजिन्यां पूर्वपक्षसंक्षेपः ।

Au. & Com.

Author—Appayyadīkṣita.

Remarks—The Ms. comprises the text and its commentary Sukhopayojinī. The author explains the abstruse and inexplicable verses clearly.

॥ शास्त्रदीपिका ॥

696. ŚĀSTRADĪPIKĀ.

Substance—Palm leaf. Size—18½" × 1½". Leaves—176. 8—10 lines per page and 72 letters per line. Script—Grantha. No. of Granthas—7100. Incomplete.

Subject—Same as No. 675.

Beginning :

.....ते । तस्मात् पुरुषार्थ एव.....ष्टार्थं भवति नियम.....कार्याभावात्.....ममद्.....स्मात् अदृष्टमपि पुरुषार्थार्जनविषयत्वान्नियमस्य तदङ्गमेव कल्प्यते । तेनासावु-

पायान्तरेण.... ....ध्यते तस्मात् पुरुषार्थो द्रव्यपरिग्रहः। केचित्तु नियम एव....ध्यत इत्याहुः। तद् यथाभाष्यम्। तथा च सति पुरुषार्थस्यापि द्रव्यस्यापूर्वपक्षेऽपि सद्भावात् सिद्धान्तवत् पूर्वपक्षेऽपि क्षामवत्याः क्रत्वर्थता न सिध्यतीति तदुपन्यासो नावकल्प्येत। तथा द्रव्यार्जनप्रक्रमादेव क्रतुप्रक्रमे दोषो यः सिद्धान्तिना पूर्वपक्षिणं प्रत्यापादितः, सोऽपि न स्यादित्यास्तां तावत्।

End :

"राजयाजकयाज्यस्य विनश्यति यथा हविरि"त्यत्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः। "लिङ्गानि च दर्शितानि ब्राह्मणानामिदं हविरि"त्येवमादीनि। तस्माद्ब्राह्मणानामार्त्विज्यमिति सिद्धम्।

मध्येतन्त्रं यस्य येषां विधानं
तेषु प्रोक्तो मुख्यतन्त्रप्रसङ्गः।
जिज्ञास्यो यो धर्म उक्तश्चतुर्धा
स प्रज्ञातो लक्षणैर्द्वादशान्तैः॥

श्रीरामाय नमः।

Colophon :

इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशाध्यायस्य चतुर्थः पादः।

हरिः ओम्।

Author—Pārthasārathimiśra.

Remarks—The Ms. covers chapters 4—12. It is printed in N. S. Press, Bombay.

॥ श्लोकवार्त्तिकम् (शाबरभाष्यव्याख्या) ॥

697. ŚLOKAVĀRTTIKAM.

Commentary on Śābarabhāṣya.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—106. 6—7 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—750. Incomplete.

Subject—A lucid exposition of Śābarabhāṣya, in verse.

Beginning:

... ...

... . स्यात् सामान्यज्ञानसंहितात् ॥
तस्य चाप्यनुमानस्य भवेल्लिङ्गेन चोद्भवः ।
अनुमानान्तरादेव ज्ञातेनैवं च कल्पने ॥
लिङ्गलिङ्ग्यनुमानानामानन्त्यादेकलिङ्गिनि ।
गतिर्युगसहस्रेषु बहुष्वपि न विद्यते ॥
अथ सामान्यभूतेऽपि लिङ्गेऽन्यस्माद्गतिर्भवेत् ।
प्रमाणादप्रमाणाद्वा लिङ्गिन्यपि तथा भवेत् ॥
एवमप्यनुमानस्य नित्योच्छेदः प्रसज्यते ।
प्रमाणान्तरमेव स्यात् सामान्यस्यावबोधकम् ॥
अप्रमाणावबुद्धाद्वा लिङ्गाल्लिङ्गिनि या मतिः ।
सापि मिथ्या भवेन्नित्यं बाष्पजाताग्निबुद्धिवत् ॥

End:

विधिरूपप्रवृत्तिर्वा शब्दोऽपोहेन वर्तते ।
अनुमानाङ्गभूतत्वाद्यथैव प्रतिषेधकः ॥

जाति वा न ब्रवीत्येष व्यक्तिं वा तद्विशेषिताम् ।
प्रमायामङ्गभूतत्वात् त्वक्श्रोत्रादिर्यथैव च ॥
एवं साधनमार्गेण वाच्यावाच्यनिरूपणम् ।
नावतिष्ठत इत्येतत् कथ्यते लोकवर्त्मना ॥
साम्नादिभिर्विशिष्टत्वमाकृतेरुच्यते कथम् ।
य ... ... ॥

Colophon :

अपोहवादः समाप्तः ।

Author—Bhaṭṭakumārila.

Remarks—The Ms. opens with Anumānavāda and concludes with Apohavāda. The last 12 leaves are left blank. The front page is numbered 162. The foregone portion is missing.

॥ सिद्धान्तरत्नाकरः ॥

698. SIDDHĀNTARATNĀKARA.

Substance—Palm leaf. Size—10¾" × 1¾". Leaves—86. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Subject—Logical fallacies in Mīmāmsā.

Beginning :

हरिः । अविघ्नमस्तु । गणेशाय नमः ।

लक्ष्मीवल्लभलोचनालिलसितं यत्पादपङ्केरुहं
यन्मूर्त्तिः सशिना विभाति यमुनायुक्तेव देवापगा ।
यस्य ज्या रथतांगताभरणतां ज्याचापचूडामणि-
श्चक्रत्वं सदनत्वमाप च धनुः स श्रीशिवः पातु नः ॥

आ सेतोरा हिमाद्रेश्चतुरधिकशतं यः प्रबन्धान्निबध्नन्
सन्मार्गं ध्वान्तरुद्धं सदकृत यशसां सान्द्रगोचिःप्रकाशैः ।
श्रीकण्ठस्यावतारः स्वयमिति विदुषां यच्चरित्रैः प्रवाद-
स्तस्मै कुर्मो नमोऽस्मत्कुलजलधिसुधारोचिषेऽप्पय्यनाम्ने ॥

श्रीदक्षिणामूर्त्तये नमः । विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात्।
अध्याये नवमे निरूपणमतो ह्यहस्य पूर्वं कृतं
यस्मात् प्राकृत एव कश्चिदपरस्त्वङ्ग विकारो हि सः ।
बाधस्त्वस्य निवर्त्तकस्तदनु.....प्रकृत्यङ्गता
बोद्धुर्यद्विरहो भवेत् प्रकृतिसम्यङ्गस्य बाधाभिधः ॥

तत्रेदं प्रथमं विचार्यमपि किं चोद्यं स्वरूपेण वा
किं वा प्राकृतकार्यमेव विकृतावङ्गं समस्तं त्विति ।
कल्पोऽयं प्रथमस्तु तत्र च तथा बोध्यं प्रयाजादिकं
तत्त्वेनैव हि चोदकेन विधिभिश्चोद्यं यथा प्राकृतैः ॥

End:

तद्वत् स्यादपि चाग्निगुक्तुपशुनां वाजपेये तथा
प्राजापत्यगणस्य चाप्यसकृदेवाग्नेययागद्वये ।
आवृत्त्यै हि तथा प्रदानविषये याज्यानुवाक्ये मनो-
तामन्त्रोऽप्यवदान एवमिति शिष्येभ्योऽभणज्जैमिनिः ॥

Colophon:

भारद्वाजकुलाम्बुधेरुदितवान् सर्वज्ञचूडामणिः
स्वच्छश्चन्द्र इवापरः कुवलयानन्दैकहेतुर्हि यः ।

तस्यैतस्य कृतौ चतुर्थचरणः सिद्धान्तरत्नाकरे
तत्रैकादशलक्षणे कविमणेर्विश्वेश्वरस्यागमत् ॥
प्रज्ञावासुकिना हि तन्त्रजलधिं निर्मथ्य कृत्वा कृतीः
प्राच्यां मन्दरमर्थसारनवनीतं वचःकुम्भगम् ।
येनोन्मादितमाविवन् विबुधतां प्राज्ञव्रजो यात्यगा-
दैकादशलक्षणो विरचितो विश्वेश्वरेणामुना ॥

इति श्रीविश्वेश्वरविज्ञविरचिते सिद्धान्तरत्नाकरे एकादशस्याध्यायस्य चतुर्थः पादः ।

अध्यायश्च समाप्तः ।

Author—Viśveśvaravijña.

Remarks—The Ms. gives the gist of chapters 10 & 11 of Mīmāmsādarśana, in verse.

॥ व्याकरणम् ॥

॥ अगदा (परिभाषेन्दुशेखरव्याख्या) ॥

699. AGADĀ.

Commentary on Paribhāṣenduśekhara.

Substance—Palm leaf. Size—15″ × 2″. Leaves—154. 9 lines per page and 44 letters per line Script—Grantha. No. of Granthas—3800.

Subject—Elucidative exposition of the technicalities in Vyākaraṇa.

Beginning:

श्रीगणेशाय नमः ।

ब्रह्मादयो यस्य न पारमापुवन्
गङ्गाद्भुतं मस्तकदेशवासिनी ।
वामार्धदेहापि न चण्डिका च यं
ध्यायामि देवं सनकाभिवन्द्यम् ॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
विवृतिं परिभाषेन्दुशेखरे तनुतेऽगदाम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम् इष्टदेवतानतिरूपं मङ्गलमाचरन् शिष्याशिक्षायै व्याख्यातृश्रोतृणामनुपङ्गतो मङ्गलाय च निबध्नाति—नत्वेति । निर्गुणमूर्तेर्नत्यसम्भवादाह । साम्बेति ।

End :

तथेति । तथा इति भाष्यत्वादिति । कैयटोक्तेरित्यन्वयः । अर्थः प्रयोजनम् । यावदिति पदगौरवलाघवमपीत्यर्थः । अत्र भाष्यं तु पदलाघवपक्षेणापि रूपितामिति । तत्र तदुक्तम् । एवं "ज्ञाजनोर्जा" इति सूत्रभाष्यमप्यत्र गमकं बोध्यमित्यन्यत्र विस्तरः इति सर्वमनवद्यमिति ।

Colophon :

इति श्रीमत्पायगुण्डोपाख्यमहादेवसुतवैद्यनाथकृतपरिभाषेन्दुशेखरकाशिका परिपूर्णा । श्रीशिवाय नमः ।

Author—Vaidyanātha.

Remarks—The Ms. is written in neat legible hand.

॥ अगदा (परिभाषेन्दुशेखरव्याख्या) ॥

700. AGADĀ.

Commentary on Paribhāṣenduśekhara.

Substance—Palm leaf. Size—14″×2″. Leaves—108. 11—13 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—3800.

Subject etc.—Same as No. 699.

॥ अष्टाध्यायी (सवार्त्तिका) ॥

701. AṢṬĀDHYĀYĪ
with Vārttika.

Substance—Palm leaf. Size—6⅞″×1¾″. Leaves—134. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Subject—The rules of Sanskrit Grammar.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु !

सू—अइउ(ण्) । ऋऌ(क्)... ... ...

... ... हल् ॥

वा—अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्यानम् ।

सृ—वृद्धिरादैच् । अदेङ्गुणः । इको गुणवृद्धी । नश्चातुलोप आर्धधातुके । क्ङिति च ।
वा-मृजेः क्ङित्यचि वेष्यते ।

End :

अ अ ।

दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते । संवृतेन सर्वगुणस्य त्रिमात्रिकस्य ग्रहणमिष्यते । रपाभ्यामुभौ ष्टुनोदस्थास्तम्भ्वोर्ष्टौ । सर्वस्य पूर्वत्र मतुवसो रपाभ्यां चत्वारि ।

Colophon :

इति पाणिनीये सूत्रे अष्टमस्याध्यायस्य चतुर्थः पादः । अष्टमोऽध्यायः समाप्तः ।
वृद्धिर्गाङ्भूवादय आक्डारात् समर्थः पूर्वनिभिहिते द्विगुः प्रत्ययः कर्मण्यादयो धातुसम्बन्धे ङ्याप्तेन युष्मत् प्राग्वहतेः प्राक्क्रीताद्यान्यानां प्राग्दिशः पादशतकस्य एकाचो बहुव्रीहावलुगङ्गस्य युवोम्मिचि देविकाणौ च ङि सर्वस्य पूर्वत्र मतुरपाभ्यां द्वात्रिंशत् पादादयः । वृद्धिः समर्थः प्रत्ययः ङ्याप् प्राक्कृतात् एकाचो युवोम्सर्वस्याष्टौ ।

श्रीकृष्णाय परब्रह्मणे नमः । सोमेश्वरी रक्षतु । श्रीपद्मनाभाय नमः ।

Author: Sūtra—Pāṇini.
Vārttika—Kātyāyana.

Remarks—The Ms. is in good condition. It is held together by ivory plates. The last 25 leaves are missing.

॥ अष्टाध्यायी (सवार्त्तिका) ॥

702. AṢṬĀDHYĀYĪ
with Vārttika.

Substance—Palm leaf. Size—$5\frac{5}{8}'' \times 2\frac{1}{2}''$. Leaves—57. 16—20 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject—Beginning—Same as No. 701.

End :

अ अ । ह्रस्वस्यैवात्र ग्रहणमिष्यते ।
एषाम्यामुभौ प्लुतो दीर्घप्लुतौ वा ।

इति पाणिनीये सूत्रे सवार्त्तिके अष्टमस्याध्यायस्य चतुर्थः पादः ।

Remarks—Two leaves at the end of the Ms. are left blank. The script is unusually dense.

॥ अष्टाध्यायी (सवार्त्तिका) ॥

703. AṢṬĀDHYĀYĪ
with Vārttika.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—45. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Subject—Same as No. 701.

Beginning :

सू— अइउ(ण्)... ... ...

... ...हल् ।

वा— अटां मध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्तव्यः ।

End :

अ अ ।

दीर्घप्लुतयोरनेकाकारेण ग्रहणं नेष्यते । संशतेन सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते ।

Colophon :

इति पाणिनीये सूत्रेऽष्टमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

रषाभ्यामानिलोड्वानिंसाचोरह इति त्रयम् ।

द्वादशोऽदः पूर्वपूर्वाण्यष्टमस्यान्त्यपादके ॥

श्रीगुरवे नमः । श्रीगुरुभ्यो नमः ।

Author—Remarks—Same as No. 701.

॥ अष्टाध्यायी (सवार्त्तिका)॥

704. AṢṬĀDHYĀYĪ with Vārttika.

Substance—Palm leaf. Size—14″ × 1⅞″. Leaves—45. 10—12 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Subject etc.—Same as No. 701.

॥ अष्टाध्यायी ॥

705. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—11¼" × 1¼". Leaves—136. 4 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Subject—Author—Same as No. 701.

Remarks—The leaves are much damaged.

॥ अष्टाध्यायी ॥

706. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—12" × 1¾". Leaves—75. 6—8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Author—Same as No. 701.

Remarks—The first leaf contains certain verses from Sūrya Śataka. Just after the colophon occur the following verses:

"यत्र तत् परमं पदं विष्णोर्लोके महीयते ।
तत्र माममृतं कृधीन्द्रायेन्द्रोपरिस्रव ॥
यत्रानुकामं चरणं त्रिनाके त्रिदिवे शतम् ।
तत्र माममृतं कृधीन्द्रायेन्द्रोपरिस्रव ॥"

॥ अष्टाध्यायी ॥

707. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—48. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Remarks—The Ms. is much worn out. Just after the colophon occurs the following:

"ഇതു് കൊല്ലം ൭൦൧-മത മീനമാസം ൨൭-നു വെള്ളിയാഴ്ചനാളെഴുതി ഇട്ടിരാരച്ചൻ എന്നറിക. പാരം മനസ്സുചെലുത്തിയെഴുതിയെന്നറിയേണം"

॥ अष्टाध्यायी ॥

708. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—63. 7—9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Remarks—One leaf at the end is left blank in this Ms. Thereafter two leaves are devoted to certain topics in Gaṇita.

॥ अष्टाध्यायी ॥

709. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—116. 8 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—900. Complete.

Remarks—The Ms. is slightly decayed.

॥ अष्टाध्यायी ॥

710. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{8}''$. Leaves—82. 5—7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—450. Incomplete.

Remarks—The Ms. concludes with *Sūtra 122, Pāda 1*, chapter 5.

॥ अष्टाध्यायी ॥

711. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{4}''$. Leaves—74. 7—8 lines per page and 26 letters per line. Script—Malayāḷam. No of Granthas—900.

Remarks—This Ms. comes to an end with *Sūtra 49, Pāda 4*, chapter 8. The final leaf is missing.

॥ अष्टाध्यायी ॥

712. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—$8\frac{3}{4}'' \times 1\frac{1}{4}''$. Leaves—61. 5—6 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Remarks—The Ms. is very much decayed. It comes to a close with chapter 5, *Pāda 1, Sūtra 57*. One of its edges has been corroded by rats.

॥ अष्टाध्यायी ॥

713. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—$8\frac{3}{8}'' \times 1\frac{3}{4}''$. Leaves—31. 9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Remarks—This Ms. extends upto a fragment of the *3rd pāda* in the 5th chapter.

॥ अष्टाध्यायी ॥

714. AṢṬĀDHYĀYĪ.

Substance—Palm leaf. Size—5″ × 1¼″. Leaves—182. 7—9 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Remarks—The portion containing the Vārttika appears to be a later addition.

॥ कठिनप्रकाशिका (महाभाष्यप्रदीपव्याख्या) ॥

715. KAṬHINAPRAKĀŚIKĀ.

Commentary on Mahābhāṣyapradīpa.

Substance—Palm leaf. Size—14⅓″ × 2″. Leaves—136. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4300.

Subject—A simple and lucid elucidation of all abstruse portions in the Mahābhāṣyapradīpa.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अइउण् । अथ वर्णानामुपदेश इति वर्णोपदेशप्रयोजनस्य विचारितत्वादाह्निकारम्भवैयर्थ्यमाशङ्क्योपपादयति सर्ववर्णानिति। केषुचिद् वर्णेषु विवृतत्वादिविचारो विशेषशब्दार्थः । अन्यत्र विचारितत्वेन ग्रन्थकृदुपेक्षितं स्वरसन्ध्यभावं स्वयं दर्शयति—

स्वरेति। आदिरन्त्येनेत्यस्य वर्णोपदेशैनकवाक्यत्वात् स्वात्मनि वृत्तिविरोधात् संज्ञानिष्पत्तिरिति भावः।

End:

चशब्दो वाशब्दार्थे। प्रश्ने संशयबीजं दर्शयति—प्राथम्यस्येति। प्रथममुच्चारितो यः शब्दो भावमाह, तस्य संज्ञेति शब्दतः प्राथम्यपक्षः। यद्यपि पुत्रीयतीति समुदायापेक्षया पुत्रीयशब्दस्य प्राथम्यम्, तथापि अवयवत्रयात्मकेऽस्मिन् समुदाये प्रथमावयवपुत्रशब्देन भावाभिधायीति दोष इत्याह नात्रेति। ननु सनाद्यन्ता धातव इति धातुसंज्ञा भविष्यति। अत आह सनाद्यन्ता इति। पुत्रीयतीत्यत्र भावान्तराभावात् कथ.....ख्यस्य भावस्य प्रथममि... ... ...।

Colophon:

इति प्रथमस्य द्वितीये तृतीयमाह्निकम्।

Author—Nārāyaṇa.

Remarks—The Ms. starts from the *Pratyāhārāhnika* and terminates with "*Bhūvādi*" *sūtra*. The author's identity is not evident from this Ms. But another Ms. of the work available in the Curator's Office, Trivandrum, furnishes the name of the author.

॥ काशिकाविवरणपञ्जिका ॥

716. KĀŚIKĀVIVARAṆAPAÑCIKĀ.

Substance—Palm leaf. Size—16½″ × 1¾″. Leaves—

104. 8—9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Elucidative exposition of the Kāśikā.

Beginning :

हरिः । ॐ । भूवादयो धातवः । भू आदिर्येषां ते भूवादयः । गणपरिपठिता भूवादयः । भवतीत्यादि । अत्र धातुसंज्ञायां सत्यां धातोरिति वर्तमाने वर्तमाने लडिति लड् भवति । भू इत्येवमादयः शब्दा धातुसंज्ञा भवन्तीति । एतेन गणपाठेनेयं धातुसंज्ञेति दर्शयता आयणयत्यादीनां धातुसंज्ञा भवतीत्युक्तं भवति ।

End :

अतः सामर्थ्यादेकस्यैव कर्तृग्रहणं विशेषणम्, न तृचः । अपां स्रष्टेति । अपामिति कर्मणि षष्ठी । स्रष्टेति व्रश्चादिपत्वम् । सृजिदृशोर्झल्यमकितीति अमागमः । ननु चेत्यादि । याजकादिपाठाद् भवितव्यमेवात्र समासेनेत्यभिप्रायः । संबन्धिशब्दस्येत्यादि परिहारः । पाचक इति । आतो युक् चिण्कृतोरिति युक् । अथ किमर्थं तृचः सानुबन्धकस्योच्चारणम्, तृनो निवृत्त्यर्थम् । नैतदास्ति, तद्योगे न लोकाव्ययेत्यादिना षष्ठीप्रतिषेधात् ।

Colophon :

इत्याचार्यजिनेन्द्रबुद्धिविरचितायां काशिकाविवरणपञ्जिकायां द्वितीयस्याध्यायस्य प्रथमः पादः ।

Author—Jinendra Buddhi.

Remarks—This Ms. ranges from the 3rd *pāda* in the 1st chapter to the 16th *sutra* in the 2nd *pāda* of the 2nd chapter.

॥ काशिकावृत्तिः ॥

717. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—20″ × 2″. Leaves—222. 8—12 lines per page and 68 letters per line. Script—Grantha. No. of Granthas—9500. Incomplete.

Subject—Explanation of the Pāṇini sūtras.

Beginning:

हरिः । श्रीगणपतये नमः । पाणिनये नमः ।

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः ॥
इष्टयुपसंख्यानवती शुद्धगुणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥
व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत् ।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ॥

अथ शब्दानुशासनम् ।

केषां शब्दानाम् । लौकिकानां वैदिकानां च । कथमनुशासनम् । प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन लाघवं भवतीति । अथ किमर्थो वर्णानामुपदेशः । प्रत्याहारार्थः । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः ।

End:

गार्गिकया श्लाघते । काठिकया श्लाघते । गार्ग्यत्वेन कठत्वेन विकत्थत इत्यर्थः ।

Colophon:

इति काशिकायां वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः ।

Authors—Vāmana and Jayāditya.

Remarks—This Ms. comprises four chapters and a fragment of the 5th. It is printed in the Medical Hall Press, Benares.

॥ काशिकावृत्तिः ॥

718. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—$22\frac{1}{2}'' \times 2''$. Leaves—232. 7—11 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—10400. Incomplete.

Subject—Same as No. 717.

Colophon:

इति काशिकायां वृत्तौ षष्ठस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ।

Author—Same as No. 717.

Remarks—The first twenty leaves are missing.

On the 21st leaf occurs the 40th *sūtra* of the 3rd *pāda* in the first chapter. The closing chapter here is the sixth. This Ms. including the missing portion is printed in the M. H. Press, Benares.

॥ काशिकावृत्तिः ॥

719. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—11″ × 1¼″. Leaves—149. 7—8 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—4500.

Subject—Same as No. 717.

Colophon :

इति काशिकायां वृत्तौ षष्ठाध्यायस्य तृतीयः पादः ।

Author—Same as No. 717.

Remarks—The opening two leaves contain the Vṛtti on certain Sūtras in the 4th chapter and thence the codex proceeds upto the 3rd *pāda* in the 6th chapter.

॥ काशिकावृत्तिः ॥

720. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—19½″ × 2″. Leaves—

62. 12 lines per page and 84 letters per line. Script—Grantha. No. of Granthas—3960.

Subject—Same as No. 717.

Colophon :

इति काशिकायां वृत्तौ तृतीयाध्यायस्य प्रथमः पादः ।

Author—Same as No. 717.

Remarks—This Ms. extends upto the 2nd *pāda* of the 3rd chapter.

॥ काशिकावृत्तिः ॥

721. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—26″ × 1¾″. Leaves—50. 8 lines per page and 96 letters per line. Script—Malayāḷam. No. of Granthas—2400.

Subject—Same as No. 717.

Colophon :

इति काशिकायां वृत्तौ द्वितीयस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ।

Author—Same as No. 717.

Remarks—The first three leaves are missing. Though the closing number of the leaves is 53, only 50 are extant here. Most of the leaves

are damaged. The Ms. comprises a portion of the 1st as well as the whole of the 2nd chapter.

॥ काशिकावृत्तिः ॥

722. KĀŚIKĀVṚTTI.

Substance—Palm leaf. Size—20″ × 2″. Leaves—80. 11 lines per page and 85 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Subject—Same as No. 717.

Colophon:

इति काशिकायां वृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ।

Author—Same as No. 717.

Remarks—The Ms. is decayed and the subject-matter is couched in a *prākṛt* dialect. The Ms. comprises the portion beginning from the 4th *pāda* of the 3rd chapter and ending with the major portion of *pāda* 3 of the 7th chapter. Several intervening leaves are missing.

॥ तत्त्वबोधिनी (सिद्धान्तकौमुदीव्याख्या) ॥

723. TATTVABODHINĪ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—15″ × 2½″. Leaves—

86. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3600. Incomplete.

Subject—Elucidation of the Siddhāntakaumudī on up-to-date lines.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नत्वा विश्वेश्वरं साम्बं कृत्वा च गुरुवन्दनम् ।

सिद्धान्तकौमुदीव्याख्या क्रियते तत्त्वबोधिनी ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते— मुनित्रयमित्यादिना । त्रयोऽवयवा यस्य तत् त्रयम् । संख्याया अवयवे तयप्, द्वित्रिभ्यां तयस्येत्ययच् ।

End:

आपं चैवेति । वष्टीत्यनुपज्यते । यथा वाचेति । परिगणनमिदमित्येके । अन्ये तूदाहरणमात्रमित्याहुः । अवगाह इति । अपिना साहचर्यादादिरेवाकारो लुप्यते नान्य इति भावः ।

Colophon:

इत्यव्ययानि ।

Author—Jñānendrasarasvatī.

Remarks—This Ms. proceeds upto the *Avyaya-prakarana*. It is printed in N. S. Press, Bombay.

॥ तत्त्वबोधिनी (सिद्धान्तकौमुदीव्याख्या) ॥

724. TATTVABODHINĪ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—156. 10—11 lines per page and 45 letters per line. Script—Grantha. No. of Granthas—4500. Incomplete.

Subject etc.—Same as No. 723.

॥ तत्त्वबोधिनी (सिद्धान्तकौमुदीव्याख्या) ॥

725. TATTVABODHINĪ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—61. 10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1900. Incomplete.

Subject etc.—Same as No. 723.

Remarks—This Ms. comprises the portion from the beginning to the end of *Svādisandhiprakaraṇa*.

॥ तत्त्वार्थदीपिका (रूपावतारव्याख्या) ॥

Seems to be diff. from another [illegible] Libro No. 802.

726. TATTVĀRTHADĪPIKĀ.

Commentary on Rūpāvatāra.

Substance—Palm leaf. Size—$19'' \times 2''$. Leaves—

94. 9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3100. Incomplete.

Subject—The derivation of words.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अभित्रिलोकीनालीकमाम्नायतन. . न्ति ये ।
तेभ्यः कल्याणहेतुभ्यो भूदेवेभ्यो नमो नमः ॥

अभिगतपडभिज्ञप्रक्रियोऽपि स्वयं यः
प्रथमसमयसज्जद्वासनावासितात्मा ।
अकलयदतिहृद्यं शब्दविद्यानुमोदं
स जयति नवकीर्तिः सन्मतो धर्मकीर्तिः ॥

अमुष्य हृदि वारिधिप्रतिनिधेः कृतेर्व्याकृतौ
कथं भवति योग्यता लघुरपीदृशां मादृशाम् ।
चिरान्महदनुग्रहादिह तु लब्धवाणीलवा-
दनुस्मरणहेतवे लिखितयाम्यहं केवलम् ॥

अत्र रूपावतारस्य पाठेषु विविधेष्वपि ।
एकस्यैव प्रयत्नोऽयमनुवृत्त्यै वितन्यते ॥

ग्रन्थारम्भे मङ्गलार्थं ग्रन्थकृत् प्रसिद्ध... ... ...
....ल्वाल्लौकिकस्मृत्या परमाचार्यं नमस्यति— येनाक्षरसमाम्नायमिति ।

End:

वच्यादीनामन्त्यस्य यणोऽसम्भवादन्त्यविकारेऽन्त्यसदेशस्येति

परिभाषायाः (अ)योजनाभावेनानाश्रयणाच्च सर्वेषां यणां सम्प्रसारणे प्राप्ते प्रतिषेधोऽयमुच्यते । व्यधेः विद्धः । व्यचेः विचितः । व्येजः संवीतः । ननु पूर्वपरयोर्यणोरेकयोगलक्षणं सम्प्रसारणं, तद्यदि परस्याभिनिर्वृत्तं पूर्वस्याप्यभिनिर्वृत्तमेव । न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या । अथ पूर्वस्यानभिनिर्वृत्तं परस्याप्यनभिनि.... ....

....

Colophon :

इति व्यञ्जनसन्धिः ।

Author :

Remarks—The leaves are almost mouldered.

॥ दुर्घटवृत्तिः ॥

727. DURGHAṬAVṚTTI.

Substance—Palm leaf. Size—14¾″ × 1¾″. Leaves —82. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—Examination of the words contradicting the rules in Pāṇinīya.

Author—Śaraṇadeva.

Remarks—This Ms. is published as No. 6 in TSS.

॥ दैवम् ॥

728. DAIVAM.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—19. 5—9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—300. Complete.

Subject—Treatment of roots having different meanings in their modes of formation of words varying in sense.

Author—Deva.

Remarks—This work is printed as number 1 in the TSS. Only the text is embodied here. The leaves are almost worn out.

॥ दैवम् (पुरुषकारसहितम्) ॥

729. DAIVAM
with Puruṣakāra.

Substance—Palm leaf. Size—9½″ × 1¾″. Leaves—45. 13 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 728.

Author: Text—Deva.
Com: Śrī Kṛṣṇalīlāśukamuni.

Remarks—This work is printed as No. 1 in TSS.

The commentary found here is incomplete. The leaves are much damaged.

॥ नीवी (रूपावतारव्याख्या) ॥

730. NĪVĪ

Commentary on Rūpāvatāra.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—154. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4500.

Subject—Same as No. 726.

Beginning:

... .त्यादि । यथासारम् । सारशब्देनात्र.... ....संक्षेपस्य सारः ।

... ...धातुप्रत्यय..... ....धातुभ्यः... ... प्रत्यया धातुप्रत्ययाः लडादयः तेषां पञ्जिकां विस्तरं लडादिप्रत्ययप्रपञ्चः संक्षेपेणोच्यत इत्यर्थः । तत्रापि लकार..... ....सनादिषु प्रथमं तिङ्...नालङ्कारा उच्यन्ते इत्याह अथ तिङ्विभक्तिरित्यादि ।

End:

इडो 'गाङ् । विभाषेति वर्तते अर्णावितौडपेक्षया परसप्तमी । संश्चङोगिति ण्यपेक्षया । सन् परे चङ्परे च णौ परत इडो विभाषा गाङादेशो भवति । अधिजिगापयिषति । अध्यापिपयिषति । चङि खल्वपि अध्यजीगपत् । अध्यापिपत् । इदं

सूत्रं प्रसङ्गादुक्तम् । ग्रन्थे त्ववसानसूत्रमिङश्चेति । अस्येवाधिजिगांसत इत्युदाहरणम् । अधिजिगांसते व्याकरणमित्येवमवसानो हि रूपावतारः । तदुक्तम्—

"इत्थं सुधीरधिजिगांसत इत्युदारो
रूपावतारमुपसंहृतवान् विधाय ।" इति ।

Colophon :

इति पारशवकुलतिलकेन शङ्करार्येण विरचिते नीवीसंज्ञके रूपावतारव्याख्याने अष्टमः परिच्छेदः ।

अस्तु मद्वागशेषापि देवस्य श्रीपतेः स्तुतिः ।
भवेद्वा स्वयमेवायं शब्दो विष्णुपदाश्रयः ॥

आदर्शदोषात् स्मृतिविभ्रमाद्वा
श्रुत्यर्थहीनं लिखितं मया यत् ।
तत् सर्वमार्यैः परिशोधनीयं
प्रायेण मुह्यन्ति हि ये लिखन्ति ॥

इत्थं सुधीरधिजिगांसत इत्युदारो
रूपावतारमुपसंहृतवान् विधाय ।
एतच्छ्रुतेरनु नरः खलु धर्मकीर्तिः
शास्त्रावतारमतिरेव भवेदतीव ॥

नखमुखविलिखितदितितनयोरः-
परिपतदसृगरुणीकृतगात्रः ।
हिमधरगिरिरिव गैरिकयुक्तो
नरहरिरहरहरवतु स युष्मान् ॥

Author—Śaṅkarārya Parāśara caste.

Remarks—Some leaves are lacking at the beginning. The Ms. is much damaged. The colophon bears out that the author belonged to Fāraśava family. 14 leaves at the end contain certain verses from Raghuvaṁśa.

॥ पदमञ्जरी (काशिकावृत्तिव्याख्या) ॥

731. PADAMAÑJARĪ
Commentary on Kāśikāvṛtti.

Substance—Palm leaf. Size—14″ × 2″. Leaves—70. 8 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Subject—Elucidative exposition of Kāśikāvṛtti.

Beginning :

समर्थः पदविधिः । परिभाषेयमिति । नाधिकारः, पदविधिग्रहणात् । अन्यथा वक्ष्यमाणानां पराङ्गवद्भावादीनां पदविधित्वाव्यभिचारादनर्थकं तत् स्यात् । परितः सर्वतः पूर्वत्र परत्र व्यवहिते अनन्तरेऽपि भाष्यते कार्यमनयेति करणे 'गुरोश्च हल' इति अकारप्रत्ययः ।

End:

नवतिशतमिति द्वन्द्वः । द्व्येकयोरिति सौत्रो निर्देशः । सप्तमीविशेषणे बहुव्रीहौ । कण्ठेकाल इति । यदा कण्ठे किञ्चिदस्तीति ज्ञाते कालो विशेषणं प्रयुज्यते । तदा सप्तमी ... ...

Colophon:

इति हरदत्तविरचितायां पदमञ्जर्यां द्वितीयस्याध्यायस्य प्रथमः पादः ।

Author—Haradatta, son of Padmakumāra (or Rudrakumāra in Sanskrit in I.O.)

Remarks—The Ms. is in excellent condition and extends from the beginning of the 2nd chapter to *sūtra* 32, *pāda* 2 of the same chapter. The work is printed in M. H. Press, Benares.

॥ पदमञ्जरी (काशिकावृत्तिव्याख्या) ॥

732. PADAMAÑJARĪ

Commentary on Kāśikāvṛtti.

Substance—Palm leaf. Size—23″ × 2″. Leaves—132. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—5300.

Subject—Same as No. 731.

Beginning:

व्यक्तप्रधानपुरुषात्मकमस्वतन्त्र-
मेतत् समस्तमधितिष्ठति यः स्वतन्त्रः ।
तस्मै शिवाय परमाय दशाव्ययाय
साम्बाय सादरमयं विहितः प्रणामः ॥

स्वं स्वं मनोरथमवाप्तुमपेतविघ्नं
यस्य प्रसादमनवाप्य न शक्नुवन्ति ।

पद्मासनप्रभृतयः प्रथमेऽपि देवा-
स्तद्वस्तु हस्तिमुखमस्तु मयि प्रसन्नम् ॥

तातं पद्मकुमारास्यं प्रणम्याम्बां श्रियं तथा ।
ज्येष्ठमग्निकुमारास्यमाचार्यमपराजितम् ॥
यश्चिराय हरदत्तसंज्ञया विश्रुतो दशसु दिक्षु दक्षिणः ।
उज्जहार पदमञ्जरीमसौ शब्दशास्त्रसहकारपादपात् ॥
तामिमामनुपधेन चेतसा भावयन्तु भुवि भव्यबुद्धयः ।
कः खलु प्रणयिनि प्रियंवदे मत्सरी भवति मद्विधे जने ॥
अविचारितरमणीयं कामं व्याख्याशतं भवतु वृत्तेः ।
हृदयङ्गमा भविष्यति गुणगृह्याणामियं व्याख्या ॥
इष्टदेवनमस्कारः कार्यः सन्नेह किं कृतः ।
वृत्तौ सूत्रे तथा भाष्ये वार्त्तिके च तदुच्यते ॥

मनसा वचसा च कर्मणा कृत एवायमिहानिवेशितः ।
नहि दर्भपवित्रपाणितार्द्यपरं मङ्गलमत्र कीर्त्यते ॥

वृत्त्यन्तरेष्वसन्तं गुणं वदन् वृत्तिकृन्निजे ग्रन्थे ।
प्रेक्षावतां प्रवृत्त्यै क्रियमाणं वस्तु निर्दिशति ॥
वृत्तौ भाष्ये इति ।

End:

देवदत्ताय शपत इति । शपथेन किञ्चित् प्रत्याययतीत्यर्थः । देवदत्तः श्रावत इति । ज्ञीप्स्यमान इति वचनात् कर्मसंज्ञैव वाध्यते न कर्तृसंज्ञेत्यर्थः । एवं गार्गिकया श्रावते सभायामिति कर-

णाधिकरणसंज्ञे न बाध्येते। क्वचित्तु देवदत्ताय श्लाघते इति पाठः। तत्रायं भावः। यस्यायाख्यायते स ज्ञीप्स्यमान इत्याख्यायमाना द्वितीयैव न्याय्येति। ये त्वाख्यायमानं वदन्ति तेषां यस्यायाख्याय.....ज्ञीप्स्यमान

Colophon :

इति हरदत्तमिश्रविरचितायां पदमञ्जर्यां प्रथमस्याध्यायस्य द्वितीयः पादः।

शुभमस्तु।

Author—Same as No. 731. Haradatta

Remarks—The Ms. proceeds upto *sūtra* 34, *pāda* 4, chapter 1.

॥ परिभाषार्थसंग्रहः ॥

733 A. PARIBHĀṢĀRTHASAṄGRAHA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—15. 10 lines per page and 44 letters per line. Script—Grantha. No. of Granthas—400.

Subject—A compendium of the technicalities of Vyākaraṇa.

Beginning :

श्रीगुरुभ्यो नमः।

विजेज्यानः सदा शम्भुर्जङ्घच्छद्विरिजां मुदा।
सञ्चक्चुरागः पशुना तन्तान्ताडाग्गतिं मम ॥

मूर्तिर्यस्य हि पाणिनिः पदमहाभाष्यप्रबन्धा तथा
वाक्यानां कृदपि स्वयं वितनुते वाक्यस्य दास्यं सदा ।
शिष्या यस्य विरोधिवादिमकुटीकुट्टाकवाग्घाटिका-
स्तस्मै मातुलरामभद्रमखिने भूयो नमो मे भवेत् ।

प्रणम्य परमं देवं भवानीपतिमव्ययम् ।
क्रियते वैद्यनाथेन परिभाषार्थसंग्रहः ॥

व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ।

व्याख्यातः, व्याख्यानाद्, हेतुपञ्चम्यन्तात् आद्यादित्वात् तसिः । प्रतिपत्तिशब्दोऽवयववाची । तथाचायमर्थः ।

End :

सुप्तिङन्तं पदमित्यत्र प्रत्ययग्रहणपरिभाषया लब्धेऽन्तग्रहणम् । ननु संज्ञाविधौ प्रत्ययग्रहणवचनाप्रवृत्ताविह सत्यपि अन्तग्रहणे सुबन्तमात्रग्रहणापत्त्या वाक्यस्यापि पदत्वं स्यात् । न । यस्मादिति सूत्रानुत्त्या समाधानाददोषः ।

Colophon :

इति श्रीरत्नगिरिदीक्षितपुत्रवैद्यनाथशास्त्रिणः कृतौ परिभाषार्थसंग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः ।
समाप्तश्चाध्यायः ।
ओम् ।

Author—Vaidyanātha.

Remarks—The Ms. seems to be of recent origin. It comprises only the 1st chapter.

॥ परिभाषार्थसंग्रहव्याख्या ॥

733 B. PARIBHĀṢĀRTHASAṄGRAHA-VYĀKHYĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—60. 10—12 lines per page and 44 letters per line. Script—Grantha. No. of Granthas—1800. Complete.

Subject—Same as No. 733 A.

Beginning :

नत्वा गुरुपदद्वन्द्वं संसारजरुधिप्लवम् ।
व्याकरोमि यथाबुद्धि परिभाषार्थसंग्रहम् ॥

ग्रन्थादौ शिष्टा मङ्गलमाचरन्ति । तस्य च भगवता भाष्यकारेण "मङ्गलादीनि मङ्गलमध्यानि मङ्गलन्तानि शास्त्राणि प्रथन्ते" इति प्रचयगमनं प्रयोजनमुक्तम् । वीरपुरुषकाण्यायुष्मत्पुरुषकाणि चेति । सू...तद्ग्रन्थाभ्यासकर्तृणां सामर्थ्यातिशय आयुर्वृद्धिश्चेति प्रयोजनमुक्तम् । अतो मङ्गलाचारस्यावश्यकत्वात् परमेश्वरप्रार्थानानुरूपं मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—विजेज्यान इति ।

End:

नन्विति । यस्मात् प्रत्ययविधिरिति सूत्रात् तदाद्यन्तमनुवर्त्य यस्मात् स्वादिप्रत्ययविधिः तदादि तदन्तस्यैव समुदायस्य पदसंज्ञा नान्यस्येति परिहरति—यस्मादिति । सूत्रानुवृत्त्येति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्वयंप्रकाशयतीन्द्रविरचितायां परिभाषार्थसंग्रहव्याख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः ।

भगवन्नीलकण्ठपादाम्भोजैकरसिकमनस्कोऽहं भवानि । श्रीपद्मनाभाय परमगुरवे नमः । परिभाषार्थसंग्रहव्याख्यानं सम्पूर्णम् । श्रीमते पद्मनाभाय नमः । पद्मायै नमः । शुभमस्तु ।

हरिः ओम् ।

Author—Svayamprakāśayati.

Remarks—The author has composed many treatises on Vedānta.

॥ पाणिनितन्त्रवादनक्षत्रमाला ॥

734. PĀṆINITANTRAVĀDANAKṢATRAMĀLĀ.

Substance—Palm leaf. Size—7″ × 2″. Leaves—24. 10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—350. Incomplete.

Subject — *Vākyārthavicāra—prima facie* argument and its refutation for drawing correct conclusion—in Skt. Grammar.

Beginning :

हरिः । श्रीगणपतये नमः ।

उद्धाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।

यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
पूर्वोत्तरतन्त्रयुगे रचिता नक्षत्रसम्मिता वादाः ।
अधुना पाणिनितन्त्रे विदुषां तोषाय रच्यन्ते ॥

क्ङिलुगुपधात्वच्च इपरनिर्हासक्त्वेषूपसंख्यानमिति वार्त्तिके क्ङौ लुप्तं न स्थानिवदित्यर्थस्य क्वचिद् ग्रन्थेषु निषेधदर्शनात् क्वचिद(पी?पि स्वी)कारदर्शनाच्च विप्रतिपत्त्या विचार आरभ्यते—

End :

क्ङौ लुप्तं न स्थानिवदिति मान्तयोर्युष्मदस्मदोस्त्वाहाद्यादेश इति वचनसामर्थ्यादेव स्थानिवद्भावबाधस्य प्रतिपत्तुमशक्यत्वात् ।

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य-श्रीमहाव्रतयाजिश्रीमदप्पय्यदीक्षितस्य कृतौ पाणिनीयवादनक्षत्रमालायां क्ङौ लुप्तं न स्थानिवदित्यस्यार्थस्य नि(र्व?)करणसमर्थश्रवणनवादः (?) ।

श्रीगुरवे नमः । शुभम् ।

Author—Appayyadīkṣita.

Remarks—Of the 27 discourses, composed by the author, on Sanskrit grammar, only one based on the *paribhaṣa* 'क्ङौ लुप्तं न स्थानिवत्' is dealt with herein. The work is a sure guide to those who participate in *Vākyarthavicāra*, and is published at Śrīraṅgam.

॥ पुरुषकारः (दैवव्याख्या) ॥

735. PURUṢAKĀRA.

Commentary on Daiva.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—99. 8 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Subject—Same as No. 728.

Author—Śrī Kṛṣṇalīlāśukamuni.

Remarks—The work is printed as No. 1 in TSS. One leaf in the middle is missing.

॥ प्रकाशिका (प्रक्रियासर्वस्वव्याख्या) ॥

736. PRAKĀŚIKĀ.

Commentary on Prakriyāsarvasva.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—79. 9 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—950. Incomplete.

Subject—The rules of Sanskrit grammar.

Author :

Remarks—The first part based on this Ms., is published as No. 106 in TSS.

॥ प्रकीर्णकप्रकाशः (वाक्यपदीयव्याख्या) ॥

737. PRAKĪRṆAKAPRAKĀŚA.

Commentary on Vākyapadīya.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—30. 9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Exposition of Harikārikā.

Author—Helārāja.

Remarks—The work is printed as No. 116, TSS. All leaves are mouldered.

॥ प्रक्रियाकौमुदी ॥

738. PRAKRIYĀKAUMUDĪ.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—40. 12 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—1700.

Subject—Exposition of the Pāṇini sūtras.

Beginning :

....अजाद्यतष्टाप् । अजादिभ्योऽकारान्ताच्च प्रातिपदि(कात्) टाप् स्यात् स्त्रियाम् । आबिति सामान्योक्त्यर्थो.... ... ...

... ...एकेद्ग्रहणे अनेकेतौ डाप्चापौ न गृह्येया-

ताम् । अजाद्युक्तिर्ङीप्निषेधार्था । अजा एडका अश्वा चटका मूषिका वाला होडा वत्सा विलाता मेधा सर्वा ।

End :

सर्वकैः उभयकैः । प्रातिपदिकान् सुप इत्यनुवृत्तेः केवलस्य सुबन्तस्य वा सर्वनाम्नष्टेः प्राग्कच् । प्रयोगाद् व्यवस्था । युष्मकाभिः अस्मकाभिः युवकयोः आवकयोः युष्मकासु अस्मकासु इति केवलस्य. . . .त्वयका मयका त्वयकि मयकि । अत्र सुबन्तस्य । तिङोऽनुवृत्तेः पचतकि । भवतकि । अत्राक्कच्प्रकरणे तूष्णीमः काम्प्रत्ययो वाच्यः । तूष्णी.... .... ।

Colophon :

Author—Rāmacandra.

Remarks—This Ms. commences only from स्त्रीप्रत्यय-प्रकरणं. The work is available in print with the commentary, Prasāda (No. 128 published from BORI.)

॥ प्रक्रियाकौमुदी ॥

739. PRAKRIYĀKAUMUDĪ.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—30. 11 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Same as No. 738.

Beginning :

अविघ्नमस्तु ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥
वर्णीं पाणिनिमाचार्यं कात्यायनमुनिं तथा ।
कृताञ्जलिर्नमस्यामि भगवन्तं पतञ्जलिम् ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
श्रीमद्दिङ्मुलमानम्य पाणिन्यादिमुनीन् गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥

अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति प्रत्याहारसूत्राणि । हकारादिष्वकार उच्चारणार्थः । लकारे त्वकारस्य प्रयोजनमस्ति ।

End :

पादोऽन्यतरस्याम् । पाच्छब्दान्तात् स्त्रियां ङीप् वा स्यात् । द्विपाद् द्विपदी । टाङसिङसामिनात्स्याः । ऋचि वाच्यायां पादन्तात् टाप् स्यात् न ङीप् । द्विपदा ऋक् । न षट्स्वस्रादिभ्यः । पञ्च चतस्रः । पञ्चेत्यत्र नलोपे कृते ष्णान्ता षडिति षट्संज्ञां प्रति नलोपः सुप्यचेति नलोपस्यासिद्धत्वान्न..... ।

Colophon :

इत्यव्ययानि ।

Author—Same as No. 733. Ramacandra

Remarks—The Ms. ends with *Avyayaprakaraṇa.*

॥ प्रक्रियाभिधानरूपसारसर्वस्वम् ॥

749. PRAKRIYĀBHIDHĀNARŪPASĀRA-SARVASVAM.

Substance—Palm leaf. Size—21″ × 2″. Leaves—54. 7 lines per page and 73 letters per line. Script—Malayāḷam. No. of Granthas—1750. Incomplete.

Subject—Same as No. 726.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

संपर्युपेभ्यः करोतौ भूषणे । समवाये च । इति सुट् । संस्करणं परिष्करणम् उपस्करणम् एते शब्दाः अलङ्करणे समूहीभावे च । संस्करणमित्येतत् लक्षणया निर्मलीकरणेऽपि । उपस्करणमित्यस्यार्थान्तरमाह— उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु । प्रतियत्नो गुणान्तराधानम् । कुसुमैः केशस्योपस्करणम् । केशस्योपस्कुरुते ।

End :

अजाग्रहिष्यामहि अजाग्रहीष्यामहि अजगर्हिष्यामहि अजगर्हीष्यामहि अजरिगर्हिष्यामहि अजरिगर्हीष्यामहि अजरीगर्हीष्यामहि अजरीगर्हीष्यामहि ।

Colophon :

Author :

Remarks—The derivation of words is explained in this work with copious illustrations. Since the author makes frequent references to Kerala in the course of the work, he might have been a native of Kerala.

॥ प्राक्रियामञ्जरी (काशिकावृत्तिव्याख्या) ॥

741. PRAKRIYĀMAÑJARĪ.

Commentary on Kāśikāvṛtti.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—156. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4800.

Subject—Same as No. 716.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यो विश्वोऽकारवाच्यः सकलविषयभु.... ....

....श्चेत्युवाच्यः ।

प्राज्ञो ज्ञानैकबद्धः सुरनरसकलानन्दभुङ् माक्षरेक्ष्यो

वाक्यार्थो य.... .... ॥

....खामणिर्गिरिसुताबिम्बात्मतेजोमणिः

शश्वद्विश्वविभासकामलमणिर्ब्रह्मा... .... ।

... ...चिन्तामणिः शङ्करो
जीयान्मोहविभेदवासरमणिर्गोकर्णभूषामणिः ॥

End:

ऋत इद्धातोः । हलि चेति दीर्घः । रदाभ्यामिति नत्वम् । रषाभ्यामिति णत्वम् । श्लिषादीनामकर्मकत्वादेव सिध्यति । तत् किमर्थमेषां ग्रहणमित्याशङ्क्याह— श्लिषाद्य इति । गोघ्न इति टक्प्रत्ययो निपात्यते । उपधा..... ....

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमद्विद्यासागरमुनीन्द्रविरचितायां प्रक्रियामञ्जर्यां तृतीयाध्यायस्य तृतीयः पादः ।

Author—Anandapūrna Vidyāsāgaramuni.

Remarks—This Ms. contains the first two chapters and a fragment of the 3rd.

॥ प्रक्रियामञ्जरी (काशिकावृत्तिव्याख्या) ॥

742. PRAKRIYĀMAÑJARĪ.

Commentary on Kāśikāvṛtti.

Substance—Palm leaf. Size—19″ × 2″. Leaves—106. 11 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—5900.

Subject—Same as No. 716.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
हूत इति । ह्वेञ् स्पर्द्धायाम् । यजादित्वात् संप्रसारणम् । जिन इति ।

ज्या वयोहानौ । ग्रहिज्यादिना संप्रसारणम् । ल्वादिभ्य इति निष्ठानत्वम् । संवीत इति । व्येञ् संवरणे । यजादित्वात् संप्रसारणम् ।

End:

एवमपि स्यान्यकारो गुणभिन्नस्य ग्राहकः । नैवमादेशोकार इति यद्गुणसंवृत उच्चारितस्तद्गुण एव पोढा भिन्नस्य .. . . द्विमात्रिकस्य विवृतस्यापि स्यात् । तत्रापि संवृतेन त्विति सर्वगुण इति ..... पोढा भिन्नो विवृतः पोढा भिन्नः संवृतो भवतीत्यर्थः ।

Colophon :

विद्यासागरसम्भूतवाक्यरत्नप्रभावली ।
विराजते पाणिनीयसूत्रसन्दोहगुम्भिता ॥

श्रीकामदेवे जगतीं प्रशासति
श्रीशैलकन्यापतिभक्तिधारिणि ।
विद्योदधेरुत्थितमेतदादरा-
ट्टीकामृतं भूसुरहर्षवर्द्धनम् ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्विद्यासागरमुनीन्द्रविरचितायां प्रक्रियामञ्जर्याम् अष्टमस्याध्यायस्य चतुर्थः पादः ।

Author—Same as No. 741.

Remarks—The Ms. is short of four chapters at the beginning.

॥ प्रक्रियासर्वस्वम् ॥

743. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—12″×1½″. Leaves—26

186. 9—12 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—4000. Incomplete.

Subject—Same as No. 738.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमहात्रिपुरसुन्दरीसमेतश्रीमहादेवाय नमः ।

रासविलासविलोलं स्मरत मुरोर्मनोरमं रूपम् ।
प्रकृतिषु यत् प्रत्ययवत् प्रत्येकं गोपिकासु सम्मिलितम् ॥

तिष्ठत्येवानिलोऽपि प्रचरति गिरिरप्याज्ञया यस्य राज्ये
शत्रोः सर्वाभिसारे सति रचयति यस्तस्य सर्वापहारम् ।
सोऽयं निःशेषशास्त्रश्रुतिनिवहकलानाटकेष्वाद्वितीयो
भाति श्रीदेवनारायणधरणिपतिर्मग्नचेता मुकुन्दे ॥

... ...

इहादौ प्रत्याहारोक्त्यै तत्सूत्राण्युच्यन्ते ।

End :

तसिलाद्याः पाशपः प्राक् डाच्पर्यन्ताः शसादयः ।
वतिर्नानाच् तथामुश्च कृत्वार्थास्तद्धितेऽव्ययम् ॥

इतः परं समासान्ताः सन्ति केचन तद्धिताः ।
तेषां तत्तत्समासेषु वर्णनैव लघीयसी ॥

Colophon :

इति प्रक्रियासर्वस्वे ताद्धितखण्डः ।

संक्षेपातिशयेऽपि वाच्यबहुताहेतोरभूद्विस्तरः
स्पष्टत्वेऽपि कृते स्वभावगहना भागा मनागस्फुटाः ।

एवं व्यक्तिमियान् पदार्थ इयता ग्रन्थेन यातोऽयमि-
त्येवं यो विमृशेत् स एव कलयेदस्मिन् निबन्धे गुणान् ॥

शुभम् । श्रीमाता रक्षतु ।

Author—Nārāyaṇa Bhaṭṭa.

Remarks—The Ms. concludes with the *Taddhita-khanda* and is written in legible hand. A portion of this work is printed with commentary as No. 106, TSS.

॥ प्रक्रियासर्वस्वप् ॥

744. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—18″ × 2″. Leaves—87. 10—12 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—4000. Incomplete.

Subject—Same as No. 738.

Beginning etc.—Same as No. 743.

॥ प्रक्रियासर्वस्वम् ॥

745. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—12″ × 2″. Leaves—153. 10—12 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—4200, Incomplete.

Subject—Same as No. 738.

Beginning :

हरिः ओम् ।

अथ समासाः । प्राक् कडारात् समासः । 'कडाराः कर्मधारये' इत्यतः प्राग्भवाः समासाख्याः । सह सुपा । सुबन्तं सुबन्तेन सह समस्यत इति सर्वत्र ज्ञेयम् । स च समासश्चतुर्धा । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । द्विगुः कर्मधारयश्च तस्यैव भेदौ । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्व इति ।

End :

अनुप्रयुक्तधात्वनुसारेण पूर्वलोडादर्थः कल्प्यः । तथ्वमोस्तु हरिं स्मर कीर्तयार्चयेति । सेवध्वे स्मरत कीर्तयत अर्चयतेति सेवध्वे । एवं ध्वंविषयेऽप्यूह्यम् । समुच्चयेऽन्यतरस्यामित्युक्तेः लडादयोऽपि यथाप्राप्तं स्युः । हरिं स्मरति कीर्तयति अर्चयति सेवत इत्यादि ।

Colophon :

इति लार्थवैचित्र्यखण्डः ।

यथास्थितं वार्त्तिकभाष्यवाक्यं
न वृत्तिकारादिभिरप्युपात्तम् ।
सा कौमुदी चार्थत एव वक्ति
तथा वदन्तो वयमप्यदोषाः ॥

शुभमस्तु नित्यम् ।

श्रीमाता रक्षतु शुभमस्तु । नित्यम् ।

Author—Remarks—Same as No. 743.

॥ प्रक्रियासर्वस्वम् ॥

746. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—151. 10 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—3900.

Subject—Same as No. 738.

Beginning :

अथ सनुच्यते । धातोः कर्मणः समानकर्तृकादिच्छायां वा । इच्छाकर्मभूतादिच्छतिना समानकर्तृकाद्धातोरिच्छार्थे सन् प्रत्ययो वा स्यात् । भू, स, इटि प्राप्ते, सनि ग्रहगुहोश्च । ग्रहगुहोरिगन्ताच्चैकाचः परस्य सन इण् न स्यात् । आर्धधातुकत्वाद् गुणे प्राप्ते । इको झल्

End :

वले रक्षन् । संवृणोति वर्णान्तरं व्याप्नोति वा वळक्षो धवलः । लाक्षाद्राक्षामिक्षादयः । लान्त्येनां लाक्षा । द्रवति मध्वस्माद् द्राक्षा । आमिक्षा हविर्भेदः । आयुक्तेः पीयुक्षा वृक्षः इति भोजोक्ताः ।

Colophon :

नान्तं प्रापदुणादिशास्त्रमियता शब्दाननुक्तानतो
धातुप्रत्ययरूपतः प्रविभजेत् कार्यात् किदादीन् वदेत् ।
रूढाः साधव एव ते च शकटापत्यादिभिर्धातुजाः
सर्वेऽपीत्युदितं ततो बहुलमित्यूचे स्वयं पाणिनिः ॥
उणादिवृत्तित्रितयं दण्डनाथकृतिं तथा ।
दृष्ट्वैतत् कृतमस्माभिर्देवनारायणाज्ञया ॥

श्रीनारायणकविरचिते प्रक्रियासर्वस्वे उणादि-खण्डः ।

Author—Same as No. 743.

Remarks—The Ms. opens with the chapter on *Samāsānta* and closes with that on *Unādi*. The script is small and legible.

॥ प्रक्रियासर्वस्वम् ॥

747. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—157. 9—11 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—4800.

Subject—Same as No. 738.

Beginning—Same as No. 743.

End:

अव्ययीभाव इत्यत्र भवतेः कर्तरीहणाः ।
स्यात्तस्य पुरुषस्तत्पुरुषः षष्ठीसमासतः ॥

तेन तज्जातिजाः सर्वे कृद्वत्तत्पुरुषा मताः ।
द्वयोर्गवोर्भवादीह द्विगुर्यत्रैष स द्विगुः ॥

बहवो व्रीहयोऽत्रेति यत्र स्यात् स तथोच्यते ।
द्वयोर्हि पदयोरेकद्रव्यवृत्त्याखिलं पदम् ॥

क्रियासम्बन्धि यत्र स्यात् स शान्तः कर्मधारयः ।

Colophon :

वृत्तौ नानाप्रमादा विवृतिषु कथिता माधवाद्यैश्च सर्व-
व्याख्यायाख्यायि दोषो बहुलमघटितं प्रक्रियाकाव्यवृत्तौ ।
नामव्याख्यास्वनन्तं किल तदिह महाकोविदैरप्यवर्ज्यं
विभ्रान्तिश्चेत् कृशाभ्यासिनि कृशधिषणे मादृशे किन्नु वाच्यम् ॥
श्रीवेदव्यासाय नमः । इदं पुस्तकं श्रीकृष्णेन लिखितम् ।

Author—Same as No. 743.

Remarks—The Ms. comes to an end with the *Samāsaprakarana.*

॥ प्रक्रियासर्वस्वम् ॥

748. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—138. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4800.

Subject—Same as No. 738.

Beginning etc.—Same as No. 747.

॥ प्रक्रियासर्वस्वम् ॥

749. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—129. 8—11 lines per page and 60 letters per

line. Script—Malayāḷam. No. of Granthas—4500. Incomplete.

Subject—Same as No. 738.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ स्त्रीप्रत्ययान्तानामपि विभक्तिप्रकृतित्वात् तेऽपि कथ्यन्ते । स्त्रियाम् । इतःपरं प्रातिपदिकात् स्त्रियां वाच्यायां प्रत्यया उच्यन्ते ।

क्षीणत्वमृदुलत्वादिर्वस्तुप्वयचयो हि यः ।
स स्त्रीत्वमिति भाष्योक्तं मृणाल्यादौ स योज्यताम् ॥

टाप् डाप् चापो ङीब् ङीष् ङीन् ऊङ् तिश्चेत्यष्टौ स्त्रीप्रत्ययाः । अजाद्यतष्टाप् अजादिगणाददन्ताच्च प्रातिपदिकात् स्त्रियां टाप् स्यात् । पकार आविति सामान्यग्रहणार्थः ।

End :

क्रौडिलाडिव्या(ध्याप ? ड्याषिक्षात्यापिशालिसाधनिभौरिकिभौलिकिशालुलिशालास्थलिकपिष्ठलिदैवदत्यादीनाम् । एषां स्त्रियां ष्यङ् स्यात् । क्रौड्या लाट्या व्याड्या आपिक्षित्या आपिशल्या साधानक्या भौरिक्या भौलिक्या शालुल्या शालास्थल्या(शा?का)-पिष्ठल्या दैवदत्या चापयन्तचकयतचटयतवेलवयतसेकतयानां च । चौपयत्या चैकयत्या चैटयत्या सैकयत्या इति ।

Colophon :

इति श्रीमत्केरलभूवलयभूषणदेवनारायणचरणिपतिकरुणाशरणेन नारायणचरणपरिचरणपरायणेन नारायणकविना विरचिते प्रक्रियासर्वस्वे न्यायखण्डः ।

कृष्णेन लिखितमिदं पुस्तकम् ।

Remarks—The Ms. covers the portion extending from *Stripratyayakhanda* to *Nyayakhanda*.

॥ प्रक्रियासर्वस्वम् ॥

750. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—112. 8—9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2400. Incomplete.

Subject—Same as No. 738.

Beginning:

अद भक्षणे । अद् शप् ति । अदिप्रभृतिभ्यः शप इति शपो लुक् । अद्-ति । चर्त्वम् । अत्ति । अत्तः अदन्ति । अत्सि अत्थः अत्थ । अस्मि अद्वः अद्मः । कर्मण्यद्यते । लिङि यासुट् अद्यात् । अद्याताम् अद्युः । अद्याः, अद्यातं, अद्यां, अद्याव । लोटि, अत्तु अत्तात्, अत्तां अदन्तु । अद् हि । हुझल्भ्यो हेर्धिः । हुधातोः झलन्ताच्च परस्य हलादेर्हेर्धिः स्यात् । अद्धि । हलादेर्हेरित्युक्त्या रुदिहीत्यत्र न ।

End:

प्रधानान्वाचयशिष्टयोः प्रधाने कार्यसम्प्रत्ययः । योगविभागादिष्टसिद्धिः । ग्रन्थाधिक्यादर्थाधिक्यम् । ग्रहणवता प्रविभागो गरीयान् । अलिङ्गसंख्यमव्ययम् । समासवृत्तिस्तद्धितवृत्त्या बाध्यते । अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी । समुदाये प्रवृत्ताः शब्दा अवयवेऽपि प्रवर्तन्ते । अव्यक्तो गुणः सन्देहे नपुंसके प्रवर्तते । नैकमुदाहरणं योगारम्भं प्रयोजयति ।

Author—Same as No. 743.

Colophon — Same as No. 749.

Remarks—This Ms. ranges from Tiṅantaprakaraṇa upto Nyāyakhaṇḍa. The leaves are old and damaged.

॥ प्रक्रियासर्वस्वम् ॥

751. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—90. 4 lines per page and 35 letters per line. Script —Malayāḷam. No. of Granthas—750. Incomplete.

Subject—Same as No 738.

Beginning—Same as No. 745.

End:

प्राणिनां तु विट्शूद्राः । अद्रव्यजातित्वाद् रूपरसौ । द्रव्येष्वपि व्यक्तिपरत्वेन । वेणुवीणाः । विशिष्टलिङ्गो (न)दीदेशोऽग्रामाः । ग्रामवर्जनदेशानां नदीनां च भिन्नलिङ्गानां द्वन्द्व एकवत् स्यात् । देश इति जनपदनगरयोरुक्तिः । कुरवः कुरुक्षेत्रं च कुरुक्षेत्रम् । नगरे . . . . राहस्तिनपुरम् । नदीनां तु गङ्गाशोणम् । एकलिङ्गानां न । गङ्गाय . . . . .मसंबन्धेऽपि न । कुरु...

Colophon:

Author—Same as No. 743.

Remarks—This Ms. is much decayed.

॥ प्रक्रियासर्वस्वम् ॥

752. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—$11\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—28. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—800. Subject—Same as No. 738.

Beginning :

अथ लकाराणामुक्तेभ्योऽर्थान्तरमुच्यते । अभिज्ञावचने लृट् । स्मरणार्थधातुप्रयोगे भूतानद्यतने धातोर्लृट् स्यात् । स्मरसि कृष्ण व्रजे (न्यव). . . . . सामेत्यर्थः । न यदि । यच्छब्दयोग उक्तलृट् न स्यात् । अभिजानासि कृष्ण यद्व्रजे न्यवसाम ।

End :

इयङ्कृत इकारोऽयमादिष्टापूर्व एव हि ।
अन्येऽप्यचः परेत्यस्य प्रभावा हरभाषिताः ॥
यायायतेः क्तिजन्तस्य शाश्वित्वत् साधितेऽखिले ।
पुनर्यलोपे यातीहिरार्तिरारायतेर्मताः ॥
पेपीयतेस्तथा स्थानिवत्त्वादेरिति यण्विधौ ।
यलोपतो भवेत् पेप्तिश्चेक्तिश्चेचीयतेः कुना ॥

Colophon :

इति प्रक्रियासर्वस्वे सुब्धातुखण्डः ।

न सर्वं सर्वस्य प्रियमपि भवेदप्रियमपि
क्वचित् केचित् किञ्चिद्दधति यदि सार्था मम कृतिः ।
न वा गृह्णन्त्वन्ये तदपि पदपीयूषलहरी-
परिक्रीडानन्दः फलमिदमिदानीं मम न किम् ॥

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥
रामचन्द्राय नमः । शिवमस्तु ।

Author—Same as No. 743.

Remarks—This Ms. commences only from the "लार्धखण्ड" and ends with "सुबन्तखण्ड".

॥ प्रक्रियासर्वस्वम् ॥

753. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—8½" × 2". Leaves—80. 7—9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—950.

Subject—Same as No. 738.

Beginning :

हरिः । तद्धिताः । प्राग्दीव्यतोऽण् । अश्वपत्यादिभ्यश्च । आश्वपतः । ध्वानपतः । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । दैत्यः । आदित्यः । आदित्यः । भौमिपत्यः । उत्सादिभ्योऽञ् । औत्सः । औदपानः । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । भवनात् प्रागेतौ स्तः । स्त्रैणः पौंस्नः । एते प्राग्दीव्यतीयमाधारणाः ।

End :

भृत्यं पदेकृत्य सचिवो गतः । निवचनेकृत्यास्ते मुनिः ॥ मौनं कृत्वेत्यर्थः । हस्तेकृत्य पाणौकृत्य । उपयमनं विवाहः । स्वीकारमात्रमिति हरः । प्राधर्यकृत्य पशुं दोग्धि । जीविकाकृत्य दी-

ख्यति । उपनिषत्कृत्योपदिशति । तत्तुल्यं कृन्वेत्यर्थः । एते गतयः ।

Colophon :

Author—Same as No. 743.

Remarks—A certain number of *sūtras* beginning with "सर्वस्य द्वे" are written in a Fol. just after the colophon. The next Fol. gives the capacity of Drona, Śūrpa etc.,

॥ प्रक्रियासर्वस्वम् ॥

754. PRAKRIYĀSARVASVAM.

Substance—Palm leaf. Size—10" × 1½". Leaves—77. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Subject—Same as No. 738.

Beginning:

हरिः । श्रीगणपतये नमः ।

देवनारायणक्ष्मापशासनस्थायिना मया ।
धातवोऽत्र विलिख्यन्ते माधवोक्तेन वर्त्मना ॥
उदात्तेत्त्वानुदात्तेत्त्वस्वरितेत्त्वविभागकृत् ।
एधादीनामकारोऽन्त्यः कथादीनामवृद्धिकृत् ॥
आदिदीदिच्च निष्ठायामनिदित्त्वार्थं कृतावुभौ ।
भावादिकर्मणोर्वेद् स्यादादितामिति भिद्यते ॥

End :

श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च । एभ्यो णि-

ङ्। बाहुलकाण्णिजपि स्यात्। उक्तलोपश्च। श्वेताश्वमाचष्टे तेनातिक्रामति वा श्वेतयते श्वेतयति। एवं अश्वयति। गालोडयति। आह्वरयति। एतत् सूत्रद्वयं सुब्धातुखण्ड उक्तम्। पुच्छादिषु धात्वर्थ इत्येव सिद्धम्। पुच्छभाण्डचीवराण्णाङिति न वक्तव्यम्। प्रातिपदिकाद्धात्वर्थ इत्येव णिङ्सिद्धेर्बहुलोक्त्यात्मनेपदसिद्धेश्चेति।

Colophon :

Author—Same as No. 743.

Remarks—The Ms. gives the list of verbal roots according to the school of Mādhava.

[रूपावलार-व्याख्या] ॥ प्रक्रियासारः ॥

755. PRAKRIYĀSĀRA.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—113. 8 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Subject—Same as No. 726.

Beginning :

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

गजाननं गिरां देवीं व्यासं कंसहनं गुरुम्।
भूतेशमीशमाशास्तितार्थदान् प्रणमाम्यहम्॥
व्युत्पादयितुमल्पेन ग्रन्थेनाल्पधिया मया।
विलिख्यते प्रक्रियायाः सारं नारायणाश्रयात्।

इह प्रत्याहारोक्त्यै तत्सूत्राण्युच्यन्ते—अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इहागमादेशधातुगणपाठप्रत्याहारसूत्राण्युपदेशाः । उपदेशेऽजनुनासिक इत्यधिकारे, हलन्त्यम् ।

End :

कृष्ण इवाचरति कृष्णति । भावे अतो लोपः । कृष्णयते । कृष्णेत् । कृष्णतु । अकृष्णत् । लुङादौ धातोरतो लोपः अकृष्णीत् । कृष्णाञ्चकार । कृष्णयात् । कृष्णिता । कृष्णिष्यति । अकृष्णिष्यत् । वेत्युक्तेः क्यङ् । कृष्णायते । कृष्णात्मा भवतीत्यर्थः ।

Colophon :

ग्रन्थेऽस्मिन्मे हरिः सेव्यः स्मृत्या तन्नामकीर्तनैः ।
मद्धीशुद्धिः फलमिति द्वयमन्यदतोऽस्तु वा ॥
रूपावतारसूत्राणां व्याख्या नारायणोक्तितः ।
गुरुपादाब्जकृपया समक्षेपि परं मया ॥

इति प्रक्रियासारे संज्ञा... ....

Author—Nārāyaṇārya.

Remarks—The colophon discloses that this work is a compendium of the commentary on Rūpāvatāra.

॥ प्रक्रियासारः ॥

756. PRAKRIYĀSĀRA.

Substance—Palm leaf. Size—10½" × 1½". Leaves—112. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Subject—Same as No. 726.

Beginning etc.—Same as No. 755.

Remarks—Several leaves are missing both at the beginning and end.

॥ प्रत्ययान्तधातुविवृतिः ॥

757. PRATYAYĀNTADHĀTUVIVṚTI.

Substance—Palm leaf. Size—6½" × 1". Leaves—157. 7 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Subject — Exposition of the roots derived from nouns.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्या रूपग्रहणेन न ख्यातुमपि किञ्चन ।
शक्यते वस्तु लोकेषु जयत्येषा सरस्वती ।
धातुपाठनिविष्टानां धातूनां यः पुरा व्यधात् ।
विवृतिं माधवीयाख्यां भाष्यज्ञहृदयङ्गमाम् ॥
तेन मायणपुत्रेण व्याख्या कापि विरच्यते ।

धातूनां प्रत्ययान्तानां गणपाठजुषामपि ॥

अत्र प्रतिपदं शिष्टा गणसूत्रजुषा इमे (?) ।

तत्रापि बहवो गौणाः किञ्च सूत्राण्यधीयता ॥

आचार्येण पुरा प्रोक्तास्तानादौ विवृणोम्यहम् ।

एतावदेव सर्वस्मादर्थये सुमनोजनात् ॥

नामंस्त भवता सार्थमन्यथापि न मे क्षतिः ।

कण्ड्वादिभ्यो यक् । एभ्यो यक् स्वार्थे । एते च धातवः प्रातिपदिकानि । तत्र धातुत्वं यको धातुविहितत्वेन तन्निमित्तगुणनिषेधार्थेन किन्त्वेनावसीयते ।

End:

अवश्यं चैतदेवं विज्ञेयम् । सामानाधिकरण्येन सम्बन्धे त्वमान्तयोरादेशात् प्रसङ्गात् । उच्यते । अत्र मान्तस्येति वचनेनाप्युक्तेऽर्थे सिद्धे (नःपरि)ग्रहणसामर्थ्यात् अप्रातिपदिकेनेत्यस्याप्यप्रवृत्तेः व्यपदेशिवद्भावसिद्धेः। अपरे पुनराहुः—सति शेषे यः पर्यन्तशब्दो वर्तते, तेन मान्तयोर्युष्मदस्मदोर्यूयाद्या....

Colophon :

Author—Mādhavācārya, son of Māyaṇa.

Remarks—Only one leaf is wanting at the close of this Ms. The work is otherwise known as Nāmadhātuvṛtti. It is available in print.

॥ प्रत्ययान्तधातुविवृत्तिः ॥

758. PRATYAYĀNTADHĀTUVIVṚTI.

Substance—Palm leaf. Size—7½″ × 1½″. Leaves—41. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Subject—Beginning: Same as No. 757.

End:

पाकशब्दः प्रथमवयोवाची । बाधात् पुंवत्त्वापुंवत्त्वयोर्न विशेषः । सत्यमत्राविशेषेऽपि अस्ति पाकभार्य इत्यत्र विशेषः । चतुर्थीयते । 'संज्ञापूरण्योश्चे'ति पुंवत्त्वप्रतिषेधः । स्त्रीत्वीयते । वृद्धि-निमित्तस्य..... ....

Colophon:

....

Author—Same as No. 757.

Remarks—The Ms. concludes with the formation of verbs from nouns.

॥ प्रभा (शब्दकौस्तुभटीका) ॥

759. PRABHĀ.

Commentary on Śabdakaustubha.

Substance—Palm leaf. Size—10¾″ × 1¾″. Leaves

—165. 8 lines per page and 30 letters per line.

Script—Malayāḷam. No of Granthas—2500.

Subject—A gloss on Śabdakaustubha.

आनन्दकन्दं मुनिहृन्मिलिन्दं
स्वच्छन्दगोविन्दपदारविन्दम् ।
वन्दे सुरेन्द्रादिमदादिदन्त-
दीनापवादं गुणनन्दनन्दम् (?)॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां (नपुंते?तनुते कौस्तुभस्य स्व(पुद्ध?बुद्ध)ये ।

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुपङ्गतो मङ्गलाय च निबध्नाति—विश्वेशमित्यादिना ।

End:

प्रत्यापत्तेरिति—शास्त्रान्ते शुद्धवाक्तिपाठात् (?) इति भावः । नन्वेवं तदा देववयथावद्युतामत आह—शास्त्रान्तरतिल (?) ...

....

Author—Vaidyanātha, Pāyagunda.

Remarks—The Ms. contains only a fragment of the first Āhnika in chapter I.

॥ प्रसादः (प्राक्रियाकौमुदीव्याख्या) ॥

760. *PRASĀDA.

Commentary on Prakriyākaumudī.

Substance—Palm leaf. Size × 13″ × 1¾″. Leaves—32, 20 lines per page and 64 letters per line,

Script—Grantha. No. of Granthas—2500. Incomplete.

Subject—Same as No. 738.

Beginning:

.....प्रकारेण ईप्सिततमं कर्तुः क्रियया युज्यते, तेनैव प्रकारेण अनीप्सितमपि युज्यते । तर्हि अनीप्सितमपि कर्मसंज्ञं स्यादित्यर्थः ।

End:

जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने । ये जनपदिनो जनपदस्वामिनः क्षत्रिया बहुवचने जनपदेन (ए)कशब्दाः स्युः । तेषां सर्वप्रत्ययः प्र.....

Colophon:

Author—Vithalācārya, Son of Narasimha

Remarks—The Ms. ranges from the द्वितीयाकारक to शौषिकप्रकरण. The script is small but distinct.

॥ प्रसादः (प्रक्रियाकौमुदीव्याख्या) ॥

761. PRASĀDA.

Commentary on Prakriyākaumudi.

Substance—Palm leaf. Size—21″ × 2″. Leaves—148. 12 lines per page and 88 letters per line.

Script—Malayāḷam. No. of Granthas—9700.

Subject—Same as No. 738.

Beginning:

श्रीमद्विट्ठलमादिमव्ययमजं शब्दात्मकं ब्रह्म तत्
स्वेच्छातो जगदुद्भवस्थितिलये हेतुं स्वमायागुणैः ।
यच्छ्वासः श्रुतिसन्ततिव्यवहृतिस्तं पुण्डरीकाश्रमे
भक्तानुग्रहहेतुतः स्थितमहं वन्दे मुदे सं(वि)दे ॥

श्रीशम्भुं पाणिनिं श्रीवररुचिमथ वाक्संस्कृतौ दीक्षितं श्री-
शेषं भाष्यार्थहार्दप्रकटनपटुधीःपण्डितान् भर्तृमुख्यान् ।
वृत्तिन्यासादिकर्तॄन् स्वमतपरमतव्याप्तकान् भोजदुर्ग-
क्षीरस्वामिप्रमुख्यान् प्रगुणनुति भजे हृन्मतिज्ञप्तिहेतोः ॥

किं शेषः पाणिनिर्वा वररुचिरथवा सर्वविद्याप्रणेता
शम्भुर्भूमावभूद् भूसुरकुलतिलकोऽन्ध्रदेशेऽग्र्यवंशे ।
ऋग्वेदी सर्वविद्याप्रकटनपटुधीः कृष्णजो रामचन्द्रो-
ऽनन्ताचार्यप्रपौत्रो दिशतु कृतिमतिं मे स (कौण्डि)न्यगोत्रः ॥

वन्दे तं यतिवृन्दवन्दितपदं श्रीराघवेन्द्रादि य-
न्नामाभाति सरस्वतीपदपरं वादीन्द्रविद्रावकम् ।
यो विद्याः समदाच्चतुर्दश मुदा श्रीशेषभाष्यादिकाः
शिष्येभ्यो मयि यत्कृपास्ति सततं सच्छास्त्रसंवित्तये ॥

लोकेष्विन्दुरुपक्रमं वररुचीत्यौदार्यलोकज्ञता
विद्वत्तोपकृतिः क्षमा सुजनता वेदोक्तधर्मादरः ।
आचार्यं कृतकालनिर्णयमहाग्रन्थार्थसन्दीपना-
टीकं तं नरसिंहमान्मजनकं वन्दे विदां सम्मतम् ॥

गम्भीरार्थां मितोक्त्या कलितसकलसच्छाब्दरत्नाकरां श्री-
शेषोक्तन्यायगर्भां स्वपरमतयुतां प्रक्रियाकौमुदीं ताम् ।

व्याकुर्वन् बुद्धिहीनो . . . . यदपि तत्पुत्रजो रामचन्द्रा-
चार्योक्तैः पाठरक्षाकरणगुणतया सज्जनैर्नोपहास्यः ॥
तथात्र पण्डितम्मन्यैः प्रक्षेपैर्मलिनीकृता ।
प्रक्रियाकौमुदी तस्याः प्रसादः क्रियते मया ॥
स्पष्टत्वात् समुपेक्षितानि कतिचिद्व्याख्यातकल्पान्यतो
रामाचार्यवरैरमूनि विशदं व्याख्यामि सूत्राण्यहम् ।
ग्रन्थेऽस्मिन् परमाधनं कतिपयानौणादिकांश्च ब्रुवे
स्थाने तांश्च गणान् यथामति तथा न्यासान् पदैः सूचितान् ॥
टीकेयं विपुलेति येन विदुषां संक्षिप्यते तस्य नो
लाभः किन्तु समीहितः पुनरमी . . . . विशेषा . . हाः ।
येनास्माभिरनेकसूरिरचितग्रन्थार्थमालोच्य तत्-
सारं मूलगतं विशेषविदुषां प्रीत्यै प्रकाशीकृतम् ॥

तत्र तावत् प्रक्रियाकौमुदीं चिकीर्षवः श्रीरामचन्द्राचार्याः ममाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय विशिष्टदेवतागुरु-प्रणामलक्षणं कृतं मङ्गलाचरणं शिष्यशिक्षार्थमुपनिबध्नन्तः... ... विषयप्रयोजनसंबन्धाधिकारिणश्च सूचयन्तः प्रतिजानते—श्रीमद्विट्ठलमित्यादि ।

End :

एतेनपुंसकैरस्थ्यादिभिरनपुंसकस्यापि तदन्तस्य ग्रहणमिष्यते । प्रियास्थ्ना ब्राह्मणेन । प्रियदध्ना ब्राह्मणेन । प्रियसक्थ्ना ब्राह्मणेन । प्रियाक्ष्णा ब्राह्मणेन । तृतीयादिष्वित्येव । अस्थिनी । अचीत्येव । अस्थिभ्याम् अस्थिभिः । छन्दस्यपि दृश्यते । यत्र विहितं ततोऽन्यत्रापि दृश्यते । अचीत्युक्तम् । तृतीयादि-ष्वपि भवति । अस्थान्युत् ॥

Colophon ;

Author—Same as No. 760. Viṭṭhalāchārya.

Remarks—The author was the son of Narasimha. This work has been published as No. LXXVIII in BSS. A detailed sketch of the author and his works is furnished in an exhaustive introduction to the edition.

॥ प्राकृतप्रकाशः ॥

762. PRĀKṚTAPRAKĀŚA.

Substance—Palm leaf. Size—9″×1½″. Leaves—22. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject—Grammatical principles governing the Prākṛt language.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ॥

श्रीदास्तु वः श्रीर्जलदोदराभे भुजान्तरे या भुवनैकभर्तुः ।
निष्टप्तनिर्णिक्तसुवर्णवर्णा जाम्बूनदीवाम्बुनिधौ विभाति ॥

भवः स भवतः पायादपायाद्यस्य जाह्नवी ।
भाति मूर्ध्नि जटाजूटबन्धसूत्रमिव स्थिता ॥

प्राकृतसूत्रगणानां वररुचीनां मयाधुना क्रियते ।
वृत्तिः स्वरूपसिद्धिः संक्षिप्ताडम्बरेणेयम् ॥

आदेरतः । आदेरित्या परिच्छेदसमाप्तेराधिकारः । अत इति च । आ अकारविधानात् यादित ऊर्ध्वमनुक्रमिष्यामस्तदादेरतः स्थाने भवतीति वेदितव्यम् । आ समृद्ध्यादिषु वा । समृद्ध्यादिषु

शब्देषु आदेरतः स्थाने वा आकारादेशो भवति। समृद्धिः सामिद्धी समिद्धी वा।

End:

एषां बहुलम्। मण्डूकः मसलूरो। नीलमणिः होळम्। उत्पलम् कन्दोट्टं। चूतः माअंदो। एषां बहुलग्रहणेन केषुचिदादेशेषु आदेशो विकल्पेन स्यात्। अभावे। मण्डूकः मंडओ। णीलं उत्पलं। चूओ। येऽपि संस्कृतान्विताः सर्वलोकप्रसिद्धाः मट्टिआ अट्टसु चुत्तकवसुंवावाप्रभृतयः शब्दाः ते शिष्टप्रयोगानुसारेण गृहीतशक्तिकैः प्रयोक्तव्याः। शब्दशक्तिग्रहणे वृद्धव्यवहार एव मुख्यं शरणम्॥

Colophon:

इति प्राकृतप्रकाशे.... ....
....।

इति वररुचिप्रणीते प्राकृतप्रकाशे प्रथमः परिच्छेदः।

Author—Vararuci.

Remarks—This Ms. extends up to the 4th Paricheda. Another work called Prākṛtaprakāśa which compares with it only in the textual portion, has been printed and published in V. V. Press, Benares. The last verse in the introductory portion given above ascribes the commentary to an author different from Vararuci.

[प्राकृतप्रकाश]। प्राकृतमञ्जरी (प्राकृतव्याकरणव्याख्या)॥

763. PRĀKṚTAMAÑJARĪ.

Commentary on Prākṛtavyākaraṇa.

Substance—Palm leaf. Size—7½″ × 1½″. Leaves—

28. 12 lines per page and 34 letters per line. Script—Grantha. No. of Granthas—700.

Subject—Same as No. 762.

Beginning:

श्रीगणपतये नमः ।

इदमन्धं तमो हित्वा यज्ज्योतिर्भासते परम् ।
नमस्तस्मै भगवत आद्याय परमात्मने ॥
उदेतु भगवान् भानुरुदयाद्रेरिवात्मनः ।
येन वाचो यथार्था नः स्फुरन्ति सगुणाः स्वयम् ॥

* * *

* * *

कात्यायनप्रणीतेऽस्मिन् प्राकृताब्धौ तितीर्षया ।
अप्रज्ञामयपोताय नमो मह्यं निमज्जते ॥
आदेरतः ।
आदेरित्यधिकारोऽयमा परिच्छेदपूरणात् ।
अत इत्यपि तस्मात् प्रागात इत्यत्र यो विधिः ॥
एकस्मिन्नपि शब्दे स्यादेक एवादनेकशः ।
आदेरिति तदादेः स्यान्न पदादेरिति स्मृतिः ॥

End:

विवो मिवो विअश्चैवमिवार्थे परिकीर्तिताः ।
चंदो विव मुहं चंदो मिवं चन्दो विअंति च ।
शेषः संस्कृतात् ।
कृत्तद्धितसमासादिशेषो गम्येत संस्कृतात् ।
उक्तलक्षणवृत्त्यैव तत् सर्वं परिकल्प्यताम् ॥

Colophon :

इति प्राकृतव्याकरणमञ्जर्यामष्टमः परिच्छेदः । प्राकृत-व्याख्यानं समाप्तम्। शुभमस्तु ।

Author : Kātyāyana-Vararuci

Remarks—The *prākṛtasūtras* are explained here in verse. The work is printed in N. S. Press, Bombay. Most of the leaves are worm-eaten. The preface to the printed edition points out that Kātyāyana should necessarily be its author as well.

॥ प्राकृतसूत्रवृत्तिः ॥

764. PRĀKṚTASŪTRAVṚTTI.

Substance—Palm leaf. Size—$5\frac{3}{4}'' \times 1\frac{5}{8}''$. Leaves—67. 8—10 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—750. Complete.

Subject—Same as No. 762.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ॥

सुकृतिभिरेव गृहीतो बहुविधरूपावतारगम्भीरः ।
जयति स भगवान् विष्णुः प्राकृतशास्त्रप्रपञ्च इव ॥
प्रणिपत्य विघ्नराजं श्रीगुरुपादान् मुनित्रयं वाणीम् ।

शङ्करभट्टिसुतां च प्राकृतवृत्तिर्मया क्रियते ।
तत्रादौ लिपिविन्यासमङ्गतः (सं) प्रदर्श्यते ।
विन्दुर्विधीयते योऽत्र यश्च स्वाभाविकस्तयोः ।
विन्यासो लिपिषु ज्ञेयस्ताभ्यां पूर्वस्य मूर्धनि ॥

ताभ्यां विधीयमानस्वाभाविकाभ्यां विन्दुभ्यां पूर्वो यो वर्णस्तस्य मूर्धनि तयोर्विन्दोर्विन्यासो विधीयमानो यथा—दंसणं फंसणं । स्वाभाविको यथा—कंसो हंसो ।

अनुस्वारस्त्वशास्त्रीयः परस्य द्वित्वसूचकः ।
वर्णयोः पूर्वपरयोरन्तराले विलिख्यते ॥

अस्मिन् शास्त्रे विहितत्वाभावादशास्त्रीयः । यथा पेंखइ, भिंखइ ॥ अथ सूत्राण्युदाह्रियन्ते—

सू— आदेरतः ॥

वृ— ओदेरित्ययमा परिच्छेदपरिसमाप्तेरधिक्रियते ॥

End :

सू— शेषः संस्कृतात् ॥

वृ— कृत्तद्धितसमासादिलक्षणा ये शब्दास्ते शेषशब्देनाभिहिताः । येषामत्र प्रतिपदं न लक्षणमुक्तं, तेषां संस्कृतशब्देभ्य एव व्युत्पत्तिः । किन्तु ठो ढः, पो वः, टो डः, नो णः, अत ओ सावित्यादिसामान्यलक्षणाविशिष्टाः संस्कृतप्रकृतयः शब्दा वेदितव्याः । यथा— पढइ, कुविओ, पाडवं, णअणं, माहवो, केसवो इत्यादि ।

प्राकृतलक्षणमेतत् प्रायेणोक्तं प्रयोगमनुसृत्य ।
अपरमपभ्रंशादेर्लक्षणमन्यत्र विज्ञेयम् ॥

Colophon :

इति रामपाणिवादकृतायां प्राकृतवृत्तौ अष्टमः परिच्छेदः । समाप्तोऽयं ग्रन्थः ॥

Author—Rāmapāṇivāda.

Remarks—The commentary ends on Fol. 58. FF. 59—67 embody the *Sūtras* only. The following verse reveals that the author must have been a disciple of Śrī Nārāyaṇa Bhaṭṭapāda :

"श्रीनारायणभट्टपादगुरुपादानां प्रसादोदयाद्
रामो जीवति पाणिवः कतिपयैर्वर्णैः स्रजां गुम्फकः ।
सौरभ्यं वचनस्रजां गुरुकृपापीयूषसंपर्कतो
जातं प्रीतियुजः करोति सुमनोभृङ्गानभङ्गादरान् ॥"

॥ प्रौढमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

765. PRAUḌHAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—18¾" × 2". Leaves—160. 10—12 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—7000.

Subject—Elucidation of the Siddhāntakaumudī.

Beginning:

हरिः ओम्। श्रीगणपतये नमः। अविघ्नमस्तु ॥

ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः।

सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम् ॥

हयवरट्। हकारोपदेशः अट्अशहशट्णग्रहणेषु हकारग्रहणार्थः। अर्हेण। अड्व्यवायेऽपीति णत्वम्। देवा हसन्ति। भोभगो इति रोर्यत्वम्। देवो हसति। हशि चेन्युत्वम्। लिलिहिढ्वे लिलिहिध्वे। विभाषेट इति वा ढः ॥ हल्।

End:

अत्र तृतीयाद्विष्वित्यविवक्षितं, द्वितीयायामपि पुंवद्भावस्य.... इति। तच्चिन्त्यं, पुंवत्त्वं विशेषाभिधक्षितामिति(?) स्वोक्तेः परस्परव्याघातात्। मूलकृता पुंवद्भावस्यास्पृष्टत्वात् तद्ग्रन्थस्याज्ञस्येनैव व्याख्यातत्वाच्चेति दिक् ॥

Colophon:

इति प्रौढमनोरमायां सिद्धान्तकौमुदीव्याख्यायां पूर्वार्धं समाप्तम् ॥

यथायथमिति। न लोकेति षष्ठीनिषेधाज्ज्ञाते सत्यस्य तृन्नन्तत्वात् ॥

गुरूणां चरणाम्भोजपरागपरमाणवः।

मनोमुकुरमस्माकं पुनीयुरनुवासरम् ॥

Author—Bhaṭṭoji Dīkṣita.

Remarks — Only the first half of the work is included in this codex.

॥ प्रौढमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

766. PRAUḌHAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—18¼" × 2". Leaves—114. 11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—5000.

Subject—Same as No. 765.

Beginning:

... ... कृतं मङ्गलं शिष्याशिक्षार्थमुपनिबध्नाति—श्रौत्रेति । "ह्यायनान्तयुवादिभ्योऽणि"ति सूत्रे "श्रोत्रियस्य यलोपश्चे"ति वार्त्तिकात् श्रौत्रं, श्रोत्रियत्वम् । आर्हन्ती योग्य ... ... श्चे"ति सूत्रे अर्हतो नुम् चेत्युक्तेः । ताभ्यां वित्तैः । तथाच गुर्ण्यगुणवाद्भिः । "रूपाद्गहतप्रशंसयोर्यवि'ति सूत्रे 'अन्येभ्योऽपि दृश्यत' इत्युक्त्या गुण्या ब्राह्मणा इत्यस्य भाष्यादावुदाहृत ... ... तोष्ट्रयमान इति । स्तौतेर्यङन्तात्कर्मणि शानच ।

End:

पृष्टतो भूत्वेति । इहानुकूलो नानुकूलो वेति शब्देन न स्पृश्यते । अन्वक्छब्दस्य देशविशेषे पर्यवसानात् । प्रमाणान्तरेण क्वचिदानुकूल्यलाभेऽपि अन्वक्छब्दस्य तत्समर्पणे व्यापारविरहात् णमुल् न, किन्तु क्वाचेव व्यवस्था बोध्या ।

Colophon:

इति कृदन्तं समाप्तम् ।

इति श्रीमद्भट्टोजिदीक्षितविरचितायां प्रौढमनोरमायां कृदन्तं समाप्तम् ।

हरिः । श्रीगुरवे नमः ।

പിണ്ണാറനാല്പത്തുനാലാമാണ്ട കർക്കടകമാസം പഴഞ്ചാന്തിയതി
ബുധനാഴ്ചയും പൂവ്പ്രോവുപദനക്ഷത്രവും അപരപഞ്ചമിയും
അന്നു പിഴുതിത്തീർത്തിതു.

ईश्वरेण लिखितमिदं पुस्तकम् ।

Auther—Same as No. 765.

Remarks—Only the second half of the work is embodied in this Ms. A few leaves at the outset are missing. The opening Fol. is marked with the letters "जलन (131)" and the last "जवप्तक्त्र" (244)", thus bringing the number of pages to 114.

॥ फिट्सूत्रं लिङ्गानुशासनं च ॥

767 A. PHIṬSŪTRAM AND LIṄGĀNUŚĀSANAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—4. 7—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—100. Complete.

Subject—Determination of accents and genders of words.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । शुभमस्तु ।

फिषः अन्तोदात्तः । पाटलापा(ट?)लङ्काम्बासागरार्थानाम् । गेहार्थानामस्त्रियाम् । गुदस्य च । ध्यपूर्वस्य स्त्रीविषयस्य । खान्तस्य नाश्मादेः ।

End:

गृहमेहदेहपट्टपटहाष्टापदार्बुदककुदाश्च । अवशिष्टलिङ्गम् । अव्ययं कतियुष्मदस्मदः । ष्णान्ता संख्या । शिष्टाः परवत् । गुणवचनं च । कृत्याश्च । वुलादयः । करणाधिकरणयोर्ल्युट् । सर्वादीनि । समाप्तम् ।

Colophon:

इति पाणिनिलिङ्गानुशासनम् ॥

क्तल्युण्ण नपुंसके भावे स्त्रियां निङादयः . . . . तो वज्राद्याः पुंस्येव । यथा वक्रश्च योऽत्रः (?) इति ।

दक्षिणामूर्तये नमः ॥

Author—Pāṇini.

Remarks — The Ms. embodies *Phitsūtras* and *Liṅgānuśāsana.*

॥ उणादिवृत्तिः ॥

767 B. UṆĀDIVṚTTI.

Substance---Palm leaf. Size—14½" × 1½". Leaves —54. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1100.

Subject---Exposition of the *Uṇādi Sūtras.*

Beginning:

श्रीमहागणपतये नमः ।

कृवापाजिमिस्वदिसाध्यशूभ्य उणू ।

डुकृञ् करणे । वा गतिगन्धनयोः । पा पाने । जि जये । मित्र् प्रक्षेपणे । स्वद् आस्वादने । राध साध संसिद्धौ । अशू व्याप्तौ । एभ्यो लुप्तानुबन्धेभ्योऽण्प्रत्ययो भवति ।

End :

धा धेनेडिच्च । चायेरग्ने ह्रस्वश्च । व्रज्यशिभ्यां रङ् स्वङ्गयोर्वुक् च । तनिसुनिदतिसतिनभ्यो सम्पातिपतिवृहिभृभृभ्यश्च । यातिगतिलातिभ्यश्च । शमिमुषिस्यतिभाभ्यो मरुलोपश्च । मुते पौ चः ।

Colophon :

इति वाक्पाठनिरुक्तिः परिसमाप्ता ।

Author :

Remarks—The work furnishes no clue to ascertain the identity of the author. Just after its close begins the Vārtika Pāṭha.

॥ काविकल्पद्रुमधातुपाठः ॥

767 C. KAVIKALPADRUMADHĀTUPĀṬHA.

Substance—Palm leaf. Size—14½″ × 1½″. Leaves—19. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—400.

Subject—Enumeration of the verbal roots, in verse.

Beginning :

मितुशब्दकरग्राममर्थमण्डलमण्डलम् ।

ज्ञानान्म.....न्म द्यन्तमुपास्महे... .. ॥
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥
मतानि तेषाममलो सर्वसाधारणजिटा ।
मया तु पाठः स्वदनद्याद्यकमनन्तादिमक्रमः (?) ।
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यते तृचः ।
धातवः पठिताः पाठम्....लोकागमस्थिताः ॥

End :

एकत्रिंशदकारान्ता धातवः परिकीर्तिताः ।
अयञ्गतावेकत्रिंशदेकं चानेक्षुरर्श... ॥
विलेखेखनन्देकुम्रक्षुक्मि क्तौखोर(?)

Colophon :

Author :

Remarks—The Ms. opens with a list of verbal roots. Hence the title Kavikalpadrumadhātupāṭha.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

768. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—$19\frac{1}{2}'' \times 2''$. Leaves—35. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1250. Incomplete.

Subject—Elucidation of the Siddhāntakaumudī.

Beginning :

....श्रीगणपतये नमः.... ....

स जयति दिव्यनटेशो
नृत्यति योऽसौ चिदम्बरसभायाम् ।
पाणिन्या(दि?द्या) मुनयो
यस्य च दयया मनोरथानभजन् ॥

End :

अव एहि इति स्थिते एकादेशस्य गुणस्य एकारस्य, अन्तादिवच्चेति परादिवद्भावेन "आद्यन्तवदेकस्मिन्नि"ति व्यपदेशिवद्भावेन च इण्-धातोरेजादित्वात्तस्मिन् पर एडीति पररूपं बाधित्वा ए... ... ...

Colophon :

Author—Vāsudevadīkṣita.

Remarks—This Ms. is available in print at the Bālamanoramā Press, Madras. The *prakarana* on अच्सन्धि brings it to a close.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

769. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—17½" × 2½". Leaves—90. 10—12 lines per page and 64 letters per line. Script—Malayālam. No, of Granthas—400,

Subject—Same as No. 768.

Beginning :

रूपमेषां तानि सरूपाणि । ज्योतिर्जनपदेत्यादिना समानस्य सभावः । निर्धारणषष्ठी । वृद्धो यूनेत्युत्तरसूत्रादेवेत्यपकृष्यते । शिष्यत इति शेषः । कर्मणि घञ् । एकश्चासौ शेषश्चेति पूर्वकालैकेति समासः ।

End :

इकोऽचि विभक्तौ इत्यतः अचीत्यनुवृत्य अजन्तस्य क्लीबस्य सर्वनामस्थाने परे नुम् स्यादिति वार्त्तिकान्तराश्रयणादिति भाष्ये स्थितम् । एवं च ऊर्ह्लछब्दे शौ नरजानां संयोग इति मूलं भाष्यविरुद्धत्वादुपेक्ष्यमेव । तत्र अचः परस्य झलो नुमभावेन नुमः अप्रसक्तेः । इति जान्ताः । त्यदिति । त्यद् तद् यद् एतद् एषां स्वमोर्लुका लुप्तत्वात् त्यदाद्यत्वं पररूपम् । तदोः .... ।

Colophon :

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां स्त्रीलिङ्गनिरूपणम् ॥

Author—Same as No. 768.

Remarks—This Ms. opens with the explanation on the *Sarūpa Sūtra* and comes to a close with a fragment of *Halanta-Napumsakaprakarana*.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

770. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—18″ × 2″. Leaves—59. 12 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—3000. Incomplete.

Subject—Same as No. 768.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

तदेवं ङ्याप्प्रातिपदिकादित्यधिकृत्य स्वौजसमौडिति सूत्रं सप्रपञ्चं निरूप्य तदुत्तरमनुक्रान्तान् स्त्रीप्रत्ययान् निरूपयितु-माह— स्त्रियाम् । अधिकारोऽयमिति ।

End :

आयुक्तः कुशलो वेति । हरिभजनविषये आयुक्तः प्रवर्तित इत्यर्थः । अत्र वैषयिकाधिकरणत्वविवक्षायां सप्तम्यामेव प्राप्तायां सम्बन्धमात्रविवक्षायां तु षष्ठ्यामेव प्राप्तायां वचनम् । आयुक्ता गौरिति । आङीपदर्थे ।

Colophon :

Author—Same as No. 768.

Remarks—The Ms. proceeds from the *Strīpratyaya-prakarana* and ends with *Kārakaprakarana*.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

771. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudī.

Substance—Palm leaf. Size—18" × 1¾". Leaves—96. 10 lines per page and 72 letters per line. Script—Grantha. No. of Granthas—4320—Incomplete.

Subject—Same as No. 768.

Beginning :

हरिः । ॐ ।

तदेवं निरूप्य विभक्त्यर्थं तदाश्रितसमासान् निरूपयिष्यन् तदुपोद्घातत्वेनाह—समर्थः पदविधिः ।

End :

आकृतिगणोऽयमिति । तेन शतात् पराणि परःशतानीत्यादि सिद्धम् ।

Colophon :

इति समासाश्रयविधिनिरूपणम् ।

Author—Same as No. 768.

Remarks—The Ms. contains the *Samāsaprakarana* and the *Samāsāśrayaprakarana* only. The last five leaves but one are left blank and the sixth contains the following five verses composed by Kerala Varmā ;

ग्रन्थोऽयं मे रमयति मनो मूलकूलंकपार्थ-
ज्ञानोत्सुक्याल्लिखितपठितो धीरलोकैकशोकैः ।
भूमीदेवो विपुलहृदयो वासुदेवोऽतनोद् यां
विद्याराशिर्निखिलनिगमक्षीरधेः पारदृश्वा ॥
रमयति मम यतिवर कृतिरेषा
सुरवरगुरुमुखबुधजनवन्द्या ।
बहुविधबुधवरसुकठिनवाक्यैः
शपितहृदुरुतरविबुधकृताचा ॥
एषा वाक्यैर्मार्दवयुक्तैर्बहुसौहार्दं द्राक्
प्राज्ञश्रेणीनां लभते सद्गुणसन्दोहाढ्या ।
एनामेनोभञ्जनसक्तान्तरयुक्तो मोदा-
च्चित्ते नित्यं संवहतु प्राणिसमूहः पुण्यः ॥
समस्तशास्त्रपण्डितो निरस्तदोषमण्डलो
महीतलैकमण्डनः कृतान्यपक्षखण्डनः ।
अशेषधीरवन्दितो गुणैश्च याति सुन्दरो
रराज स ह्यमन्दधीश्च वासुदेवसंज्ञकः ॥
कौमुदीतत्त्वबोधलोलैर्बालमनोरमा ।
एषा तोषोदयाल्लोकैः सम्व्रत्यन्विष्यतेऽखिलैः ॥
केरलवर्मनिर्मितानि एतानि पद्यानि ॥

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

772. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudi.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—.

151. 11 lines per page and 92 letters per line. Script—Malayāḷam. No. of Granthas—9550. Incomplete.

Subject—Same as No. 768.

Beginning—Same as No. 771.

End :

अमुभावादि पूर्ववत् । चार्थे द्वन्द्व इति निपातनादन्यत्रापि इति सिद्धम् । इति द्विरुक्तिप्रक्रिया ।

Colophon :

इति श्रीमन्सन्ततसन्तन्यमानश्येनकूर्मपोडशारथचक्राकारादिबहुगुणविराजमानप्रौढापरिमितमहाध्वरस्य श्रीशाहजीशरभोजीतुक्कोजीभोसलचोळमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमदानन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीयेण बाल्य एव तदयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयसर्वपृष्ठासोयमिप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन पदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजिनो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण बौधायनापस्तम्बसत्याषाढभारद्वाजकात्यायनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेयिसुतेन अन्नपूर्णागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पूर्वार्धं सम्पूर्णम् ।

हरिः ओं । श्रीगुरुभ्यो नमः ।

Author—Same as No. 768.

Remarks—The Ms. covers the portion extending from *Samāsaprakaraṇa* to the end of *Pūrvārddha*.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

773. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudi.

Substance—Palm leaf. Size—18¾" × 1¾". Leaves—52. 9—12 lines per page and 72 letters per line. Script—Grantha. No. of Granthas—2350. Incomplete.

Subject—Same as No. 768.

Beginning:

शुभमस्तु ।

आत्मनेपदपरस्मैपदव्यवस्थापकानि सूत्राणि प्रथमस्य तृतीयपादे पठितानि । तानि तानि क्रमेण व्याख्यास्यन् व्याख्यातमपि सूत्रं पुनः स्मारयति— अनुदात्तङित इति ।

End:

"आदितश्च" इति नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम् । आदिच्चस्य तु फ(लमात्मनेपदमात्रम्)

Colophon:

इति श्रीलकारार्थप्रक्रियानिरूपणम् ।

Author—Same as No. 768.

Remarks—The Ms. commences with *Padavyavastha* and extends upto the *sūtra* "रुप्यमत्वर—" in the *Krdantaprakarana*.

॥ बालमनोरमा (सिद्धान्तकौमुदीव्याख्या) ॥

774. BĀLAMANORAMĀ.

Commentary on Siddhāntakaumudi.

Substance—Palm leaf. Size—16½" × 1½". Leaves —54. 10—12 lines per page and 64 letters per line. Script—Grantha. No. of Granthas —2000.

Subject—Same as No. 768.

Beginning :

तदेवं "प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः" इति प्रतिज्ञातेषु तृतीयाध्यायस्थप्रत्ययेषु प्रथमपादे "प्रत्ययः,परश्च" इत्यारभ्य "कुषिरजोः प्राचां श्यन्" इत्यन्तैः सूत्रैः विहिताः कतिचित् प्रत्यया निरूपिताः। अथ तदुत्तरसूत्रविहितान् निरूपयितुमुपक्रमते — धातोः। आतुदीयेति—

End :

अन्वक्यानुलोम्ये। अनूचीत्येव वक्तुमुचितम्। सौत्रत्वादयं निर्देशः। तिर्य...तिवत् आनुलोम्यम् आनुकूल्यम्। पृष्ठतो भूत्वेति। अ... थम...न्ते अन्वगध्वर्युरित्यादौ अन्वक्शब्दस्य पृष्ठभावार्थत्वप्रसिद्धेरिति भाव इति सर्वं रमणीयम्।

Colophon :

इति वासुदेवदीक्षितविरचितायां बालमनो.....
वृत्तिरियं समाप्ता। कृदन्तबालमनोरमा च पूर्णा ॥

अन्युच्छ्रेतेषु सकलेष्वपि भोज्यवर्गे-
ष्वाभाति तुच्छमतिरुच्छगिरा च यस्य ।
तस्यास्तु तामरसमोदरपादपद्म-
द्वन्द्वाय नाथ इति नाम जुषो नमस्या ॥
ओम् ।

Author—Same as No. 768.

Remarks—The Ms. embodies the whole of *Kṛdanta-prakaraṇa*. It has become mouldy.

॥ महाभाष्यम् ॥

775. MAHĀBHĀṢYAM.

Substance—Palm leaf. Size—22½" × 2". Leaves—96. 11 lines per page and 82 letters per line. Script—Malayāḷam. No. of Granthas—5300. Incomplete.

Subject—Explication of the *Sūtras* of *Pāṇini*.

Beginning :

श्रीपतञ्जलये नमः ।

अथ शब्दानुशासनम् । अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् । केषां शब्दानाम् । लौकिकानां वैदिकानां च ।

End :

यदा नदीसंज्ञया घिसंज्ञा बाधिता, तत उत्तरकालं यणादेशेन भवितव्यम् । नद्याश्रयो बह्वणादेशस्य ह्रस्वस्य नदीसंज्ञा भविष्यति । बहुव्रीह्यर्थं तु । बहुव्रीहिप्रतिषेधार्थं तु शेषग्रहणं कर्त्तव्यम् । शेषो बहुव्रीहिरिति किं प्रयोजनम् । प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु । अव्ययीभावे... ... ...

Colophon :

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य तृतीयपादे द्वितीयमाह्निकम् । पादश्च समाप्तः ॥

Author—Patañjali.

Remarks—The Ms. completes with the 3rd *pāda.* of the 1st chapter. The work is available in print.

॥ महाभाष्यम् ॥

776. MAHĀBHĀṢYAM.

Substance—Palm leaf. Size—15″ × 2″. Leaves—99. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3000. Incomplete.

Subject—Beginning—Same as No. 775.

End :

उत्क्राममुक्रामेति । इह किञ्चिदङ्गाधिकारे लुप्ते प्रत्ययल-

क्षणं भवति। किञ्चिच्चान्यत्र भवति, यदि पुनर्न लुमता तस्मिन्नित्युच्येत।

... ...

Colophon :

प्रथमस्याध्यायस्य प्रथमपादे अष्टममाह्निकम्।

Author—Same as No. 775.

Remarks—The first nine Āhnikas are incomplete in this Ms.

॥ महाभाष्यप्रदीपः ॥

777. MAHĀBHĀṢYAPRADĪPA.

Substance—Palm leaf. Size—13¼″×1⅝″. Leaves—200. 7—10 lines per page and 44 letters per line. Script—Grantha. No. of Granthas—4750.

Subject—Explication of the Mahābhāṣya.

Beginning:

हरिः ओम्। शुभमस्तु।

समर्थः पदविधिः। विधिरिति कोऽयं शब्द इति। अर्थानिश्चयात् सन्देहे सति प्रश्नः। किं भावसाधनः उत कर्मसाधनः। तत्र भावसाधने पदानां विधीयमानत्वात् कर्मणि षष्ठी। इतरत्र तु शेषषष्ठी।

End :

झस्य रान्नेति नकारोच्चारणसामर्थ्यान्न भविष्यति। इदं तर्हि

विचीयादिति कृद्यकारत्वात् दीर्घो न प्राप्नोति। एषोऽप्य-दोषः। सार्वधातुकप्रतिषेधो ज्ञापयत्ययदिति प्रतिषेधस्तिङो न भवतीति। यदि हि स्यात् सुनुयाच्चिनुयादित्यादावपि सार्वधातुके कृत्प्रतिषेधाद् दीर्घो न भविष्यतीति पृथक् सार्वधातुकप्रतिषे-धोऽनर्थकः स्यात्॥

Colophon :

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे तृतीयाध्या-यस्य प्रथमे पादे पञ्चममाह्निकम्।

हरिः। शुभमस्तु।

Author—Kaiyaṭa, son of Jaiyaṭa.

Remarks—The Ms. contains the second chapter and a fragment of the 3rd. After the colophon the following few lines are seen:

वासरूपोऽस्त्रियाम्॥ कथमिति। स्त्रियामित्यभिधेयसप्तमी वा स्यात्। स्त्रियामित्यस्यैव वा रूपस्य निषेधः स्यात् स्त्रियामित्युच्चार्य ये प्रत्यया विधीयन्ते तेषु वासरूपो न भवति। सन्दिहानः पृच्छति लब्धेति। अचा यदिति। यदा तव्यादीनां नित्यं बाधनं प्राप्नोतीत्यर्थः। व्यावक्रोशीति कर्मव्यतिहारे णच् स्त्रियामिति णचा क्तिनो... ....।

இது இம்மட்டு அரடும ஞ ஆவணி மீ ௰௨ எழுதி முகிந்தது.

॥ महाभाष्यप्रदीपः ॥

778. MAHĀBHĀṢYAPRADĪPA.

Substance—Palm leaf. Size—23″ × 1¼″. Leaves —69. 4 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—950. Incomplete.

Subject—Same as No. 777.

Beginning :

व्यक्तिद्वारकं वा जातेः परिमाणमाश्रीयते । एकैकव्यक्तिव्य-(ङ्ग्या हि) जातिर्न समुदायव्यङ्ग्या । उच्चैः पष्ठीनिर्दिष्टमिति । उच्चैर्नीचैरित्येते अव्यये अधिकरणशक्तिप्रधाने । तत्राच इत्यस्यानुवृत्तौ सत्यामयमर्थो भवति । उच्चैःस्थाने उपलभ्यमान उदात्तसंज्ञो भवति । स चाचः स्थान इति ।

End :

अनेकशफेष्वित्ति । उष्ट्राणां त्वारण्यकत्वात् स्त्रीशेषाभावः । तत्रानेन प्रकरणेन प्रयोगस्य नियतत्वाद् जातिः क्वचिदाश्रयलिङ्गेन स्त्रीत्वेन व्यपदिश्यते । क्वचित् पुंस्त्वेनेत्युक्तं भवति ।

Colophon :

इत्युवाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीयपादे तृतीयमाह्निकम् । पादश्च समाप्तः ।

Author—Same as No. 777.

Remarks—The Ms. ranges from the 28th *Sūtra*

Pada 2, chapter 1, to the end of the 2nd *Pada* in the 1st chapter. It has begun to decay.

॥ महाभाष्यप्रदीपविवरणम् ॥

779. MAHĀBHĀṢYAPRADĪPAVIVARAṆAM.

Substance—Palm leaf. Size—21¼" × 2¼". Leaves—104. 11 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—5700.

Subject—Explanation of the Mahābhāṣyapradīpa

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

देवं दन्तिमुखं नत्वा भारतीमिहिरेश्वरः(?) ।

गुरुं च क्रियते टीका कैयटीयकृतेर्मया ॥

प्रारिप्सितताविघ्नसमाप्त्यादिसिद्धये परदेवतादिप्रणतिपुरःसरं चिकीर्षितं प्रतिजानीते—सर्वाकारमित्यादिना । लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायात् नमस्कार्यपरमात्मनो लक्षणं तावदाह सर्वाकारमिति । जगदुपादानत्वं तल्लक्षणमित्यर्थः । तदर्थं चेदं लक्षणं परमात्मनः शास्त्राग्रमिव चन्द्र ... ... स्वरूपलक्षणं तु सत्यज्ञानादिकं बोध्यम् । प्रमाणं त्वत्रागमो द्रष्टव्यः ।

End:

कुर्णिनेति । व्यवस्थितविभाषान्वेनेत्यर्थः । क्रोडग्रहणमग्रादेशवाचि । देवदत्तस्याप्युपलक्षणम् । भाष्यकार इति । से पुनरद्य प्राग्देशवाच्युदाहरणाद्वृद्धलक्षणेति फञि मयटौ तल्लक्षणौ । व्यवस्थितेति । अत एव सेरादौ नित्यं वृद्धत्वम् ।

Colophon :

सूय(तामितां) पण्डितैः स्वात्मा पाण्डित्यं यत्प्रसादतः ।
स गुरुः सूयतेऽस्माभिर्माधवार्पितमानसैः ॥
जयति विबुधराजो भूसुरैः पूज्यमानो
जगदि... ... ... युक्तो यज्वनामग्रगण्यः ।
गुरुन(येय)वशवर्ती गोध्वजे भक्तियुक्तो
Subject—The inflected forms derived from verbal roots.

Beginning:

नमश्शिवाय । देवच्छत्रम् । भूच्छः । म्लेच्छः । वधू छाया वधूच्छाया कुमारी छाया कुमारीच्छाया आच्छादय... ...मध्वत्र । वध्वाकृति पित्रर्थम् लाकृतिः । नयनं लवनं नायकः लावकः । देवेह खट्वेह तवोदकम् ।

End:

भावकः भविता । कारकः कर्ता । नायकः नेता । भाविका भवित्री । नायिका नेत्री । भाविकं भवितृ । नायकं नेतृ । कारकः कर्ता । पाचकः पक्ता । लेखकः लिखिता । संकुटिता सङ्कोटकः । उत्पुटिता उत्पोटकः । उद्विजिता उद्वेजकः ।

Colophon:

इति सनाद्यन्तपरिच्छेदः पञ्चमः । हरिः नमश्शिवाय ।
सुबोधनार्थमिदम् । शिवाय ।

Author:

Remarks—The Ms. consists of only 51 leaves though the last leaf is marked with the letter-numerals "൩൩" (63).

॥ सिद्धरूपम् ॥

825. SIDDHARŪPAM.

Substance—Palm leaf. Size—$6\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—

91. 8 lines per page and 22 letters per line. Script—Malayālam. No. of Granthas—1000. Incomplete.

Subject—Same as No. 824.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अ ... ... पुल्लि ... ... वृक्षशब्दः ।

वृक्षः वृक्षौ वृक्षाः । हे वृक्ष हे वृक्षौ हे वृक्षाः ।
वृक्षं वृक्षौ वृक्षान् । वृक्षेण वृक्षाभ्याम् वृक्षैः ।
वृक्षाय वृक्षाभ्याम् वृक्षेभ्यः । वृक्षात् वृक्षाभ्याम् वृक्षेभ्यः ।
वृक्षस्य वृक्षयोः वृक्षाणाम् । वृक्षे वृक्षयोः वृक्षेषु ।

End :

अपलायत	अपलायेताम्	अपलायन्त ।	(?)
अपलायथाः	अपलायेथाम्	अपलायध्वम् ।	
अपलाये	अपलायावहि	अपलायामहि ।	

लोट्

पलायतु पलायतात्	पलायताम्	पलायन्तु	(?)
पलाय पलायतात्	पलायतम्	पलायत	
पलायानि	पलायाव	पलायाम ।	

Colophon :

Author :

Remarks—The Ms. contains the inflected forms of both nouns and verbs. Five leaves at the close are missing.

॥ सिद्धरूपम् ॥

826. SIDDHARŪPAM.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—48. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—648. Incomplete.

Subject—Same as No. 824.

Beginning—Same as No. 825.

End:

लृटि

होष्यति	होष्यतः	होष्यन्ति ।
होष्यसि	होष्यथः	होष्यथ ।
होष्यामि	होष्यावः	होष्यामः ।

Colophon:

ൻ൧൩-ാമാണ്ടു് മേടമാസം ൨ൻ-ാം തീയതി ഇടവം രാശിക്കു എഴുതിതീൎത്തതു്. വള്ളുമനെ വിക്രമൻ.

शुभमस्तु ।

Author:

Remarks — The work enumerates the common

words occurring in *Subanta* and the inflections of the root up to the end of "दृङ्".

॥ सिद्धरूपम् ॥

827. SIDDHARŪPAM.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—35. 7—8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—620. Incomplete.

Subject—Same as No. 824.

Beginning—Same as No. 825.

End :

असविष्ट	असविषाताम्	असविषत ।
असविष्ठाः	असविषाथाम्	असविढ्वम् ।
		असविध्वम् ।
असविषि	असविष्वहि	असविष्महि ॥
असोष्ट	असोषाताम्	असोषत ।
असोष्ठाः	असोषाथाम्	असोढ्वम् ।
असोषि	असोष्वहि	असोष्महि ॥

Colophon :

Author :

Remarks—The Ms. sets forth the aoristic inflections of the root "दृङ्" and the last Fol. points out some more roots like "भू, राध्" etc.

॥ सिद्धरूपम् ॥

828. SIDDHARŪPAM.

Substance—Palm leaf. Size—10″ × 1¼″. Leaves—32. 7—10 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—550.

Subject—Same as No. 824.

Beginning—Same as No. 825.

End :

लोट्

नन्दतु--नन्दतात्	नन्दताम्	नन्दन्तु ।
नन्द--नन्दतात	नन्दतम्	नन्दत ।
नन्दानि	नन्दाव	नन्दाम ।

Colophon :

लिङ्

... ...

इति हलन्ता नपुंसकलिङ्गाः समाप्ताः ।

Author :

Remarks—The Ms. contains the *Subanta* and a fragment of the *Tiṅanta* prakaraṇas.

॥ सिद्धान्तकौमुदी ॥

829. SIDDHĀNTAKAUMUDĪ.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—295. 10—12 lines per page and 55 letters per

line. Script—Malayāḷam. No. of Granthas—10000.

Subject—Elucidation of the *sūtras* of Pāṇini in the light of the *Prakriyas*.

Beginning:

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्,ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल् इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः ।

End:

रत्नं दधातीति रत्नधाः । समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः । तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयावित्यादिर्यथाशास्त्रमुन्नेयः ।

Colophon:

इति स्वरप्रकरणम् । इति सिद्धान्तकौमुद्यामुत्तरार्द्धं समाप्तम् । ശ്രീരാമജയം. शुभमस्तु ।

Author—Bhaṭṭojidīkṣita.

Remarks—The Ms. deals with the *Kṛdantaprakarana* at the beginning, *Liṅgānuśāsana* next and finally *Vaidikaprakriyā*. The last two sections are separately numbered.

॥ सिद्धान्तकौमुदीं ॥

830. SIDDHĀNTAKAUMUDĪ.

Substance—Palm leaf. Size—22¼″ × 2¼″. Leaves—96. 14 lines per page and 92 letters per line. Script—Malayāḷam. No. of Granthas—7700.

Colophon :

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद् भगवतोर्भवानीविश्वनाथयोः ॥
इति सिद्धान्तकौमुद्यां कृदन्तः समाप्तः ।

Remarks—Several leaves in the Ms. are damaged. The Ms. extends up to the *Kṛdantaprakaraṇa*.

॥ सिद्धान्तकौमुदी ॥

831. SIDDHĀNTAKAUMUDĪ.

Substance—Palm leaf. Size—18½″ × 2″. Leaves—122. 10—14 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—6500.

Remarks—The Ms. covers the whole of the *Tiṅanta prakaraṇa*.

॥ सिद्धान्तकौमुदी ॥

832. SIDDHĀNTAKAUMULĪ.

Substance--Palm leaf. Size—15″ × 2″. Leaves—57. 11—12 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—2050.

Remarks—The Ms. proceeds up to the *Kārakaprakarana*.

॥ सिद्धान्तकौमुदी ॥

833. SIDDHĀNTAKAUMULĪ.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—47. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Remarks—The Ms. finishes with the *Stripratyayaprakarana*.

॥ सिद्धान्तकौमुदी ॥

834. SIDDHĀNTAKAUMUDĪ.

Substance—Palm leaf. Size—19¾″ × 1¾″. Leaves—21. 5—6 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—350.

Remarks—The Ms. contains the *Sandhitraya* and a few *Sūtras* in the beginning of *Sabdādhikāra*. It is decayed a little.

॥ सिद्धान्तकौमुदी ॥

835. SIDDHĀNTAKAUMUDĪ.

Substance—Palm leaf. Size—11″×1¾″. Leaves—30. 9—11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—750.

Remarks—The Ms. opens with a fragment of भ्वादि and concludes with नामधातुप्रक्रिया ।

॥ स्वरसिद्धान्तचन्द्रिका ॥

836. SVARASIDDHĀNTACANDRIKĀ.

Substance—Palm leaf. Size—14½″×2″. Leaves—84. 10 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—1875. Incomplete.

Subject—Exposition of the accentual Prakriyas.

Beginning :

हरिः ओम् ।

उपासितव्यमन्तरायशान्तये सदा सत-
श्चिकीर्षितोऽप्युपासनं हि देवतान्तरस्य यत् ।
पदाम्बुजं वयं तदेव चिन्तितप्रदं नृणां
विचिन्तयामहेतरां निरन्तरं हृदन्तरे ॥
सिद्धिः कार्यस्य निर्विघ्ना यदधीना विधेरपि ।

तदस्तु हस्तिवदनं वस्तु निःश्रेयसाय नः ॥

निःश्वसितं श्रुतिरखिला विश्वमिदं यस्य केवला लीला ।
तस्मै धाम्ने गिरिजासिश्रितवपुषे नमोऽस्तु कस्मैचित् ॥

प्राणैष्ट व्याकरणं यदनुग्रहलेशतो मुनिः कृत्स्नम् ।
यस्याभाषिष्ट महाभाष्यं भूत्वा भजे तमीशानम् ॥

कराभ्यां कस्याश्चित् कमलनयनायाः परिसरे
दृशो लीलाव्याजात् सपदि वलयन् केलिकमलम् ।
पराग्भैस्तस्यास्यान्मुकुलितदृशि स्वैरमपरा-
मथालिङ्गन् हृष्टो दिशतु मदभीष्टं मुररिपुः ॥

व्याकृतिनिर्माणचणान् प्रणमामि त्रीन्मुनीञ्जगद्वन्द्यान् ।
गुरुमपि सबहिमणां वन्दे श्रीरामभद्रयज्वानम् ॥

संकृत्यन्वयसम्भवाद् गुणमहाम्भोधेरनन्ताम्वया
जाह्नव्येव पवित्रया क्षितितले संवर्त्तितश्रेयसः ।
जातः कृष्णविपश्चितो विधुरिव प्रीणन् बुधानां मनः
सन्मार्गाभिगमोज्ज्वलो विजयते स श्रीनिवासः सुधीः ॥

पदवाक्यप्रमाणाब्धिपारावारीणबुद्धिना ।
तेन शुश्रूषितानेकगुरुलम्भितसिद्धिना ॥

तैत्तिरीयकशाखानुसारिणी विदुषां मता ।
विरच्यते धियः शुद्ध्यै स्वरसिद्धान्तचन्द्रिका ॥

कष्टं व्याकरणं पतञ्जलिरपि प्राह स्म तत्राप्यसौ
दुर्ज्ञानं मतिमद्भिरप्यतितरां कष्टा स्वरप्रक्रिया ।
कैषा सा क्व मलीमसा मम मतिर्मन्दा तथाप्युत्सहे
यन्मह्यं दयतेतरां निरवधि श्रीरामभद्रो गुरुः ॥

निश्चित्य स्वरशास्त्रतत्त्वमखिलं भाष्यादिभिर्भास्करा-
चार्याद्याराचितं विमृश्य सुचिरं भाष्यं श्रुतीनामपि ।
यच्चाकाङ्क्षितमत्र नैव कथितं तत्प्रातिशाख्यादितः
संगृह्य ग्रथिता मुदेऽस्तु विदुषामेषानवद्या कृतिः ॥

न्यक्कृतपूर्वनिबन्धा सत्कृतसत्सम्प्रदायरमणीया ।
कस्य न मोदं तनुते कृतिरेषा मृदुपदावलीरचिता ॥

आम्नाये ये प्रवीणाः परिचयरहिताः प्रायशस्ते पदार्थे
ये स्युस्तत्रापि दक्षाः शिथिलपरिचयास्ते स्वरप्रक्रियायाम् ।
ईर्ष्यान्धाः केऽपि तत्राप्यधिकपरिचयाः किन्तु सन्तोऽनसूयाः
पृथ्व्यां पृथ्व्यां भवेयुः कतिचन सकलो यत्र यत्नो मदीयः ॥

अथात्र स्वरसूत्राणां संख्याप्रकरणान्यपि ।
बुद्धेर्विशुद्धये पद्यैरमीभिः प्रतिपादये ॥

चतुस्सहस्री सूत्राणां पञ्चसूत्रीविवर्जिता ।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह ॥

सप्ताशीत्यधिका तेषु त्रिंशती सौवरी मता ।
पञ्चैकादश वा ज्ञेयाः स्वरे योगा उणादिषु ॥

संख्या फिट्सूत्रसूत्राणां विज्ञेयाशीतिरष्ट च ।
त्रिंशत्सूत्री प्रातिशाख्यात् सङ्गृहीतात्र सौवरी ॥

सम्पद्यते पञ्चशती मेलने षोडशाधिका ।
सैषा पञ्चशती स्पष्टमत्र ग्रन्थे विविच्यते ॥

संख्योदात्तादिपदवत् सूत्राणामियमीरिता ।
डीन्ङीषादिविधायीनि सूत्राणि सुबहून्यपि ॥

स्वैरैकफलकान्येवं गणसूत्राणि कानिचित् ।
सन्ति सूत्राण्युदात्तादिनिपातनपराण्यपि ॥

वार्तिकानि प्रसिद्धानि सौत्राणि बहून्यपि ।
किं बहुना श्रुतिरखिला ब्रह्माद्वैतैकपरतया यद्वत् ।
तद्वद् व्याकृतिरखिला स्वरबोधैकप्रयोजना जयति ॥

द्वादशात्र प्रकरणान्याद्यमारम्भणं कृतेः ।
उपोद्घातान्यथ त्रीणि तेष्वाद्ये प्रतिपादितम् ॥

उदात्तादेः स्वरूपादिः परिभाषा द्वितीयके ।
तार्तीयीके तु सर्वत्रापेक्षितः संहितास्वरः ॥

अथाटसु प्रकरणेष्वर्थो व्युत्पादिता अमी ।
धातोः स्वरप्रत्ययस्य समासस्य किमस्तथा ॥
सर्वानुदात्तभावश्च सुबन्तानां तिङामपि ।
स्वरः प्लुतानामप्येतच्छ्रुतिश्चेति यथाक्रमम् ॥

अवान्तरप्रकरणान्यत्र सन्ति बहून्यपि ।
जित्स्वरादयस्तेषु व्युत्पाद्या इति संग्रहः ॥

End:

अयःस्थूणसदृशौ अयस्थूणौ वाहू संज्ञामुत्पन्नस्य क... ...देवपथादिभ्यश्चेति लुबिति वेदभाष्ये । ननु सर्वत्रात्र प्रत्ययलक्षणेन निदन्तत्वसंभवात् पूर्वसूत्रेणैव स्वरसिद्धिः । न च न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधः । अङ्गस्येत्यङ्गाधिकारप्रतिनिर्देशपक्षे तदभावात् आङ्गमनाङ्गं वा वस्तुतो यदङ्गस्य कार्यं तत्प्रतिषेधपक्षेऽपि णिनिप्रत्ययान्तस्यैव इदं कार्यं न त्वङ्गस्येति निषेधप्रसंगात् । अत एव पञ्च सप्तेत्यादौ प्रत्ययलक्षणेन सुबन्तत्वमाश्रित्य पदसंज्ञाप्रवृत्तिः ।

Colophon:

इति सुबित्स्वरः । ओम् ।

Author—Srinivāsa, Sankṛtagotra.

Remarks—The author was the son of Kṛṣṇa of Saṅkṛtagotra. His mother was Ānantāmbā and his preceptor, Rāmabhadrayajva. The work is written in accordance with the Taittiriyaśākhā.

॥ स्वरसिद्धान्तचन्द्रिका ॥

837. SVARASIDDHĀNTACANDRIKĀ.

Substance—Palm leaf. Size—17½"×2". Leaves——125. 11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—9500.

Subject—Beginning—Same as No. 836.

End:

ब्राह्मण इत्यत्र द्वितीयस्याचोऽनुदात्तत्वार्थं ब्रह्मग्रहणमपि कर्तव्यमिति । इदमेव स्वरितस्यानुदात्तग्रहणं लिङ्गं तस्मादित इत्यादिनवसूत्र्युत्कर्षे । अन्यथा उदात्तादनुदात्तस्येति स्वरितस्यासिद्धत्वेन तस्यानुदात्तत्वविधानं स्यात् । ये तु एकादेश उदात्तेनेत्यत्रानुदात्तपदं नानुवर्तयन्ति, तन्मते स्वरितस्य तूदात्त इत्येतदप्युत्कर्षज्ञापकमिति सिद्धम् ।

Colophon:

इति श्रीमत्कृतिकुलजलधिकौस्तुभस्य श्रीमद(नन्ता)म्बापरिष्कृतगृहमेधिभावस्य श्रीकृष्णसूरेः सूनुना पदवाक्यप्रमाणपारावारीणप्रज्ञासमुल्लासेन श्रीनिवासेन विरचितायां सिद्धान्तचन्द्रिकायाम् एकश्रुतिप्रकरणं समाप्तम् । श्रीगुरुभ्यो नमः ।

आरम्भप्रकरणम्
उदात्तादिस्वरूपप्रकरणम्
परिभाषाप्रकरणम्
संहितास्वरप्रकरणम्
धातुप्रकरणम्
प्रत्ययस्वरप्रकरणम्
समासस्वरप्रकरणम्
कित्स्वरप्रकरणम्
सुबन्तसर्वानुदात्तप्रकरणम्
प्लुतस्वरप्रकरणम्
एकश्रुतिप्रकरणम् ।

Author—Same as No. 836.

Remarks—An index to the topics dealt with in this Ms. is given in the wake of the colophon.

॥ न्यायः ॥

॥ आलोकः (तत्त्वचिन्तामणिव्याख्या) ॥

838. ĀLOKA

Commentary on Tattvacintāmaṇi.

Substance—Palm leaf. Size—20½"×2". Leaves—179. 10 lines per page and 74—80 letters per line. Script—Malayāḷam. No. of Granthas—8000. Incomplete.

Subject—Exposition of knowledge from the logical point of view.

Beginning:

ज्ञानं कोट्युपस्थितिः संशय इति प्रणालिकया तृतीयक्षणे संशयः। सामग्रीसत्वात् संशयसाधारणकारणोत्पत्तिमपेक्ष्य कार्योत्पत्तिक्रमेण तदनन्तरतृतीयक्षणमेवापेक्षणीयेतराभावात्। अर्थस-.....स्तु न तावन्मात्रहेतुकः। तावन्मात्रसत्वेऽपि प्रामाण्यसंशयविलम्बेनानुत्पादात्। तथाच न तदवधिकतृतीयक्षण इति वस्तुरीतिः।

End:

साधकाभावेनेति। यद्यत्र प्रमाणे लघुगुरुविषयतासंभवस्तत्रैवं लाघवं सहकारि न ह्येकस्य लघुविषयतासंभवः। अन्यस्य गुरुविषयस्य प्रमितिजनने विरोधिगुरुमात्रस्यासिद्धिप्रसंगादविषयान्तरे लाघवावतारस्य सर्वत्र सुलभत्वादिति। मैवम्। यत्रैकैकसिद्धिरपसिद्धिविरोधिनी तत्रैव लाघवावतारस्य गुरुसिद्धिप्रतिबन्धकत्वात्। स च गौरवाद्यवतारो भिन्नयोरेकस्य वेत्यत्राविशेषादिति संक्षेपः।

Colophon:

രാമശാസ്ത്രികം വ്യുത്പത്തിയത്തു 1060-ാമാണ്ടു പൂരട്ടാശി മാസം 20-ാംനു അവസാനിച്ചതു്.

इति महोपाध्यायजयदेवमिश्रकृतौ प्रत्यक्षालोकः समाप्तः।

Author: Jayadevamiśra.

Remarks—The Ms. commences on the *Pratyakṣa Khaṇḍa* and ends with *Anumāna Vyāpti Khaṇḍa*.

॥ कुसुमाञ्जलिव्याख्या ॥

839. KUSUMĀÑJALIVYĀKHYĀ.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—48. 8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—775. Complete.

Subject—Same as No. 838.
Beginning:

शुभमस्तु । अविघ्नमस्तु ।

श्रीगुरुभ्यो नमः । कुसुमाञ्जलिप्रथमस्तवकारम्भः ।

ईषदायत(कटाक्ष)विद्यया तातमातृमुदमाविवर्धयन् ।
क्षेपणाय भवकर्मजन्मनां कोऽपि गोपतनयो नमस्यते ॥

इष्टदेवतासङ्कीर्तनं ब्रह्मप्रतिपादकस्य च शब्द(स्य) प्रयोगात्मकं च मङ्गलं कुर्वन् ग्रन्थनामाह—

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनाञ्जलिः ॥

End:

अस्माकं तु निसर्गसुन्दर चिराच्चेतो निमग्नं त्वयि
त्वद्भानन्दनिधौ तथापि तरलं नाद्यापि सन्तृप्यते ।
तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ॥

अद्धा तत्त्वं सन्तृप्यत इति कर्मकर्तरि ।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री-
र्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥

Colophon :

इति पञ्चमस्तबकः । नो वासयेत् ततः किमस्माकम् ।
इति हरिदासभट्टाचार्यविरचितकुसुमाञ्जलिकारिकाव्याख्यानं समाप्तम् ।

हरिः ओम् । गुरुभ्यो नमः ।

1058-ാമാണ്ടു കാൎത്തികൈമാസം ൫-ാംനു-പൊൻ്ഞ്ച ഇൎയ്യൎ

Author—Text : Udayanācārya.

Com : Haridāsabhaṭṭā.

Remarks—The work is printed in Benares.

॥ खण्डनपरिशिष्टम् ॥

840. KHAṆḌANAPARIŚIṢṬAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—73. 8 lines per page and about 22—26 letters per line. Script—Grantha. No. of Granthas—876. Incomplete.

Subject—Refutation of the other schools of thought for the establishment of Nyāya philosophy.

Beginning :

हरिः । श्रीगणपतये नमः ।

मातस्त्वां बहुधा वदन्ति बहवो यद्बुद्धिवृत्तिर्यथा
को वा वारयितुं क्षमेत हि शिवे! त्वन्मायया सार्पिता ।

वृत्तिं तामपसार्य दर्शय शिशौ दीने दयाम्भोनिधे
मूर्तिं तामविचिन्त्यतत्त्वकणिकां याचेऽङ्घ्रियुग्मात्मिके ॥
नमामि भक्त्या नियतं विमला सीतानाथपदाब्जयुगम् ।
यौ हि जन्मादिहेतु.....अविचिन्त्यविभवौ नराकृती(?) ॥
स जयति काशीराजद्विजेश्वरी प्रसाद नारायणश्च । (?)
यः प्रपालयति नित्यं पुत्रवदाखिलदुःखविनाशी ॥
जयति जयरामनामा गुरुराजः श्रीमानखिलगुणधामा ।
येनार्पितः करुणया व्याकरणादिशास्त्रे बोधः ॥
जयति राखालचन्द्रः तर्ककुमुदचन्द्रः कुलाब्धिचन्द्रः ।
यो नाशयदज्ञानं तर्कामृतकिरणवर्षणेन ॥
जयति विशुद्धानन्दः परमविज्ञानो विशुद्धानन्दः ।
यस्मादुदियाय वेदवेदान्तादिदर्शनबोधः ॥
नास्ते तथा जयति कोऽपि बलावलिप्तो
यत्खण्डनाय पृथुखण्डनखण्डशिक्षा ।
तस्मात्तदीक्षिकणमात्रमुपेत्य यत्ना-
दारभ्यते निखिलखण्डकरो निबन्धः ॥
यदि विज्ञातुमुत्सुका न्यायस्य रहस्यं विजयलिप्सवः ।
ताराचरणविरचितं पश्यन्तु खण्डनीशिष्टमिदम् ॥
अलङ्कारोऽयमार्याणां सर्वशोभातिवर्त्तकः ।
मुक्तासु बदरीभ्रान्तिमावहन्तु मनीषिणः ॥
कृपया शृण्वन्तु वचः खला वा नराः खरतरदशनाग्राः ।
मा कुट्टयन्तु चैतदकिञ्चित्कारकालज्ञानेन । (?)
अथवा कुट्टयन्त्वेते तेन किं स्यादमुष्य तु ।
अशनौ दशनाघात आत्मपाताय कल्प्यते ॥

अथाधुना कथायां यदवच्छेदकत्वादिकं व्यवह्रियते तत् किमर्थमिति जिज्ञासायाम् आधुनिकास्तावन्नैयायिकाः प्रत्यवतिष्ठन्ते ।

End :

सर्वैः कथिता युक्तिः पूर्वपक्षात् स्थिता हि सा ।
समये योजनाद् धीरादपयात्वखिलं मलम् ॥
पन्था निष्कासितोऽस्माभिस्तत्त्वमन्दिरगामिनाम् ।
खण्डकानपरान् धीराः शोधयन्तु स्वयं दृशा ॥

Colophon:

इति श्रीकाशीराजवदखिलगुणसम्पन्नश्रीकाशीराजसभासदवरभट्टपल्लोनिवासिवसिष्ठवंशरत्नाकरसम्भवश्रीताराचरणशर्मविरचिते खण्डनपरिशिष्टे प्रथमः परिच्छेदः समाप्तः । इति हरिः ओम् शुभमस्तु । जयमङ्गलम् ।

Author — Tārācaraṇa Śarma who was born in Vāsiṣṭavaṁśa—courtier of Kāśi Rāja.

Remarks—This Ms. contains only one *pariccheda*. The views of opposite schools are disproved by highly logical arguments.

—⊙—

॥ तत्त्वचिन्तामणिदीधितिः ॥

841. TATTVACINTĀMAṆIDĪDHITI.

Substance—Palm leaf. Size—$11\frac{1}{8}'' \times 2''$. Leaves—195. 9 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—3700. Complete.

Subject—Same as No. 838.

Beginning:

ॐ

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिनिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥

* * * *

पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्यावधानाय च सङ्गतिं प्रदर्शयन् अनुमाननिरूपणं प्रतिजानीते—प्रत्यक्षमित्यादि ।

End:

तथाच शरीरजन्यान्योन्याभावसमुदायस्य व्याप्यत्वेन तत्र क्षित्याद्यन्योन्याभावानां न निवेशः । व्यर्थत्वात् । तथापि जन्यत्व-शरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तत्र बहुभावसम्भव इत्यत्र तात्पर्यमिति ।

विदुषां निवहैरिहैकमत्याद्यददुष्टं निरटङ्कि यच्च दुष्टम् ।
यदि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥

Colophon:

इति महामहोपाध्यायश्रीरघुनाथभट्टाचार्यशिरोमणिविरचिता अनुमानदीधितिः समाप्ता ।

हरिः ॐ । शुभमस्तु ।

1058-ാമാണ്ടു് മാൎക്ഴിമാസം 12-ാംന- എഴുതിത്തീൎത്തതു്.
വെങ്കിടരാമയ്യർ എഴുതിയതു്.

Author—Raghunātha Bhattācārya.

Remarks—The work is printed in Telugu characters at Mysore and in Sanskrit at Kumbhakonam. The last two leaves are witten on a single side only.

॥ तत्त्वचिन्तामणिदीधितिप्रकाशः ॥

842. TATTVACINTĀMAṆIDĪDHITIPRAKĀŚA.

Substance—Palm leaf. Size—12″ × 1¾″. Leaves—72. 9—11 lines per page and about 52—60 letters per line. Script—Grantha.. No. of Granthas—2520. Incomplete.

Subject—Same as No. 838.

Beginning :

हरिः । श्रीगणपतये नमः ॥

सर्वमिदमनुमानं प्रामाण्यसाधनम् । समारब्धेति—समारब्धा या अनुमानप्रामाण्यपरीक्षा, तत्कारणीभूतं यद् व्याप्तिग्रहणोपायप्रतिपादनं तस्य निदानमित्यर्थः । व्याप्तिस्वरूपज्ञाने हि व्यभिचारज्ञानाभावोऽव्यभिचारग्रहे सहचारग्रहश्च समानाधिकरणवृत्तिर्धूमत्वरूपव्याप्तम् । सहचारांशस्य विशेषणतया तज्ज्ञानविधया उपयोगित्वेन प्रतिपादयितुं शक्यते ।

End :

यद्यपि साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकसम्बन्धेन वा प्रतियोग्यसामानाधिकरण्यं सुलभमेव, तथापि यथाश्रुत्यभिप्रायेणेदम् । साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यविवक्षणेऽभावसाध्यके प्रतियोग्यसमानाधिकरण्याप्रसिद्धिरेवेति हेतुसमानाधिकरणेति । हेतुसमानाधिकरणश्चासौ अत्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणश्चेति स तथा । अभावसाध्यकेति ।

Colophon :

Author—Bhavānanda.

Remarks—The work is a well-known commentary on *Cintamanididhiti Anumitiprakarana*. It extends up to the end of *Siddhantavyapti*. It has been printed at Kumbhakonam. The leaves are worn out.

॥ तत्त्वचिन्तामणिदीधितिव्याख्या ॥

843. TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

Substance—Palm leaf. Size—19½″ × 1¼″. Leaves—212. 4 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2650. Incomplete.

Subject—Same as No. 838.

Beginning :

नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरा-
दुर्वीमण्डलमण्डनायितयशोराशेरशेषा गिरः ।
संक्षिप्तोक्त्यातिदक्षदीधितिकृतः प्रत्यक्षचिन्तामणि-
व्याख्यां व्याकुरुते गदाधरसुधीमोदाय विद्यावताम् ॥

गुरुकीर्तनरूपमङ्गलं कुर्वाण एव स्वीयग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं तदुत्कर्षं दर्शयति—गिरामिति । हृदये मनसि निधानं संबन्धसंपादनम् । मनसि गिरः संबन्धश्चार्थज्ञाने जननीये तत्सहकारित्वात् । सहकारित्वं च परम्परया फलोपयोगित्वम् । तथा

च गुरुवाक्याधीनशाब्दबोधसंस्कारसध्रीचीनेन मनसा संबन्धव्यतिकरापरिशीलितमर्थं निश्चित्येति फलितार्थः । सिद्धान्ताविरुद्धार्थ एवात्र वर्णनीय इति सूचयति—विधायेति ।

End:

प्रामाण्यसंशयस्यासार्वत्रिकत्वं च विशेषदर्शनकालीनज्ञाने प्रामाण्यनिश्चयसंभवेनेति बोध्यम् । न तुल्यत्वमिति प्रामाण्यसंशयस्य विषयसंशयाहेतुत्वे निश्चयोच्छेदवत्तस्य तथात्वेन तदुच्छेद इत्यर्थः । यद्यपि तन्मतेऽपि एककोटिभानसामग्री यत्र लौकिकसन्निकर्षादिघटिततया विशेषदर्शनसमवधानेन वा बलवत्यनुवर्तते तत्रैव साधारणधर्मदर्शनादि... ... ...

....

Colophon:

Author—Gadādharabhaṭṭācārya.

Remarks—The Ms. covers only a fragment of *Pratyakṣakhaṇḍa*.

॥ तर्कपरिभाषा ॥

844. TARKAPARIBHĀṢĀ.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—36. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Elaboration of certain general principles binding upon the science of logic.

Beginning:

... ...वो विद्यते, तथापि नासौ नियतः। तन्तुरूपस्य तु पटान्नियतः पूर्वभावोऽस्त्येव। किन्तु अन्यथासिद्धिः तस्य पटरूपजननेोपक्षीणत्वात् पटं प्रत्यपि कारणत्वे कल्पनागौरवात्। तेनानन्यथासिद्धनियतपूर्वभाविन्वं कारणत्वम्। अनन्यथासिद्धनियतपश्चाद्भाविन्वं कार्यत्वम्।

End:

तत्र विवक्षितार्थे किञ्चिन्न्यूनं न्यूनम्। विवक्षितार्थात् किञ्चिदधिकमधिकम्। सिद्धान्तादपध्वस्तोऽपसिद्धान्तः। प्रकृतेनानभिसंबन्धार्थवचनमर्थान्तरम्। उत्तरापरिस्फूर्तिरप्रतिभा। पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञानस्वीकारो मतानुज्ञा। इष्टार्थभङ्गो विरोधः। इहात्यन्तमनुपयुक्ता रूपभेदाः रूपभेदेन भाग्याभागप्रतिपादनमिति अनुपयोजनानाञ्चालक्षणं न दोषाय। एतावतैव बालव्युत्पत्तिसिद्धेः इति।

Colophon:

इति केशवमिश्रेण विरचिता तर्कभाषा समाप्ता।

नमः शिवाय।

Author--Keśava Miśra.

Remarks--The front leaf is missing and most of the leaves are in a mouldering condition. The colophon discloses the title of the work as *Tarkabhāsā*.

॥ तर्कपरिभाषा ॥

845. TARKAPARIBHĀṢĀ.

Substance—Palm leaf. Size—14½" × 1¾". Leaves—6. 13 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—525.

Subject—Same as No. 844.

Beginning:

बालोऽपि यो न्यायनये प्रवेश-
मलेपेनं वाञ्छत्यलमः श्रुतेन ।
संक्षिप्य युक्त्यन्वितत्तर्कभाषा
प्रकाश्यते तस्य कृते मयैषा ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम् । अस्यायमर्थः प्रमाणादिषोडशपदार्थतत्त्वज्ञानान्मोक्षप्राप्तिर्भवतीति ।

End :

सा च पूर्वादिप्रत्ययैरनुमेया तेषामन्यनिमित्तासम्भवात् । पूर्वस्मिन् पश्चिमे वा वस्तुनस्तादवस्थ्यात् । सा चैकापि तत्तद्देशसंयोगोपाधिवशात् प्राच्यादिसंज्ञां लभते । आत्मत्वादिसंबन्धेनात्मसुखदुःखादिर्विचित्र्यात् नानाभूतः स चोक्त एव । तस्य गुणाः संख्यादयः पञ्च बुद्ध्यादयो नव । नित्यविभुत्वे पूर्ववत् । मनस्त्वसंबन्धवन्मनः अणुसंयोग्यन्त..... । इन्द्रियं सुखाद्युपलब्धिकरणं नित्यं संख्यादिपञ्चगुणवत् परत्वापरत्ववेगवत् ।

Colophon :

Author—Same as No. 844.

Remarks—The Ms. is lacking in its closing portion. It is somewhat decayed.

॥ तर्कपरिभाषा ॥

846. TARKAPARIBHĀṢĀ.

Substance—Palm leaf. Size—11½″ × 1½″. Leaves —49. 7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject etc.—Same as No. 844.

Remarks—The Ms. comprises the whole text.

॥ तर्कपरिभाषा ॥

847. TARKAPARIBHĀṢĀ.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves— 73. 6—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 525.

Subject—Same as No. 844.

Beginning etc.—Same as No. 845.

॥ तर्कप्रकाशः (न्यायसिद्धान्तमञ्जरीदीपिका) ॥

848. TARKAPRAKĀŚĀ.

Commentary on Nyāyasiddhāntamañjarī.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—60. 8—9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject—Elucidation of the *Nyāyasiddhāntamañjarī*.

Beginning:

हरिः ओम् । श्रीमहागणपतये नमः । सरस्वत्यै नमः । गुरुभ्यो नमः ।

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
रोषं मानिनि मा कृथास्त्वदपरा नान्यास्ति वन्द्या मम ।
किन्तु त्वामहमानमामि मनसि ध्यात्वा तवैवाकृती-
रित्थं हर्षितशैलराजतनयाश्लिष्टः शिवः पातु वः ॥
सिद्धान्तगूढवर्त्मैकभावनापरिशीलिता ।
श्रीकण्ठनिर्मिता सेयं कृतिरातनुतान्मुदम् ॥

सत्येकस्मिन्नपि बाधके साधकसहस्रा(णाम)पि अकिञ्चित्करत्वेन प्रतिबन्धकभावस्यावश्यकतया प्रकृतग्रन्थसमाप्तिप्रतिबन्धकदुरितरूपविघ्नविघाताय कृतं भगवन्नत्यात्मकं मङ्गलं शिष्यशिक्षार्थकं ग्रन्थतो निबध्नाति–प्रणम्येति । मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धान्तस्थितिः ।

End:

...ननु समवायेन रूपं प्रति सामानाधिकरण्यसम्बन्धेन अव-

यवसंयोगादिना हेतुतया कपालगन्धादावपि रूपोत्पत्त्यापत्त्या सत्त्वावच्छिन्न प्रति द्रव्यत्वेन हेतुत्वावश्यकतया संयोगत्वावच्छिन्नं प्रति तद्धेतुत्वे मानाभाव इति न दर्शितगौरवमत आह—अप्रयोजकश्चेति । यद्वा तद्धर्मस्यापि कार्यतावच्छेदकत्वे क्षतिविरहादतआह--अप्रयोजकश्चेति । इदमिति विभुत्वसाधकमनुमानमित्यर्थः । अनुकूलतर्काभावादिति भावः । संयोगत्वावच्छेदेनेति । संयोगत्वस्य द्रव्यजन्यत्वव्याप्यत्वेन नित्यसंयोगस्वीकारे तादृशनियमभङ्गनादिति भावः । ननु तादृशनियमे मानाभावादित्यत आह--अप्रयोजकश्चेदित्यपरे ।

Colophon :

नानातर्कविचारणैः कममुना(?) यत् किञ्चिदुक्तं मया
तद्ग्रन्थं तु हृदा विभाव्य सुधियः सारार्थमङ्गीकाः ।
... ...
ह्येनद्यदि धारयेदव... नस्सञ्जायते सोऽचिरम् ॥
....
हरिः ओं । शुभमस्तु । श्रीरामजयम् ॥

Author—Śrīkaṇṭha *alias* Śitikaṇṭha.

Remarks—Only the *Pratyksaparicchcda* is extant in this Ms. Three leaves in the middle and 3 at the close are blank. The work is printed in Benares.

॥ तर्कप्रकाशः (न्यायसिद्धान्तमञ्जरीदीपिका) ॥

849. TARKAPRAKĀŚA.

Commentary on Nyāyasiddhāntamañjarī.

Substance--Palm leaf. Size--14″ × 1¾″. Leaves—

63. 9—10 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—1800.

Subject—Same as No. 848.

Beginning:

हरिः । श्रीमहागणपतये नमः ।

प्रत्यक्षनिरूपणानन्तरम् उपजीव्योपजीवकभावसङ्गत्यानुमानं निरूपयन् प्रतिजानीते---अथेति । अथ शब्दोऽत्रानन्तर्यवाची । तत्र च प्रत्यक्षनिरूपणस्यार्थादवधित्वमधिगम्यते । अत एव सिद्धत्वमपि निरूप्यत इति वर्तमानार्थकलट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः ।

End:

तस्माद्वह्निमानित्यस्यानुवादत्वेन प्रयोजनजिज्ञासायामबाधितत्वादिज्ञानमेव प्रयोजनतयावसीयते तद्बोधश्च लक्षणया । यदि च मानसबोधादिनापि तात्पर्यनिर्वाहे लक्षणकल्पनमन्याय्यं, यथा भूमोऽस्तीति वाक्यस्य वह्निपरस्याप्यानुमानिकवह्निबोधमादाय तात्पर्यनिर्वाहस्तथा प्रकृतेऽपीति विभाव्यते । तदा मानस एव परमबोध इति तद्रहस्यमत्रानुसन्धेयम् ।

Colophon:

किञ्चिज्जल्पित(मा?म)त्र तद्भ्रुतंर श्रुत्वा हृदि ध्यायतां
दोषंरावृतमस्तु युक्तिविरहं वाक्यं मदीयं बुधाः ।
चन्द्रः किं न कलङ्कितोऽपि भवति श्लाघ्याय गण्यः सतां
बालत्वं यदि तत्र हेतुरधुना बालीयमेतद्वचः ॥ (?)

हरिः ओं । श्रीगुरुभ्यो नमः ।

शिलिक्पक्षीय अनुमानपरिच्छेदः समाप्तः ।

श्रीकृष्णाय परमगुरवे नमः ।

Author—Same as No. 848.

Remarks—The Ms. embodies the whole of *Anumāna-prakaraṇa.*

॥ तर्कप्रकाशः (न्यायसिद्धान्तमञ्जरीदीपिका) ॥

850. TARKAPRAKĀSA.

Commentary on Nyāyasiddhāntamañjarī.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 1\frac{7}{8}''$. Leaves—176. 9—11 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—4400.

Subject—Same as No. 848.

Beginning :

शुभमस्तु ।

जटाजूटलसद्गङ्गाजलभूषितमस्तकम् ।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा ॥

उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् प्रतिजानीते-- अथेति। अत्र ज्ञायमानशब्दस्य शब्दप्रमाणतया पदे उपमानोपजीवकत्वाभावात् फलयोः स्वरूपप ... योर्वा सङ्गतिर्वोध्या ।

End :

प्रवृत्तौ तु इष्टतानच्छेदकप्रकारकज्ञानत्वेन हेतुतायां व्यवस्थापि-

तत्वादिति भावः । इदं रजततया जानामीत्यनुव्यवसायोऽपि शुक्ति-गोचररजतत्वप्रकारकप्रत्यक्षसाधकोऽवसेय इति ।

Colophon :

अतिकर्कशतर्के यद्धृदयं स्फुरितं मम ।
ईश्वरीयपदद्वन्द्ववरस्यैतद्विजृम्भणम् ॥
योऽसौ काश्यां समुत्पन्नो विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतान्मुदम् ॥

काशीगर्भसम्भवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्म-विरचिता तर्कप्रकाशाभिधा सिद्धान्तमञ्जरीदीपिका समाप्ता। हरिः ओम् । शुभमस्तु ।

Author—Same as No. 848.

Remarks—*Sabdapariccheda* alone is embodied in this Ms.

॥ तर्कसंग्रहः ॥

851. TARKASAṄGRAHA.

Substance—Palm leaf. Size—6½″ × 1½″. Leaves—12. 7 lines per page and 28—31 letters per line. Script—Malayāḷam. No. of Granthas—168. Complete.

Subject—Exposition of the seven categories, such as *Dravya, Guṇa* etc.

Beginning:

श्रीः ।

हरिः । श्रीगणपतये नमः ।

अविघ्नमस्तु ।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

End :

तादात्म्यावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो न भवतीति । सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

Colophon :

इति अन्नम्भट्टोपाध्यायकृतस्तर्कसंग्रहः समाप्तः ।

Author—Annambhatta.

Remarks—The leaves are damaged. The script is legible.

॥ धर्मितावच्छेदकवादः ॥

852. DHARMITĀVACCHEDAKAVĀDA.

Substance—Palm leaf. Size—12$\frac{3}{8}$″×2″. Leaves—33, 9—11 lines per page and 46—58 letters

per line. Script—Grantha. No. of Granthas—990. Complete.

Subject—Discrimination of the qualities of objects by means of the essential attributes, *Anumiti* and *Parāmarśa*.

Beginning :

हरिः । ओम् । धर्मितावच्छेदकवादार्थः ।

अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यम् । तेन एकपुरुषीयपरामर्शदशायां तच्छून्यपुरुषान्तरस्य नानुमितिः । तस्य समवायरूपकारणताच्छेदकसम्बन्धेन परामर्शानधिकरणत्वात् ।

End :

नापि तदात्मनि सिद्धिसत्वादिति । नचैवं विधेयताप्रत्यासत्या तत्र तादात्म्यत्वेन अनन्तात्मनां भेदेन च भिन्नपरामर्शहेतुतायाः पूर्वोपदर्शितविनिगमनाविरहेण अनन्तकारणाधिक्यात् तन्मते गौरवमिति वाच्यम् । तदपेक्षया आत्मवृत्तिभेदेन उपदर्शितकारणताकल्पनस्य उचितत्वादित्याहुः ।

Colophon :

Author—Gadādharabhatta.

Remarks—The work is printed in Mysore and Kumbhakonam. The leaves are much decayed.

॥ निरुक्तिविवृतिः ॥

853. NIRUKTIVIVṚTI.

Substance—Palm leaf. Size—14$\frac{3}{8}$" × 1$\frac{7}{8}$". Leaves—100. 8 lines per page and 58—62 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Exposition of Cennibhaṭṭa's Nirukti.

Beginning :

सकृन्नत्वा प्रियं लोको लभते शान्तिसम्पदम् ।
स नः पायादपायेभ्यो योगानन्दनृकेसरी ॥

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय शिष्टाचारपरिप्राप्तविशिष्टदेवताप्रणामं मनसि निधाय तत्र प्रेक्षावतां प्रवृत्तिसिद्धये विषयप्रयोजने निर्दिशंश्चिकीर्षितं प्रतिजानीते-- बालोऽपीति । एषा मया प्रकाश्यत इति क्रियाकारकसम्बन्धः ।

End :

अभावो नामासमवायित्वे सति असमवायः । असमवाय इत्युक्ते द्रव्यादिपञ्चकेऽतिव्याप्तिरत उक्तमसमवायीति । तावत्युक्ते समवायेऽतिव्याप्तिरत उक्तमसमवाय इति ।

Colophon :

निरुक्तिविवृतिर्बालबोधवैशद्यकारिणी ।
दोषसम्भावनाहीना सादरं दृश्यतामियम् ॥

विष्णुभट्टविरचिता चेन्निभट्टीयनिरुक्तिविवृतिः समाप्ता ।

Author—Visnubhatta.

Remarks—The leaves of the Ms. are damaged and torn. The text by Chenni Bhatta and its commentary by Visnubhatta are embodied herein. The date of transcription is put down as the 2nd Meenom 753 M. E. corresponding to 1578 A. D. The closing four leaves are devoted to the elucidation of the inquiry into the self-dependency or otherwise of knowledge.

दशरथवसुदेवपूर्वजन्मा-
जितसुतपःफलरूपपुण्यदेहौ ।
सकलभुवनपालकप्रसिद्धौ
सततमहं प्रणमामि रामकृष्णौ ॥

या त्वरा द्रौपदीत्राणे या त्वरा गजरक्षणे ।
मय्यार्ते करुणामूर्ते सा त्वरा क्व गता हरे ॥

विगतविविधरागद्वेषदोषात्मभक्त-
प्रकटितनिजरूपौ पावनौ पावनानाम् ।
रणविजितमुरारी रक्षिताशेषलोकौ
रघुयदुकुलदीपौ रामकृष्णौ भजेऽहम् ॥

A. D. 1579 ഇതു-മത മീനമാസം ൨-ന൹ ഗോവിന്ദപുരത്തു തെവരുടെ മഠത്തിൽ നിൻറു എഴുതിക്കൂടീ.

॥ निरुक्तिविवृतिः ॥

854. NIRUKTIVIVṚTI.

Substance—Palm leaf. Size—17″ × 2″. Leaves—91. 10 lines per page and 46—50 letters per line. Script—Malayāḷam. No. of Granthas—2730. Complete.

Subject etc.—Same as No. 853.

Remarks—The leaves are completely decayed. After colophon the following two verses are seen:—

पञ्चदेवेन्द्रकुट्यश्चलितदशदिशार्कीर्णकोटीरकोट्यो
विश्लिष्यच्चर्मपट्यो विगळितशतपत्रासनोद्यत्करोट्यः ।
सङ्गायत्स्वर्वधूट्यः सरभसविनमत्सिद्धगन्धर्वधाट्य-
स्त्रुट्यत्कैलासतट्यस्त्रिपुरविजयिनः पान्तु मामारभट्यः ॥
वाम(कुच)चूचुकनिविष्टमणिवीणावादनविनोदवलमानकुचभाराम् ।
नीपविपिनान्तरलसत्कनकडोलावेल्लनकरीं गिरिसुतामहमुपास्मे ॥
श्रीकृष्णाय नमः । श्रीकण्ठेन लिखितमिदं पुस्तकम् ।
शिवमस्तु । श्रीगुरुभ्यो नमः ।

॥ न्यायसूत्रम् ॥

855. NYĀYASŪTRAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—15. 11 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—The basic *Sūtras* of Nyāya philosophy.

Beginning :

अथ प्रयोजनाभिधेयसम्बन्धप्रकरणम् । प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-च्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। दुःखजन्म-प्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।

प्रमाणप्रकरणम् ।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।

End :

अथ दोषनिरूप्यतानुज्ञादित्रयप्रकरणम् ।

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा । नि-ग्रहस्थानप्राप्तस्य निग्रहः पर्यनुयोज्योपेक्षणम् । अनिग्रहस्थाने निग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः । ... ... निरूप्यनिग्रहस्थानद्वयप्रकरणम् । सिद्धान्तमभ्युपे-त्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः । हेत्वाभासाश्च तथोक्ताः । प्रकरणानि सप्त । सूत्राणि चतुर्विंशतिः ।

Colophon :

इति पञ्चमोऽध्यायः । शास्त्रं च ।

Author—Gautama.

Remarks—The last Fol. is written in Grantha script. The work is printed in Benares.

॥ न्यायसूत्रम् (व्याख्योपेतम्) ॥

856. NYĀYASŪTRAM

with commentary.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—87. 12 lines per page and 30 letters per line. Script—Grantha. No. of Granthas—2000. Complete.

Subject—Same as No. 855.

Beginning :

अविघ्नमस्तु । श्रीमहागणपतये नमः ।

विश्वव्यापी विश्वशक्तिः पिनाकी
विश्वेशानो विश्वकृद्विश्वमूर्तिः ।
विश्वज्ञाता विश्वसंहारकारी
विश्वाराध्यो राधयत्वीहितं नः ॥

यो ह्यक्षपादः प्रवरो मुनीनां
प्रमाणशास्त्रं जगतो जगाद ।
कुतार्किकेऽज्ञाननिरासहेतुः
करिष्यते तस्य मया प्रबन्धः ॥

पुण्डरीकपुर(?या: श्रा)ढ्यो वेदशास्त्रार्थकोविदः ।
गम्भीरवंशजश्चक्रे प्रबन्धं श्रीप्रवादकः ॥

अत्र किल चतसृषु प्रमातृप्रमाणप्रमेयप्रमितिविधासु तत्त्वं परिसमाप्यते । किं पुनस्तत्त्वम् । सतश्च सद्भावः असतश्च असद्भावः । तत्र तावत् खलु षोडशधा व्युत्पादेष्टुमुपक्रमते—

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प - वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।

End :

हेत्वाभासाश्च यथोक्ताः । यथैव विभक्ता लक्षणेन तथैव तेषां निग्रहस्थानत्वं भवति । ते खल्विमे प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्च विस्तरतः । उद्दिष्टाः प्रथमे सूत्रे, लक्षिताः प्रथमेऽध्याये, परीक्षिताः शेषेणेति ।

जातीनां सप्तपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥

Colophon :

इति न्यायसूत्रविवरणे पञ्चमोऽध्यायः ।

शुभमस्तु । श्रीरस्तु ।

൯൨൪-ാമാണ്ടു് അക്ഷയവർഷം അടിമാസം ൧൨-ാംന-തെങ്കാശിയിൽ ഇരുക്കും മഹാദേവൻ പുത്രൻ സുബ്ബൻ സ്വഹസ്തലിഖിതം ഇദം പുസ്തകം സുബ്രഹ്മണ്യലിഖിതം

Author—Com :—Śrī Pravādaka.

Remarks—The colophon proves that the commentator belonged to the *Gambhīra* family.

॥ भावप्रकाशिका (तर्कभाषाव्याख्या) ॥

857. BHĀVAPRAKĀŚIKĀ.

Commentary on Tarkabhāṣā.

Substance—Palm leaf. Size—27½" × 1½". Leaves—

54. 5—5 lines per page and 88—96 letters per line. Script—Malayāḷam. No. of Granthas —1800.

Subject—Same as No. 844.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
साकूतसस्मितविलोकितजाततृष्णे
कृष्णे करस्पृशि सरोरुहमन्दिरायाः ।
लीलायितं नयनयोर्मनसोऽभिलाषो
डोलायितं श्रवणकुण्डलयोः पुनातु ॥
गोपीनाथेन विदुषा नत्वा हरिपदाम्बुजम् ।
संक्षिप्य तर्कभाषाया भावः कश्चित् प्रकाश्यते ॥

कर्तव्यविघ्नविघातकं परमेश्वरनत्यादिकं मङ्गलं मनसैवाचरन् प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थम् अभिधेयाभिधानद्वारा प्रयोजनमपि सूचयन्नितरग्रन्थापेक्षया स्वग्रन्थस्य वैलक्षण्यं प्रतिपादयति—बालोऽपीति। अधिकव्युत्पत्तिरहितोऽपीत्यर्थः ।

End:

अत्र प्रामाण्यस्यानुमितिग्राह्यत्वे तदनुमितेरप्यनुमित्यन्तरेण प्रामाण्यग्रहे फलमुखिलिङ्गपरामर्शेऽपि लिङ्गज्ञानजन्यानुमित्यन्तरेण प्रामाण्यग्रहे करणमुखीत्यनवस्था स्यादिति न शङ्कनीयम् । अप्रामाण्यशङ्काशून्यज्ञानस्यैव स्वकार्यकारित्वेन प्रामाण्यग्रन्थस्याप्रयोजकत्वादित्यभिप्रायेण सिद्धमुपसंहरति—अत इति । परशब्दार्थमाह—नजो न ग्राहकेणेति । अप्रामाण्याग्राहकेण यावता

ज्ञानग्राहकेण यावता ज्ञानग्राहकेणेत्यर्थः । परिच्छेदार्थं सङ्कल्पाश्चत्वार्येवेति तेन.....

Colophon :

श्रीसोमसुतकुलसमुद्भूतमहामहोपाध्यायभवनाथठक्कुरसुतगोपीनाथसूरिशेखरविरचितायां तर्कभाषाभावप्रकाशिकायाम् अनुमानपरिच्छेदः समाप्तः ।

Author—Gopināṭha.

Remarks—The Ms. extends up to the end of *Anumānapariccheda.*

॥ शब्दशक्तिप्रकाशिका ॥

858. ŚABDAŚAKTIPRAKĀŚIKĀ.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—235. 9 lines per page and 24—25 letters per line. Script—Malayāḷam. No. of Granthas—3300.

Subject—Exposition of the signification and potentiality of words.

Beginning :

हरिः । श्रीगणपतये नमः ।

तर्कं तन्त्रं च विदुषा विदुषां तोषकारिका ।

क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

ग्रन्थारम्भे विघ्नविघाताय समुचितां शब्दमयीं देवतां ग्रन्थकृत् स्मरति—

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी ॥

End :

मरीचेन संसृष्टं मारीचकम् । दध्ना दाधिकम् । एवं लवणेन मिश्रितमित्यर्थे तु तद्धितस्य लुगेव । यथा लवणः पाको लवणं दधि लवणा यवागूरिति । मुद्गेन मिश्रितमित्यर्थे मौद्गमन्नम् । चूर्णेन मिश्रितमित्यर्थे चूर्णी पिष्टकः । चूर्णोऽस्यास्तीत्यर्थकस्तु मन्वर्थेन्प्रत्ययो न मिश्रितस्य वाचक इति तेन नान्यथासिद्धिः ।

Colophon :

इति महामहोपाध्यायजगदीशतर्कालङ्कारविरचिता शब्दशक्तिप्रकाशिका समाप्ता । सरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।

Author—Jagadīśatarkālaṅkāra.

Remarks—The work is printed in Benares.

॥ सर्वोपकारिणी भवानन्दीयव्याख्या ॥

859. SARVOPAKĀRIṆĪ.

Commentary on Bhavānandīya.

Substance—Palm leaf. Size—12″ × 2″. Leaves—42. 20 lines per page and 35—37 letters per line. Script — Grantha. No. of Granthas —1000. Incomplete.

Subject—Same as No. 842.

Beginning :

हरिः । श्रीगणपतये नमः ।

त्रिपुरारातिपादाब्जनखचन्द्रसमुद्गताः ।
कान्तयः शुभदाः सन्तु ममाज्ञानतमोभिदः ॥

यदा(ल)म्बनतो मूर्खस्तार्किकाणां धुरन्धरः ।
बुधो भवति तं वन्दे गुरुं श्रीकण्ठदीक्षितम् ॥

भवानन्दकृता व्याख्यानुमानमणिदीधितेः ।
व्याख्यायते निगूढात्मा महादेवेन तत्त्वतः ॥

भवानन्दीप्रकाशस्तु विस्तृतो रचितो मया ।
अतः संक्षेपतः कुर्वे व्याख्यां सर्वोपकारिणीम् ॥

प्रारिप्सितनिर्विघ्नकामनया कृतं गुरुनमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते—नमस्कृत्येति । मार्गमिति गूढमित्यस्य विशेष्यम् ।

End :

अनुमितिकरणस्येतरवैलक्षण्यज्ञानार्थं प्रागुक्तानुमितिकरणत्वरूपलक्षणं लक्ष्यतावच्छेदकीकृत्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानजातीयकरणत्वरूपलक्षणान्तररूपलक्षणान्तरकरणमित्युपेयम् । एवञ्च तच्छब्देन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनानुमितेः परामर्शः । अनुमानपदमनुमितिकरणपरम् ।

Colophon :

इति महादेवविरचितायां सर्वोपकारिण्यां भवानन्दीव्याख्यायामनुमितिलक्षणम् ।

Author—Mahādeva.

Remarks—The work deals with the exposition of the invariable concomitance, after commencing with the definition of Inference. The last introductory verse manifests that this is a compendium of an elaborate commentary on the same text by the author.

॥ सारसंग्रहः (तार्किकरक्षावृत्तिः) ॥

860. SĀRASAṄGRAHA.

Commentary on Tārkikarakṣā.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1''$. Leaves—100. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—2500. Incomplete.

Subject—Same as No. 844.

Beginning:

हरिः । श्रीगणपतये नमः ।

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिकर्तारं निमित्तं जगतामपि ॥

प्रारिप्सितस्य ग्रन्थस्य प्रेक्षावदुपादित्साप्रयोजिकामभिमतफलसाधनतामभिधाय श्रोतृबुद्धिमनुकूलयन् वर्तिष्यमाणमेवाग्रे दर्शयति—

निःश्रेयसफलं प्राहुर्येषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥

End :

चतुर्धा निग्रहगतिर्वादे सम्भवर्जिताः ।
अनुद्भाव्यास्तथोद्भाव्याः कथाविच्छेदकारकाः ॥

इति । तत्रासम्भविनस्तावदाह—

अर्थान्तरमविज्ञानं हानिर्न्यायो निरर्थकम् ।
अपार्थकमिति प्रायः षट्कं वादेष्वसम्भवि ॥

एतेषामर्थान्तरादीनां स्वाज्ञानसंवरणपराज्ञानप्रकाशनमात्रफलत्वेन प्रवृत्तेर्वादे च त ... ...

Colophon :

इति वरदराजविरचिते तार्किकरक्षाव्याख्याने सारसंग्रहे द्वितीयः परिच्छेदः ।

Author—Varadarāja.

Remarks—The last Fol. is missing. The Ms. concludes with the 26th verse in the 3rd Pariccheda. The work is printed in Benares.

॥ सिद्धान्तमुक्तावलिः (कारिकावलीव्याख्या) ॥

861. SIDDHĀNTAMUKTĀVALI.

Commentary on Kārikāvalī.

Substance—Palm leaf. Size—$10\frac{1}{8}'' \times 1\frac{3}{4}''$. Leaves—102. 8 lines per page and 32 letters per line.

Script—Malayāḷam. No of Granthas—1600. Complete.

Subject—Same as No. 844.

Beginning:

हरिः ओम् ।

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥

End:

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टा इत्यत आह—तदेवेति । यदौषधं मया कृतं तदेवौषधमन्यैरपि कृतमित्यादिदर्शनादिति भावः ।

Colophon:

इति श्रीमन्महोपाध्यायविश्वनाथपञ्चाननभट्टाचार्यविरचिता मुक्तावली समाप्ता ।

हरिः ओम् । शुभमस्तु । ശ്രീരാമജയം.

Author—Viśvanāthapañcānana.

Remarks—The work is printed in N. S. Press,

Bombay. The author is also credited with the text of this commentary.

॥ सिद्धान्तमुक्तावलिः (कारिकावलीव्याख्या) ॥

862 A. SIDDHĀNTAMUKTĀVALI.

Commentary on Kārikāvalī.

Substance—Palm leaf. Size—10¾″ × 1⅞″. Leaves—72. 9 lines per page and 38—42 letters per line. Script—Malayāḷam. No. of Granthas—1000. Complete.

Subject—Same as No. 844.

Beginning etc.—Same as No. 861.

॥ कारिकावली ॥

862 B. KĀRIKĀVALĪ.

Substance—Palm leaf. Size—10¾″ × 1⅞″. Leaves—7. 11 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—202. Complete.

Subject—Same as No. 844.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नूतनजलधररुचये गोपवधूटीदुकूलचोराय ।

तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ॥

End :

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।
कण्ठ(त्वि?)योगादिजन्या वर्णास्ते कादयो मताः ॥
सर्वशब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तितः ॥
कदम्बमुकुलन्यायादुत्पत्तिः कस्यचिन्मते ।
उत्पन्नः कोऽपि नष्टः क्व इति बुद्ध्याप्यनित्यता ॥
सोऽयं क्व इति बुद्धिस्तु सामान्यमवलम्बते ।
तदेवोपधमित्यादौ सजातीयेऽपि दर्शनात् ॥

Colophon :

तोल्पाहिताग्निभगवत्पादशिष्येण धीमता ।
यज्ञनारायणाख्येन लिखिता कारिकावली ॥
श्रीगुरुभ्यो नमः ।

Author—Same as No. 861.

Remarks—This work on *Nyāyaśāstra* is simple and instructive. The colophon discloses the identity of the scribe as Yajñanārāyana.

॥ तर्कसंग्रहः ॥

862 C. TARKASAṄGRAHA.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 1\frac{3}{8}''$. Leaves—7, 10 lines per page and 36 letters per line,

Script—Malayāḷam. No. of Granthas—168. Complete.

Subject etc.—Same as No. 851.

॥ सिद्धान्तमुक्तावलीप्रकाशः ॥

863. SIDDHĀNTAMUKTĀVALĪPRAKĀŚA.

Substance—Palm leaf. Size—12½″ × 2″. Leaves——101. 10 lines per page and 38—42 letters per line. Script—Grantha. No. of Granthas—2500. Incomplete.

Subject—Same as No. 844.

Beginning :

शुभमस्तु । हरिः ॐ । अविघ्नमस्तु ।

अनुमितावितिं । सङ्गतिश्चात्र प्रत्यक्षेणोपजीव्योपजीवकभावो बोध्यः । करणे निर्दिष्ट एव व्यापारे जिज्ञासोदयान्मूले पश्चान्निर्दिष्टमपि करणं प्रथमं दर्शयति —व्याप्तिज्ञानमिति ।

End :

ननु तत्रा ...व्यक्तिभेदे ... .स्तु । अतो भावार्थं प्रकाशयति—यदौपधं मया कृतमित्यादिना । अत्र च स्वकर्तृकत्वस्याभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यवसायिभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वान्न व्यक्तिभेदो विषयः । किन्तु तत्सजातीयभेदो विषय इति भावः ।

Colophon :

भानुं प्रणम्य परिभाव्य च शास्त्रसारं
मुक्तावलीकिरण एव पितृप्रदिष्टः ।

सद्युक्तिभिर्दिनकरेण करेण सोऽयं
नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु ॥
मुक्तावलीप्रकाशोऽयमज्ञानतिमिरापहः ।
तेन सन्तोषमाधत्तां नीलकण्ठः सतां प्रियः ॥

Author—Dinakara.

Remarks—The commentary begins with the *Anumānakhanda*. It is better known as *Dinakarī* and is printed in Bombay.

॥ सिद्धान्तलक्षणम् ॥

864. SIDDHĀNTALAKṢAṆAM.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—81. 10 lines per page and 52 letters per line. Script — Grantha. No. of Granthas—2750. Complete.

Subject—Elucidation of the invariable concomitance (व्याप्ति).

Beginning :

श्रीगणेशाय नमः ।

प्रतियोगिसमानाधिकरणेति । योग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मः तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यम्, तद्रूपविशिष्टस्य तद्धर्मविशिष्टयावन्निरूपिता व्याप्तिः । दण्डत्वादौ साध्ये

परम्परासम्बन्धं दण्डत्वादिकमेव साध्यतावच्छेदकम् । अतो नाव्याप्तिः ।

End:

उक्तस्थले हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य हेत्वाभासतानुपपत्तेः । एतेन व्यभिचारज्ञानाभावसहकृतं सामानाधिकरण्यज्ञानस्य साक्षादनुमितिहेतुतावलम्बनासम्भवोऽपि दर्शितः । इदमुपलक्षणम् । जलं घ्राणग्राह्यगुणवदुत्पत्तिकालावच्छिन्नघटो घ्राणग्राह्यगुणवानित्यादौ बाधानुपपत्तिर्द्रष्टव्या ।

Colophon:

Author—Gadādharabhaṭṭācārya.

Remarks—The work has been printed in Benares.

॥ ज्योतिषम् ॥

॥ आचारदीपिका (मुहूर्ताष्टकव्याख्या) ॥

865. ĀCĀRADĪPIKĀ.

Commentary on Muhūrtāṣṭaka.

